सनातनः ततः संवर्णयामास राघवं ग्रंथकोटिभिरिति कोटिभिः शतकोटिभिः चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यप्युक्तेः
तच्च संपूर्णं ब्रह्मलोके इस्मै तिति इह तु कुशलवोपदिष्टा चतुर्विंशतिसाहस्री सलं योगवासिष्टे तु शापांतराण्युक्तानि यथादि
सनत्कुमारो निष्काम अवसत् ब्रह्मति वैकुंठादागतो विष्णुस्त्रैलोक्याभिपतिः प्रभुः ब्रह्मणा पूजितस्तत्र सत्यलो
कनिवासिभिः विना कुमारं तं दृष्ट्वा ह्युवाच भगवानीश्वरः सनत्कुमारास्तब्धोसि निष्कामो गर्वचेष्टया अतस्त्वं
भवकामार्तः शारजन्मेति नामतः तेनापि शापितो विष्णुः सर्वज्ञ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 43
रा.वा.
बा.टी.
२२

वेनतवास्तिपत किंविल्का लंहितनत्य क्कातमन्तानीभविष्यसि शापितः शाम: किंविल्कालमवताेरोतरे(स्य लकालं तन्यक्कात हूपंतस्क्का य
ज्ञानीसइवतथा भृगुभार्याहता दृष्ट्वाशेवावक्रोधन्यूर्छितः विस्रोनवापि भार्यायाविंयोगो हि भविष्यति तथाहं दयाशापितो विस्रुक्ले
नेयत्तयाकृतं श्रुतस्त्वं स्त्रीवियोगं हि वचनान्ममयास्यसि शापितः शामाच्चलनेपत्निवेष्टेणसंभोगहूपेनयाभार्या हि देवदत्तस्यपत्नी
स्त्रीनीरसंस्थिता न्टसिंहवेषधृविस्तृहशापं चतमागता तेनशाप्रोन्टहरिर्दुःखार्तः स्त्रीवियोगतः तवापि भार्यया सार्धं वियोगो
हि भविष्यतीति ३ः(खार्तः त्ततीयार्थे शापं प्रथमाद्दुःखातो नेत्यर्थः तारापापत्यैकिंश्च्छिदाकाङ्क्षेतत्रैवैवस्थानइत्यलंविस्तरेण पावे
सेनम्लनिनारामेषाजीवलोचनः नमसोपवने पाशो वेषभृक्जानकीपतिः । श्रीरामः प्राकृतो लीलो स्त्रीयावर्णयितुंनदा मं
दोदरी पतिमित्रं क्रौं चयुहतवान्प्रभुः २ श्रेउंजेनिहतं तदृष्ट्वामतिः शापमयानदो विरेमा तिष्टमात्तात्वं निषाद्भविहिंसकं ३ वे
णापं कृत्वैवसर्वात्मानं तैवांतरधीयत पोका क्रान्तस्त्ववाल्मीकि ब्रह्मणाभ्युसुवोधितः ४ तोक्तागंमीरोज्जमत्वै दोझुयविंश्व
ब्राणप्रेरणजरक्कयोतकश्चव्यापादितोरावणः लंकाकापिविभीषणायसहसामद्वेवहस्तेर्पिता कृत्वैवं रखुनायककस्यच
दितेकोवानरोनावति ५ ॥

२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्येति मयास्य निनाशांतेन तपस्विना शकुनिशोकपीडितेनेदमीदृशं क्रूरं तपोनाशकरं किं व्याहृतमिति वीक्ष्यतोंतर्याभिः ड्रेरगायाभिषा
निषादे सर्वतो महत्वसंभावनया दृश्यमानकोवैतद्विपरीतसंभावनयाऽतिविषमयशस्करं महापातकं भ्रांत्याद्यधिकं पापं व्याहृतमिति चिंता
तावभूवेव यद्येतत्सर्वं वाल्मीकिकृतमेव तथापि कुशलवगायनतायाः काव्यस्य करणात्तदुक्तत्वमेव मंक्तिः अत्र व्यथायाश्चिंतायां स्तापशोत्त
तात बभूवेति लिङ्संगतिः स्यात् यद्वा सर्गचतुष्टयमाद्यमुपोद्घातरूपकस्यचित्कविषयस्य वाल्मीकीयोपोद्घातत्वाद्व वाल्मीकिवियोक्तिः।

तस्येत्थंब्रुवतश्चिंताबभूवहृदिवीक्षतः शोकार्तेनास्यशकुनेः किमिदंव्याहृतंमया ।६ चिंतयन्सम
हाप्राज्ञश्चकारमतिमान्मतिं शिष्यंचैवाब्रवीद्वाक्यमिदंसमुनिपुंगवः ।७ पादबद्धोक्षरसमस्तंत्री
लयसमन्वितः शोकार्तस्यप्रवृत्तोमेश्लोकोभवतुनान्यथा ।८

पारोहणमारोपणस्थंयमपितथोक्तिरूपोपोद्घातत्व
ध्यानन्नायेत्यस्य ।६ चिंतयन्निति महद्यशस्करमिदं कर्म हृतमिति चिंतयन् स तत्संकल्पनयाऽस्यं गतिं संकल्पं चकार तदभिलापकंच
दैवात्कश्चिच्छिष्यमब्रवीदिति संबंधः ।७ पादेति सुप्तावरबद्धपादैर्बद्धः अक्षरसमः छंदःशास्त्रोक्ताक्षरसंख्याविषमरहितः तथा तंत्री वीणा ल
यस्तालस्तद्गवेणहस्ताभिनयानां समकाले विरामसाम्यांप्युक्तः तेन्यामारोपणवाक्यैः सहगानयोग्य इतियावत् अतः शोकार्तस्य प्रवृत्त घाऽ
नोचित्येन वृत्तेनापि मे मम श्लोको यशोरूपो भवतु अन्यथाऽयशोरूपो मा भूदित्यर्थः अत्र भवत्विति पादपद्ववद्वरूपश्लोकसंमतस्तीर्थसंमत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 45
रा.बा.
बा.टी.
२३

शिष्य इति एवं ब्रुवतस्तस्य महर्षेर्वाक्यं शुश्रोभवतित्येवंरूपं स्पष्टः सन् तत्थैवेदं यशोरूपमेवेदमित्युनमोदनेन प्रतिजग्राह संगीचकार तस्माद्गुरो।
देनेनगुरुस्तस्य शिष्यस्य रूपेपि प्रसन्न तुष्टोभवदित्यर्थः १९ स इति अभिषेकमिति मध्याह्नकर्मणोनुष्ठानोपलक्षणं तमेवार्थं श्रवणानःस्माश।
कारस्मोकोत्पत्तिरूपं उपावर्तत न्यवर्तत २० श्रुतवान्बहुश्रुतः पृष्ठतः पृष्ठभागेन प्रसारितकरोपरिस्थापितकलशमादाय गुरुपश्चाज्ज।

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमं प्रतिजग्राह संहृष्टस्तस्य तुष्टोभवन्मुनिः १९ सोभिषेकं ततः कृ
त्वा तीर्थे तस्मिन्यथाविधि तमेव चिंतयन्नर्थमुपावर्तत वै मुनिः २० भरद्वाजस्ततः शिष्यो विनीत
तः श्रुतवान्गुरोः कलशं पूर्णमादाय पृष्ठतोनुजगाम ह २१ स प्रविश्याश्रमपदं शिष्येण सह धर्म
वित् उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः २२

गामेत्यन्वयः २१ स इति प्रवेशानन्तरं कथाश्चकार स्वसमातृशापार्थकश्लोकविषयं ध्यानमास्थितः यत्तध्यानमेवानयागायज्ञा
श्लोकमेव रुद्रदशायान्येन ध्यानमास्थितः इत्यर्थः इतिन त्रप्रदास्थितोन्याः कथाश्चकारेत्यस्यासंगेरित्यलं ध्यानपदार्थानामभिसंहृष्णा

२३ ॥

46 अथतच्चिंतानिवर्तयितृब्रह्मागमनमाह आजगामेतिस्वयंप्रभुः अनन्यसाधनविनिरीहकत्तयासर्वलोकस्रष्टृपयोगितानैश्वर्यादिशक्तिमान्।
अतएवभूरादिलोकनिर्माता तथापद्माकोत्सारणवशादतिचिंताक्रांतं २३ वाग्यतः अतिसंभ्रमवशाद्यतवाक्प्रयतोनितरांनम्रः २४ पूजया
मानयेति वंदनस्तुतिःप्रणम्येतिप्रश्नगर्भः पाद्येमितापुनरान्वयि २५ पद्मंमनिवृत्तायनामयं आमयःपीडातद्रहितंखयपद्मीनमितियवत्

आजगामततोब्रह्मालोककर्त्तास्वयंप्रभुः चतुर्मुखोमहातेजाद्रष्टुंतंमुनिपुंगवं २३
वाल्मीकिरथतंदृष्ट्वासहसोत्थायवाग्यतः प्रांजलिःप्रयतोभूत्वातस्थौपरमवि।
स्मितः पूजयामासतंदेवंपाद्यार्घ्यासनवंदनैः प्रणम्यविधिवच्चैनंपृष्ट्वाचैवनि
रामयं २५ अथोपविश्यभगवानासनेपरमार्चिते वाल्मीकयेचऋ
षये संदिदेशासनंततः २६

तप इतिशेषः ततःस्रष्टाग्रनंतरंस्वयमासनेउपविश्य ऋषयेआसनंसंदिदेशआसने उपविष्टमनुमेनेइत्यर्थः वाल्मीकयेचऋषयइतिपाठः
एतेनब्राह्मणाउशनंदृष्ट्वोत्थानंवंदनमनामयमित्युक्तेःब्राह्मणस्यपंप्रश्नः स्मार्ताचारविरुद्धः तदेवमित्यनेनैवसिद्धयतमित्यस्यैवैयथा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 47 लोकपितामहे भाविष्टेसतितदनंतरतपास्वयमप्याविशदितिसंबंधः २७ तद्गतेनकौंचगतेनवैरंगदृणाति साचासौप्तद्विस्तडता कतीरिलड

रा॰बा॰ वाऽल्पकात् विषादेनेनिशेषः कष्टंहननंक्रौंचवधरूपंतयोनाशासंपादकशापवृत्तिःस्मारणेनकष्टकृतंममेतिशेषः २८ कष्टमेवाह।

बा॰टी॰ पद्मति हत्यान् हतवानित्यर्थःक्रौंचदसंबंधकारणात्तदृशपमानकारणंविनाऽपसमीपेब्रह्मणःसमीपे २९ शोकपरायणःक्रौंचवधत

२५

ब्रह्मणसमनुज्ञातःसोऽप्याविशदासने उपविष्टेतदातस्मिन्साक्षाल्लोकपितामहे २७ तद्गतेनैव

मनसावाल्मीकिर्ध्यानमास्थितः पापात्मनाकृतंकष्टंवैरग्रहणबुद्धिना २८ यस्तादृशंचारुरवंक्रौं

चंहन्यादकारणात् शोचन्नेवपुनःक्रौंचीमुपश्लोकमिमंजगौ २९ पुनरंतर्गतमनाभूत्वाशोकपरा

यणः तमथचतनोब्रह्माप्रहसन्मुनिपुंगवम् ३० ॥

तत्क्रौंचीजःरवदर्शनजेनस्वस्यस्वत्वतस्तपोहानिकरशापार्थकस्पावृशंनोतिःपरागजेनचशोकेनव्याप्तःअतएवांतर्गतमनाअं

तर्गतस्मेकार्थएवदतविनःश्लोकंजगाविति संबंधःततथाशोकग्रस्तहृमनमदिव्केयावतीर्णसरस्वतीनजातीतिसंहृवेत् ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

48 तद्वचनमेवाह श्लोकद्वयात्मकमिति ग्रंथं त्वयावद्धः श्लोको यशोरूपप्रवाहप्रवाहात्मश्लोकशब्दस्य पद्य पर्यायो जनेस्त्विति पाठस्य संगतताश्चेतः श्री
स्लोकेरेव ब्रह्मणः श्रोविततात् ममतद्यशोरूपस्य यशोरूपतापोदीनमिति नास्ति संगतिः श्लोकप्रवर्तयेति पाठेति यशोरूपप्रवाहयत्वयावद्धोज्ञत
वविचारः संदेहोमास्त मद्वचनात्त संकल्पाद्वा सतथाभावशमेरित्याशयः ननु भवत्त तदाशिषा तथात्वमस्तु परं तेषां नस्वभावस्य च्छेदसर
णीवागत्यतमनु चिंते त्वयि मा विषादं कुर्वित्याह मच्छंदादित्यादि मत्संकल्पादित्यर्थः विस्तरवतारम्भ मत्स्य संकल्पापि स्वसंकल्पवेनोक्तः एक

श्लोकद्वयात्मकं ग्रंथं बद्धोनात्र कार्याविचारणा मच्छंदादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ३१

मूर्तिस्तवेयं देवान्स्तुविस्तपिनामहाइत्तिवंशो।   क्तः नवीर्हस्यशंकल्पोब्रह्मणोपि किमर्थम् इति चेत् शृणु ग्रंथोप
रस्पदारविवियोगादिजनक कर्मस्वसदारविवियोगादिकं जनयितुं मालंतेषामपि ब्रह्मशापस्तज्जनने स्त्यमिति लोके ब्राह्मणमाहात्म्यख्य
यितुं एवं राज्यादि सर्वे पि कामजयप्रवाहमोनतद्यतदोगवापत्तमिति च स्वयं वहारेणशिक्षयितुं नस्यायश्चिन्तविषयस्य कीर्तिवर्णनेन
सूतेर्यशोरूपार्थं भगवद्विषयमहापापप्रायश्चित्तत्वात् केवलतिकन्यायेने नरजन्मानां सर्वपापप्रायश्चित्तं रामायणाख्यं वर्णदीत्य
र्थं वो ध्ययित्वं चेति गद्दाणपनत्वष्यस्तरस्यारसवलेन मयायोजितमतो निःसीधं सत्सदयाविचारयन्न ३१ ॥ ॐ ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ ५१
रा॰बा॰
बा॰टी॰
२५

एवंप्रकारस्य हत्तस्यापि प्रागयस्य भगवद्धि मनसेप्येन रसकलमन्वायुक्तप्राय क्षिन्नानिवर्तस्य यं प्रज्ञाननौ शापत्तत्र्वरित वर्णिन सूपेप्रायश्चित्तमस्या
दृत्ताविरामस्य चरितमिति लोके रामस्य रमते इतिरामः वाऊलकात्कर्तरि युजनेनलोकात्पियुणामलोकातर्षा मिश्रणाक्षेत्रयः कुरुत्व
मिपश्चधर्मात्मन इत्यनेन रावणादिवधवनेकौंचवधोपि धर्मफलक एव लोकव्यवहारेण लोकहितमावद्ध्यकमात्रेतिसूचितं २ २

रामस्य चरितं कृत्स्नं कुरुत्वमृषिसत्तम धर्मात्मनो गुणवतो लोके रामस्य धीमतः ३२ वृत्तं कथय धीरा
रस्य यथा ते नारदाच्छ्रुतं रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ३३ रामस्य सहसौमित्रे राक्षसानां
च सर्वशः वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ३४ तच्चाप्यविदितं सर्वं विदितं ते भविष्यति
न ते वागनृता काव्ये काचिदत्र भविष्यति ३५ कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमां यावत्स्थास्य
न्ति गिरयः सरितश्च महीतले ३६

वृत्तमिति अस्य नारदोक्तविशेषण त्वदपौन — कृत्स्नं धियतीरयमीरयतीति धीरः तेन बहिश्रेर
कत्से न्यर्थः तेन गायत्र्या भूतस्य वृत्तं रामलक्ष्मणयो राक्षसानां सीतायाश्च यत्प्रकाशं तदीयानां प्रकाशनक विदितं यदि वा यद्रूपि
तदीयानामपि रहः अविदितं तदपि सर्वं ते विदितं तदपि सर्वं ते विदितं भविष्यति अनेन तत्करणयोग्यतादानं तच्च मानिषादेति वृत्तप
द्यालोच्यापि वाक्यज्ञोनि सरिष्यति सापि नामाया भविष्यतीति नास्या अपि सत्यत्वं भावीति ध्वनितं ३ एवं सामर्थ्यादनोपसंहरति कु

२

॥ ॐ श्रीरामचन्द्राय नमः २५

50 तावदिति यावत्तत्कृतकथाप्रचारस्तावदस्थस्थानं स्थायस्वंमपि कोऽथ कारणात् अधोगमनयोग्योऽपि त्वं ऊर्ध्ववर्तमानेषु मल्लोकेषु निवत्स्यसि अध्य
ति नाकोऽमया सह सोऽस्यामीति तीर्थः लोके षिनितत्वयमभिप्रायं बहुवचनेन ऊर्ध्वमधश्च विद्यमानेषु मल्लोकेषु सत्रिर्मितलोकेष्वपि निवत्स्यसि सर्वत्राप्रति
हतगतिः संचरिष्यसीति ततः परं मुक्तिं प्राप्स्यसीति तात्पर्यः तत्र मल्लोकेष्वपि सञ्चारित्वं ध्वनितं इतीति तत्रैवान्तरधानेनाप्याप्तनपासिरूपेणोक्ता ३८
तदिति विस्मयं आश्चर्यं तस्येति प्रीयमाणाः आश्चर्यमिदमसकृदिति पर्यन्ते हृष्यन्तोऽपि नमोऽदितप्राहुश्च वक्ष्यमाणमित्यर्थः ३९ तदेवाह समेति

तावद्रामायणकथा लोकेषु प्रचरिष्यति यावद्रामस्य च कथा त्वत्कृता प्रचरिष्यति ३७ तावदूर्ध्वम
धश्च त्वं मल्लोकेषु निवत्स्यसि इत्युक्त्वा भगवान्ब्रह्मा तत्रैवान्तरधीयत ३८ ततः सशिष्यो भगवान्मुनि
र्विस्मयमाययौ तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ३९ मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृश
विस्मिता समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः ४०

समाक्षरैश्चतुर्भिरित्यादि यः अनुवंशागीतः सः प्रत्युत्तिशापेन शोकोत्पादनं तदनुव्याहरणादनुभूयः शोकः विप्रतः शोकपद श्लोकत्वं प्राप्त इति व
गेमन्या महेशतिसंबंधः इत्येतावेयं तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितः अनुत्तरश्च क्रौंचो वालेवनकः क्रौंची विरावानुदीपितो निदविषपक्षोऽयम्
भिचारिकोमानिषादेत्यादिवाक्यानुभावकः करुणो रस इति बोध्यं यत्र एवं श्लोके प्राहुः इत्यस्य पदतीनुपकरणां पुनः पादेनानेदवेतोऽभू
वत्रिति फलितार्थकथनं अत्र वश्लोके भूयोऽनुव्याहरणान्मुहुर्मुहुः शिष्यैः पुनः पाठात् लोके शोकः श्लोकत्वेन प्रतिबद्धोऽभवत् श्लोकत्वमाप्त

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ओं 51
रा.वा.
बा.टी.
२९

मस्यैति ईदृशो मत्तिषादेति वल्करुणरसप्रधानेरित्यर्थः अनेनवान्ये रसास्त्वङ्गभूता इति ध्वनितं ५१ उदारेति उदारस्य यद्वत्तं च
रितं उदारस्वायत्तचरितं तदनुरूपार्थबोधकैः पदैः मनोरमैः श्रुतिकटुत्वादिदोषरहितैः अस्य यशस्विनो रामस्य दृष्टं रामस्य नारदोपदिष्ट
श्लोकशतैरिति शतशब्दोऽनंतवाची ५२ एवं काव्यनिर्माणमुक्त्वा तच्च श्रोतृन् अभिमुखीकरोति तदिति समासः नञ्स्नुरुषादिः
संधिरेकादेशादिर्योगः प्रकृतिप्रत्ययोः एते उपगता यस्मिन् व्याकरणालंकारशास्त्रमर्यादा अस्मिन् काव्ये ताद्दृशं काव्यं रघुवरचरितं तत्
हणितं तद्रूप समः एतन्मकषादिदोषरहितो मधुरः करुणरसमुक्तत्वेन माधुर्यगुणप्रधानः उपनतः प्रसन्नतनतपोः ध्यस्तदोषकवा।

तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् ५१ उदारवृत्ता
र्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान् समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं का
व्यमुदारदर्शनः ५२ तदुपगतसमाससंधियोगं सममधुरोपनतार्थवाक्यबद्धम् रघुवरचरितं
मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ५३

कैर्निबद्धं उपनतत्वेन समासरगु एवंनादर्शितानमुदापेनवैदर्भीरी
तिमत्त्वं ध्वनितं रघेगत्याथी त्रिषत्तरत्तुवरशब्देन तस्य सर्वोत्तमथमित्वं ध्वनितं अहशस्यापि मिथ्यार्थकत्वे उपादेयत्वं स्यादतस्त्राहृहेति
प्रणितं वाल्मीकिप्रभृतिशमसत्यवाग्महर्षिप्रणीतं ऋषार्थस्वर्गमोक्षादिसाधनत्वं रघुवरचरितमिममेनोक्तमेव दशशिरसश्च वधमित्यनेन
नतं दत्तमिदं श्रोतव्यमिति सूचितं तेन वक्ष्यचितफललाभात् उत्तरकाण्डेतस्यैव लभारतस्य हरिवंशवत् अनेनवाग्निसर्गवर्णेवा
तस्य ककरणपर्यंतस्य त्यागेष्वेणमेनसमाधिना व्यवस्थितीतिप्राचः परेत्तदशशिरसो वधं चेमन्वयः चेनसीतात्यागादिरूपोत्तरकाण्डी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीरामायणतिलकेवालकांडेद्वितीयःसर्गः २ अथेतिहासरूपात्कथाविषयंरामचरितरूपंवस्तुश्रुत्वासमग्रंप्रकाशरहस्यसहितंकृविंतिवचलम्
त्वाच्छतानस्यधीमतोरामस्ययद्वृत्तंचरितंसरहःप्रकाशंतत्भूयःपुनःव्यक्तंसाक्षात्कारविषयोयथाभवतितथाकर्तुंमन्वेषतेउंभक्तेस्मेतिशेषः ध
र्मार्थेतित्रिवर्गोपलक्षणंफलतेनतत्सहितं हितंमोक्षफलं १ उपयोगमेवाउपेपिप्राचम्येत्यर्थः सम्यक् स्पृस्तुकाचमनरीत्याइत्थमन्वेषणमपिप्राय

इत्यार्षेरामायणेवालकांडेद्वितीयःसर्गः २ श्रुत्वावस्तुसमग्रंतद्धर्मार्थसहितंहितं व्यक्तमन्वेषतेभूयो
यद्वृत्तंतस्यधीमतः १ उपस्पृश्योदकंसम्यङ्मुनिःस्थित्वाकृतांजलिः प्राचीनाग्रेषुदर्भेषुधर्मेणान्वेषतेग
तिं २ रामलक्ष्मणसीताभीराज्ञादशरथेनच सभार्येणसराष्ट्रेणयत्प्राप्तंतत्रतत्वतः ३ हसितंभा
षितंचैवगतिर्यावच्चचेष्टितं तत्सर्वंधर्मवीर्येणयथावत्संप्रपश्यति ४

स्यसंपादकानामपत्तत्वांप्रागग्रेषुदर्भेषुस्थित्वा धर्मेणयोगजनेनबलप्रसादरूपेणचगतिंरामादीनांचरितरूपांमन्वेषजेप्रतिपत्तेनपश्यति
स्म २ रामेत्यादिश्लोकद्वयमेकंवाक्यं भार्याःकौसल्याद्यायाः तत्सहितेनरामादिभिःप्राप्तंयत्प्राप्तंसंवद्धंचरितंराजपालनादिरूपंहसितादि
पंचतत्सर्वंतत्वसमाहितततः धर्मवीर्येणयोगजबलेनपश्यतिस्म ३ ४

रा.बा. बा.टी. २ 53

अयोध्यावासकालिकं वृत्तं निरीक्षितवतस्तदनन्तरं वनकालिकं च निरीक्षितमित्याह स्त्रीतृतीयेनेति द्वितीयो लक्ष्मणः तत्सर्वं चेति चस्य ततउत्तरका
लिकमुत्तरकाण्डस्थं चेत्यर्थ इत्यपरे ५ तेनेदं दर्शनं सम्भवदित्याह तत इति पूर्वाचरितयोगाभ्यासादित्यर्थः योगं समास्थितस्तत्र समाधावुपलभ्य
तिपश्यत्तीत्यर्थः यन्निर्वृत्तं जातं इदमुपलक्षणं पञ्चभाविनः वृत्तस्यापि पश्यति स्मेति यावत् ६ तदिति धर्मेण योगजेन ज्ञानेन स महामतिः तत्स

स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने सत्यसंधेन रामेण तत्सर्वं चान्ववेक्षत ५ ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ६ तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महामतिः अभिरामस्य रामस्य तत्सर्वं कर्तुमुद्यतः ७ कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरं । समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरं ८ स यथाकथितं पूर्वं नारदेन महात्मना रघुवंशस्य चरितं चकार भगवान्मुनिः ९ ॥

र्वं मत्वा तन्मतानुगतं वक्तुमिष्टं काव्यं अभिरामस्येत्यनेन तादृशकाव्यकरणस्य रागप्राप्तत्वमुक्तं का
मेति काम्यरूपार्थः पुरुषार्थस्तद्रूपेण गुणेन फलेन युक्तं धर्मार्थेति पुरुषार्थफलेन विस्तरवत् विस्तरेण उभयप्रतिपादकं तद्वान्त
वेत्यर्थः इत्यनेन काव्यगुणालंकाराद्युपेतत्वमुक्तं सर्वश्रुतीनां मनोभूता उपनिषदस्तासां हृद्यं तदर्थप्रतिपादकं तेन मोक्षफलकत्वमु
ख्यातं तांतरस्य चमत्कारित्वं प्रतिपादितं ८ स इति रघुवंशस्य तद्वंश्यावतीर्णरामस्य नारदकथनक्रमेण वृत्तचरितेन तत्प्रतिपादकं काव्यं चका।

७ २

54 विस्तरेणावर्णनीयानंतगुणान्द्दष्टं हि विदुषां लोके समासव्यासधारणामित्युक्तेः समासेन संक्षेपेणाह जन्मेत्यादिना बालस्वयमनुतनस्यपरा
भिभवसामर्थ्यं सर्वानुकूलतां सर्वेषामनुवर्तनरूपां प्रियतां विशेषासह्यतपर्यवसायिनीं वस्तुसौंदर्यबलाभ्यामनिवर्त्यां विषयाभावा
मपि दोषाणामदर्शनकरीं व्यसनसहस्रसंपातेष्वनिवर्त्यां प्रागनुपस्कृतवस्तुमात्रालंबिनीं स्वच्छप्रेमपदवाच्यां नंदिषयतां एवं भगवति
रामे मायापाशवत्तेजातप्रेमविच्छेदविषयं प्रेमोत्पादयितृ दिशरथनंदनरामस्य जनककृतानपर्यवसायीति बोध्यं त्वांतिश्चमानोपि परुषं नोत्र

जन्मरामस्यसुमहद्वीर्यं सर्वानुकूलतां लोकस्यप्रियतांक्षांतिंसौम्यतांसत्यशीलतां १० नाना
चित्राःकथाश्चान्याविश्वामित्रसहायने जानक्याश्चविवाहंचधनुषश्चविभेदनं ११ रामरामवि
वादंचगुणान्दाशरथेस्तथा तथाभिषेकंरामस्यकैकेय्यादुष्टभावना १२ विघातंचाभिषेकस्यरा
मस्यचविवासनं राज्ञःशोकंविलापंचपरलोकस्यचाश्रयत् १३

रंशक्तिप्रधेनेश्वरत्वरूपां सौम्यतां अक्रूरदर्शनतां १० नानेति विश्वामित्रसहायने विश्वामित्रेण सहगमने तदुपस्थितिकाले सभापांमार्गे गमन
नकाले चित्रा नानाकथा योगवासिष्ठोक्ताः बलातिबलेति पाठे काः कथाः अत्र ग्रंथे उक्ता गंगादिकथाः श्रुत्यर्थः एतेनानेकचित्रार्थमाइतिचत्वार्यपि पाठाः स्युः
जानक्याश्चेति चेतोर्मिलादिसंग्रहः ११ रामेति द्वितीयः परशुरामः गुणान् विनयवत्तयनृपान् १२ विघातं चेति विवासनं वने प्रतिप्रस्था
पनं परलोकस्य चाश्रयं परलोकगमनं मरणमिति यावत् १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रकृतीनामिति प्रकृतीनां वंचनापूर्वकविसर्जनमयोध्यांप्रतिपरावर्तनं निषादाधिपो गुहः सूतः सुमंत्रः २५ गंगाया इति भरद्वाजानुज्ञानं संमतिः
वास्त्विति वास्तुनकर्मचित्रकूटे गृहनिर्माणं निवेशं तत्र गृहेवस्थानं प्रसादनमयनकर्तृकं २६ पादुकेति श्रेष्ठपादुकयोः भरतकर्तृकाभि

प्रकृतीनां विषादं च प्रकृतीनां विसर्जनं निषादाधिपसंवादं सूतोपावर्तनं तथा २५ गंगायाश्चापि
संतारं भरद्वाजस्य दर्शनं भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनं वास्तुकर्मनिवेशं च भरतागम
नं तथा प्रसादनं च रामस्य पितुश्च सलिलाक्रियां २६ पादुकाग्र्याभिषेकं च नंदिग्रामनिवासनं दंड
कारण्यगमनं विराधस्य वधं तथा दर्शनं शरभंगस्य सुतीक्ष्णेन समागमं अनसूयासमास्यां च अं
गरागस्य चार्पणं २८ दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा शूर्पणख्याश्च संवादं विरूपकरणं त
था वधं खरत्रिशिरसोरुत्थानं रावणस्य च मारीचस्य वधं चैव वैदेह्या हरणं तथा २९ राघवस्य वि
लापं च गृध्रराजनिवर्हणं कबंधदर्शनं चैव पंपायाश्चापि दर्शनम् ३१

भिषेकं नंदिग्रामस्य तिनरं ग्रतिशाये
न्वासनं भरतेन तत्र गते सर्व प्रजाः तत्रैव वासं कृतवन्त इत्यर्थः २७ दर्शनमिति अनसूयासमास्यां अनसूयया सह सीतायाः समास्यास
हासनं यद्य येन तत् विराधवधानन्तरमेव तथापि क्रमेण नान्यर्थीभावाद्धान्यपेनाभियानं अंगरागः चंदनादि २८ दर्शनमिति अगस्त्यस

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

56 ऋष्येतिप्रत्ययोत्पादनेनशालभेदादिभिः सुग्रीवस्यविश्वासजनने विग्रहंयुद्धं २२ वालीतिसुग्रीवप्रतिपादने सुग्रीवस्याभिस्थापनंसमये·
प्रदियाज्ञाकर्नेचेति रामसुग्रीवयोःसंकेतः वर्षेतिवर्षाकालिकवासांगीकरणं २४ कोपमितिउपसंग्रहंवानराणांमेलनंपृथिव्याश्च

शवरीदर्शनंचैवफलमूलाशनंतथा प्रलापंचैवपंपायांहनुमद्दर्शनंतथा २१ ऋष्यमूकस्यगमनंसु।
ग्रीवेणसमागमं प्रत्ययोत्पादनंसख्यंवालिसुग्रीवविग्रहं २२ वालिप्रमथनंचैवसुग्रीवप्रतिपादनं
ताराविलापसमयंवर्षरात्रनिवासनं २४ कोपंराघवसिंहस्यबलानामुपसंग्रहं दिशःप्रस्थापनंचै
वपृथि———वेदनं २५ अंगुलीयकदानंचऋक्षस्यबिलदर्शनं प्रायोपवेशनंचैवसंपातेश्चापिदर्श
नं २६ पर्वतारोहणंचापिसागरस्यापिलंघनं समुद्रवचनाच्चैवमैनाकस्यचदर्शनं २७ राक्षसीतर्ज
नंचैवछायाग्राहस्यदर्शनं सिंहिकायाश्चनिधनंलंकामलयदर्शनं २८ रात्रौलंकाप्रवेशंचएक।
स्यापिविचिंतनं आपानभूमिगमनमवरोधस्यदर्शनं २९ दर्शनंरावणस्यापिपुष्पकस्यचदर्शनं
अशोकवनिकायानंसीतायाश्चापिदर्शनं ३० अभिज्ञानप्रदानंचसीतायाश्चापिभाषणं राक्ष।
सीतर्जनंचैवत्रिजटास्वप्नदर्शनं मणिप्रदानंसीतायावृक्षभंगंतथैवच राक्षसीविद्रवंचैवकिंकरा।

निवेदनं सुग्रीववानरान्प्रतिपृथ्वीसंस्थाकथनं २५ अंगुलीयकदानेरामकर्तृकं हनुमतिप्रायोपवेशनं प्रायेनअनशनेनवानराणां
उपवेशनंसमुद्रसमीपेवासः २६ एकस्यापिविचिंतनं असहायस्यकर्तव्यविचारः चेसर्थः अवरोधान्तःपुर २९ यानगमनं ३०

रावणस्यदर्शनं ३६

अभिज्ञानंप्रदानंगुलीयकं ३३

ॐ 57
रा॰बा॰
बा॰टी॰
२१

ग्रहणमिति लंकाया दाहेन तत्रत्यानामाकंपनं लंकादहे हनुमद्गर्जनमित्यर्थो वा प्रमिमर्दनमिति पाठे लंकावासिनां दाहेन प्रमितो मर्दनमित्यर्थः प्रतिप्लवनं पुनः सागरोत्तरणं २३ मणिनिर्यातनं सीतया दत्तस्य शिरोरत्नस्य राघवे दानं नलसेतुः नलनिर्मितसेतुः २४

ग्रहणं वायुसूनोश्च लंकादाहाभिगर्जनं प्रतिप्लवनमेवाथ मधूनां हरणं तथा २३ राघवाश्वासनं चैव मणिनिर्यातनं तथा संगमं च समुद्रेण नलसेतोश्च बंधनं २४ प्रतारं च समुद्रस्य रात्रौ लंकावरोधनं विभीषणेन संसर्गं वधोपायनिवेदनं २५ कुंभकर्णस्य निधनं मेघनादनिबर्हणं रावणस्य विनाशं च सीतावाप्तिमरेः पुरे २६ विभीषणाभिषेकं च पुष्पकस्य च दर्शनं अयोध्यायाश्च गमनं भरद्वाजसमागमं २६ प्रेषणं वायुपुत्रस्य भरतेन समागमं २७ रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनं स्वराष्ट्ररंजनं चैव वैदेह्याश्च विसर्जनं २८

प्रतारं सेनाया इति शेषः २५ निबर्हणं मारणं अरेः रावणस्य २६ अयोध्यायाश्च गमनं नडद्देपर्कगमनं २७ रामाभिषेकाभ्युदयं रामाभिषेकोत्सवं सर्वत्र चकारस्त्वनुकर्षणे २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

58 अनागतं चेति यत्किंचिदित्यनेन सीताविसर्जनात्पूर्वकालिकस्य भूयस्त्वमनंतरकालस्य अल्पता द्योत्यते तत्सर्वं मंत्रैः सर्वतो विशिष्टं
काव्यं चकार निबबंधेत्यर्थः ३९ इति श्रीरामायणतिलके बालकांडे तृतीयः सर्गः ३ प्राप्तेति अनेन रावणवधोत्तरमेतत्काव्यकरणमिति सू
चितं वाल्मीकिः तद्विषयवासी ऋषिरिमर्यादत्वगंतव्यं चरितं तत्संनिककाव्यं अर्थवत् धर्मालंकारादिप्रशस्तार्थं आत्मवानिति पाठे
अवहिताऽन्तःकरणः प्रशस्तमत्वर्थ आत्मशब्दोऽन्तःकरणवाची चतुर्विंशदिति चतुर्विंशतिरित्यर्थः छांदसः शतानीति पुल्लिंगोऽप्येवं त
था पंचशतत्वं सर्गसंख्या षट्कांडानामेव श्लोकसंख्यात्वेऽप्रमाणमित्याहुः कतककृतस्तु उक्तसंख्यापेक्षया षट्त्रिंशत्सर्गसंख्याधिक्य
दर्शनात् चतुर्विंशत्सहस्रापेक्षया श्लोकसंख्याया अपि आधिक्यदर्शनाच्च उत्तरकांडे यसर्गसंख्योक्तस्य प्रदिमोयश्लोकानन्त्वाषश्रमा

इत्यार्षे रामायणे बालकांडे तृतीयः सर्गः ३ प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः चकार चरि
तं कृत्स्नं विचित्रपदमर्थवत् १ चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः तथा सर्गशतान्पंच ष
ट्कांडानि तथोत्तरं २ कृत्वा तु तन्महाप्राज्ञः सभविष्यं सहोत्तरं चिंतयामास कोन्वेतत्प्रयुंजीया
दिति प्रभुः ३ तस्य चिंतयमानस्य महर्षेर्भावितात्मनः अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ४

कृः २ कृत्वा तु इति सहप्राज्ञः सहितपदः भविष्यणसहसहितं विशिष्टं यदुत्तरं तेन सहितमिदं काव्यं उत्तरनियोगात्तत्प्रसादाच्च कृत्वा कोन्वप्रभुः
समर्थः एतत्प्रयुंजीयात्सभासु पठनश्रावणेन सम्यगिति चिंतयामास सहोत्तरमित्यत्रोत्तरपदार्थस्य सभविष्यमिति सविशेषणत्वेनाधः
समासः भविष्यं च सीताविसर्जनमारभ्य ससैन्य तस्याः भूप्रवेशांतरकालिकमिति परे प्रयुंजीयादिति छांदसं ३ तस्येति भावितात्मनः रामच
रितवर्णनेन शुद्धचित्तस्य अगृह्णीतामिति छांदसं आवांगाताराविति काव्यपादग्रहणं कृतवंतौ मुनिवेषौ राजकुमारौ व्याश्रमस्थितिवशान्मुघ्नाभू

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 59
रा॰वा॰
बा॰टी॰
३॰

कुशीति ददर्शेकाववत्रहूलोयोग्पतयाः पश्पदित्यर्थः ५ ततिति धीर्धीरणावतीमेधा परिनिष्ठितौ ज्ञातावेधाध्ययनौ उपबृंहणंवेदस्यतत्तदर्थे
तात्पर्यग्रहणं तद्रूपाणार्थाय प्रयोजनाय ग्रनेनकृतितात्पर्यविषयीभूतार्थप्रतिपादकतया प्रमाणमसोपादेयत्वंचसूचितं ६ काव्यमितिरा
मस्यायनेन स्वतिपादकं तथा सीताचरितप्रतिपादकंचमहत्काव्यं पौलस्त्यवधमित्येवनामकंचकारः तन्नाव ग्राहयेत्निष्टेवेणसंबंधः

कुशीलवौतुधर्मज्ञौराजपुत्रौयशस्विनौ भ्रातरौस्वरसंपन्नौददर्शाश्रमवासिनौ ५ सतुमेधावि
नौदृष्ट्वावेदेषुपरिनिष्ठितौ वेदोपबृंहणार्थायतावग्राहयतप्रभुः ६ काव्यंरामायणंकृत्स्नं।
सीतायाश्चरितंमहत् पौलस्त्यवधमित्येवंचकारचरितव्रत ७ पाठ्येगेयेचमधुरंप्रमाणैस्त्रिभिर
न्वितं जातिभिःसप्तभिर्युक्तंतंत्रीलयसमन्वितम् ८

यथाकृतस्वचरितव्रतवर्णानुरूपमाद्यकाव्यस्यपि श्रुपालवधइतिनाम ७ पाठ्ये इति इतः श्लोकचतुष्टयमेकान्वयं पाठ्यगेययोर्भावे एतत् यतो
तेनपाठेगानेचमधुरं गानतंत्रीनाडीसमस्यकृतिभेदोपेतं उभयत्रापि मधुरं श्रोतृस्वादजनकं प्रमाणानि द्रुतमध्यविलंबितानि सप्तजात
यः सप्तस्वराः सप्तस्वरविशिष्टगानानामपीतियावत् ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रसैरिति वीरादीनित्यादिशब्देनाद्भुतशान्तसंग्रहः शृंगारादिरसैर्वीरादिरसैश्च युक्तं नवरसयोगीतियावत् ईदृशं काव्यं तावगायतां ९ तौ विशे षयति तौ त्विति गांधर्वस्य समयस्यैतद्यस्य तत्त्वज्ञौ स्थानं वक्षश्छेदनावनयोः समाहारः स्थानमूर्छनं तत्र कोविदौ तत्त्वज्ञौ यद्वर्थं हृदयग्रंथः कर्मो लपाकादयः प्राणसंचारस्थानस्थामिति अभिधीयते उरः कंठः शिरश्चेति तत्स्थानत्रिविधं भवेत् मंद्रमध्यवतारं चैव विशाडिल्यः तथा पञ्चैव सा मू॰

रसैः शृंगारकरुणहास्यरौद्रभयानकैः वीरादिभी रसैर्युक्तं काव्यमेतदगायतां ९ तौ तु गांधर्वतत्त्व-
ज्ञौ स्थानमूर्छनकोविदौ भ्रातरौ स्वरसंपन्नौ गंधर्वाविव रूपिणौ १० रूपलक्षणसंपन्नौ मधुरस्वर-
भाषिणौ बिंबादिवोत्थितौ बिंबौ रामदेहात्तथापरौ ११ तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमं
वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिंदितौ १२ ऋषीणां च द्विजातीनां साधूनां च समागमे यथोप-
देशं तत्त्वज्ञौ जगतुस्तौ समाहितौ १३

स्वराः मूर्छनाश्चैनाः सेत्सुदाहृतेति च यत्र गीतिविशेषे इत्यर्थः रूपिणौ मूर्त्तरूपवंतौ रूपेति मूर्जद्रूपमवयवसंस्थानं लक्षणं संपन्नावित्यस्यैव विवरणं मधुरस्वरेति बिंबात्मूर्याद्देहात्स्थितौ बिंबौ प्रतिबिंबाविव तथा रामदेहात्प्रतिस्थितौ परौ रामदेहाविवेत्यर्थः ११ ताविति धर्म्यं धर्मादनपेतं वाचोविधेयं विनाप्युक्तकंपाद्ययोग्यं १२ ऋषीणामिति द्विजातीनामिति गोबलीवर्दन्यायेन साधूनां द्विजेतराणामपि यथोपदेशं जगतुः तत्तत्सकाव्यस्य गानादेश्च तत्त्वज्ञौ समाहितौ सावधानौ

गो॰
रा॰बा॰
बा॰टी॰
२१

लक्ष्यलक्षणे निपादेसामुद्रिकविद्भिर्लक्ष्यंपरीक्ष्यंलक्षणंसुलक्षणं तेनलक्षितौ श्रुतौ अतएवमहात्मानौ महाभागौवभाग्यंश्रवणगीयमानमिदं
माख्यानंभवद्भ्यामृषिसंसदि राजर्षीणांपुण्यकृतां साधूनांचसमागमे गुरुणैवमनुशासितौ अश्रूणांमधुरस्वराविति क्वचित्पाठे तदनन्तरमृषी
तिघासदृतमेव भावितात्मनांशुद्धचित्तानां ।१४ मध्येसभमिसभायामध्येसभमित्यव्ययीभावः समीपस्थौ यथाहितौ इत्यर्थः तच्छ्रुत्वेत्यादि ।१५।१६ प्रशस्तव्यौ विनीतौ इमावनेलौ

महात्मानौमहाभागौसर्वलक्षणलक्षितौ तौकदाचित्समेतानामृषीणांभावितात्मनां ।१४ मध्येस
भंसमीपस्थाविदंकाव्यमगायतां तच्छ्रुत्वामुनयःसर्वेबाष्पपर्याकुलेक्षणाः ।१५ साधुसाध्वितिता
वूचुःपरंविस्मयमागताः तेप्रीतमनसःसर्वेमुनयोधर्मवत्सलाः प्रशशंसुःप्रशस्तव्यौगायमा
नौकुशीलवौ अहोगीतस्यमाधुर्यंश्लोकानांचविशेषतः ।१७ चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिवद
र्शितं प्रविश्यताउभौसुष्ठुतथाभावमगायतां ।१८ सहितौमधुरंरक्तंसंपन्नंस्वरसंपदा एवंप्रशस्य
मानौतौतपःश्लाघ्यैर्महर्षिभिः ।१९

पौच्छोदसौ अहो इत्याश्चर्यं ।१७ चरेति प्रत्यक्ष वृत्तमपश्यतसत्वरितं एवंभूतविप्रशंसातदृष्ट्वात्तयोर्गान
माह भावंकाव्याभिप्रायं तत्तद्रसरूपंप्रविश्यतन्मयीभूयसुष्ठुयथाश्रोतृणांरसाविर्भावोभवतितथागायतामित्यर्थः ।१८ सहितावितिमधु
रंप्रादतो गानतत्र रक्तं उच्चैः स्वरसंपदा षड्जादिस्वरसंपन्नं यथाभवतितथाऽगायतामितिपूर्वेणसंबंधः एवंप्रशस्यमानौ हीनौतैस्तपःश्लाघ्यैः ।१९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

62 संरक्ततरमत्युज्ज्वलतरे तथाप्यत्यर्थमधुरं ततोरामायणगानश्रवणानंदपरवशानांमुनीनांचेष्टाआह प्रीतइतिसंस्थितःसमाप्तामितिशेषः २०।२१ वृसी
आर्षीणामासनं २२।२४ स्वस्तीनामाशाशीः २५ आश्चर्यमित्यादिमनोहरमित्यंतमेकंवाक्यं २६ परमिति कवीनामाधारंवाल्मीकीयार्थस्यप्रकारभेदलाभद्वारा

संरक्ततरमत्यर्थंमधुरंतावगायतो प्रीतःकश्चिन्मुनिस्ताभ्यांसंस्थितःकलशंददौ २० प्रसन्नोवल्कलंक
श्चिद्ददौताभ्यांमहायशाः अन्यःकृष्णाजिनमदाद्यज्ञसूत्रंतथापरः २१ कश्चित्कमंडलुंप्रादान्मौंजीमन्यो
महामुनिः वृसीमन्यस्तदाप्रादात्कौपीनमपरोमुनिः २२ ताभ्यांददौतदाहृष्टःकुठारमपरोमुनिः का
षायमपरोवस्त्रंचीरमन्योददौमुनिः २३ जटाबंधनमन्यस्तुकाष्ठरज्जुंमुदान्वितः यज्ञभांडमृषिःकश्चि
त्काष्ठभारंतथापरः २४ औडंबरीं वृसीमन्यःस्वस्तिकेचित्तदावदन् आयुष्यमपरेप्राहुर्मुदायुक्तामहर्षयः
ददुश्चैवंवरान्सर्वेमुनयःसत्यवादिनः आश्चर्यमिदमाख्यानंमुनिनासंप्रकीर्तितम् २६ परंकवीना
माधारंसमाप्तंचयथाक्रमम् अभिगीतमिदंगीतंसर्वगीतिषुकोविदौ आयुष्यंपुष्टिजननंसर्वश्रुतिम
नोहरम् प्रशस्यमानौसर्वत्रकदाचित्तत्रगायकौ २८

दैश्चसर्वगीतिषुकोविदौकुशीलवौ इदं गीतंगानयोग्यंवस्तु अभिगीतंसम्य
गीतंयथाक्रमंसमाप्तंसमापितंचचगीतमितिपाठेप्पन्नवयंयथातथागीतमित्यर्थः २७ आयुष्यंआयुर्जनकंपुष्टिरभ्युदयः सर्वश्रुतिमनोहरंसर्वे
श्रुतीनांमनांसिश्रोत्रपरिषदस्तस्यहरमित्यनेनमोहदं गीतमित्येवसर्वत्रप्रशस्यमानौ तदायोध्यायांरथ्यासुसर्वमार्गेषु रागमार्गेषुचगायमानौ

सौभद्रगीतविरचनागीतप्रकरणवर्णनं २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२९ ३० उपोपविष्टः सचिवैरिति पाठे उपसमीपे उपविष्टाः सचिवा यस्येत्यर्थः उपोपविष्टैः सचिवैरिति पाठे रिति पाठे समीपस्थैर्मन्त्रिभिर्भ्रातृभिश्च समन्वि
तइत्यर्थः आत्मरूपसंपन्नाविति पाठे आत्मसदृशावित्यर्थः दृष्ट्वा तु रूपसंपन्नाविति प्रकृतः पाठः ३१ अनयोः सकाशादेतदाख्यानं श्रूयतामिति लक्ष्मणा
दीनुवाच ३२ विचित्रार्थपदमिति पूर्वान्वयि ततो गायकौ गातुं प्रेरयत् स्वचित्तायतनिस्वनं स्वरस्य श्रोत्रचित्तं समवयन्त्रं तद्रूपश्रावणतः तारः निस्वनो

रथ्यासु राजमार्गेषु ददर्श भरताग्रजः स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ २९ पूजयामास पू
जार्हौ रामः शत्रुनिवर्हणः आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ३० उपोपविष्टैः सचिवैर्भ्रातृभि
श्च समन्वितः दृष्ट्वा तु रूपसंपन्नौ विनीतौ भ्रातरावुभौ ३१ उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा ।
श्रूयतामेतदाख्यानमनयोर्देववर्चसोः ३२ विचित्रार्थपदं सम्यक् गायकौ समचोदयत् तौ चापि म
धुरं रक्तं स्वचित्तायतनिस्वनं ३३ तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायतां ह्लादयत्सर्वगात्राणि मनांसि
हृदयानि च ३४ ॥

नादेय ३३ तत्र आस्वनवत्यावद्रूपं श्रोत्रचित्ताह्लादकं च यथा भवति तथा वदस्वरसमिति फलितं ३३ तन्त्रीलयं तन्त्रीशब्दसदृशं विश्रुतार्थं विशे
षतः श्रुतमर्थो येषां अर्थबोधजनकं यथा भवति तथा अतिशयेनागायतामित्यन्वयः सर्वगात्राणि श्रोत्राणि सर्वगात्राणि ह्लादयत् रोमाञ्चादि
प्रादुर्भावेन आनन्दानुभाव न समर्थानि अकुर्वत मनस आह्लादो नाम निद्रायामिव विस्मृतान्यापारता हृदयानि हृदयमिति हृदयमिस्रुप

३४ निषन्निर्विवनानि हृदयं शत्य गात्मा उपाधिभेदाद्बहुवचनं तत्स
ह्लादो नाम नन्दस्वभावः ३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

64 श्रोत्रंकर्णशष्कुलीतद्वाश्रयंश्रोत्रेंद्रियंतस्यमूले अध्यात्मानस्यश्रवणेप्रयोजनमुपदिशन्नुत्तरपिलक्षणादीनत्यादरेणश्रवणार्थंप्रेरयति इमाविति यतयस्मात
महातपस्विनावाश्रममवासामन्वयोशकौ सद्रूपतस्त्वाराजानुबाहुत्वादिपार्थिवलक्षणान्वितौ श्रुतिशिषत्वाचमुनीहमोप्रबंधस्यगायकौवर्तितेगेयं काव्यंम
हानुभावस्याहार्यालंकारैललितसंदर्भत्वादिवैभवेनसार्वभौमविषयत्वेनचमहावैभवं अतःनिबोधतश्रादरेणश्रृणुत किंच यतःतत्काव्यंतच्छ्रवणंच

श्रोत्राभ्ययमुत्त्वेगेयेतहभीजनसंसदि इमौमनीपा
र्थिवलक्षणान्वितौऊशीवाचेवमहातपस्विनौ ममापित
द्भूतिकरेप्रवहतेमहानुभावंचरितंनिबोधत ३५

ममापिभूतिकरंइहामुत्राभ्युदयकरंप्रवर्तते अनेककल्पजीवनोवृद्धाःपूर्वपूर्वरामायणस्यतेस्तत्फलत्वोक्त्याअस्यापितत्फलकत्वमितिभावइति
शंकः वस्तुतोममवर्तितमस्त्वंबंधितच्चरितंमच्चरितार्थप्रतिपादकंतत्तलोकोत्तरंकाव्यंतिबोधतयतस्तत् श्रोतॄणांभूतिकरमपिभुक्तिमुक्तिदमपि
प्रवर्ततेसर्वत्रश्रवणमात्रेणसर्वगात्राह्लादायमिशब्दार्थाः तत्तत्पदमहानुभावंमहाप्रभावंप्रसलक्षणादीनामेतच्छ्रवणप्रवर्तकार्थकत्वेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 65 ततइति अगायतामिति अगायेतामित्यर्थः रामवचः प्रेरितौ तौ मार्गविधानसंपदा गानं हि द्विविधं मार्गो देशी चेति तत्र शक्तितावलं विगानं देशीसं
वा॰ वा॰ स्कृतावलं वीतं मार्गः तयोर्मुख्ये मार्गाख्यगानमार्गवलेन तत्सामग्र्या अगायतां परिषद्गतः सभागतः स रामोपि नृभूषयाश्रवणेच्छया स्वविरकाले
बा॰ टी॰ स्थितौ च्छयाप्रबंधस्य गीतश्रवणे आसक्तमना बभूव शनैः पदेन उत्तमपुरुषत्वात्तत्प्रशंसार्थके अत्र कार्य्ये पानेः शक्तिरितिध्वनिनेत्यं श्रवणे
२२ वानरानरं लोकानामनुपादेयत्वश्रोत्राश्रवणे प्रवृत्ते तस्य स्थिरत्वं भवतीति तदाशयः स्वप्रवृत्तितक विकृततास्त्वेवमिच्छा भगवत इति वाच्यं इत्य

ततस्तौ तौ रामवचः प्रचोदितावगायतां मार्गविधानसंपदा स चापि रामः परिषद्गतः शनैर्
बुभूषयासक्तमना बभूव ह ३९ इत्यार्षे रामायणे वालकांडे चतुर्थः सर्गः ४ सर्वा
पूर्वमियं येषामासीत्कृत्स्ना वसुंधरा प्रजापतिमुपादाय नृपाणां जयशालिनां ॥

मत्रस्याभ्युदयेच्छयेति व्याख्यानेन तदुक्तं भगवतः स्वाभ्युदयेच्छयावाधात् एतेन रामाकस्यविकृतत्वकाम्यवणमावश्यकमितिसूचितं ३९ अथाधायः
एवं सर्गचतुष्टयेन उपोद्घातं कृत्वा वस्तु निर्दिशति सर्वेति कृत्स्नाइयं वसुंधरा प्रजापतिं देवमनुमुपादाय उपक्रम्य जयशालिनां जयेन शो
भावतां येषां नृपाणां सर्वा पूर्वापूर्वेषां प्राकृताभिषिक्तसर्वा पृथ्वी सा भवति यथाभवति तथा आसीत् सर्वा पूर्वेति शाखेप्यतु पादे पपरो निघनतउक्तःकलिंगइति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

66 किंच येषां वंशे स सगरो नाम अभूत् सागर इत्यादिना समुद्रे सागरशब्दप्रवृत्तिस्तद्धेतुर्येन खनित इति सूचितं षष्टिगुणितानि पुत्रसहस्राणि षष्टिसहस्राणि कवि
न षष्टिरिति पृथक्कृत्य हमावः अनेन तदुद्धारार्थं तद्वंशेन जगत्पावित्रीकरणसमर्थगंगायहशवतारिमेतिविज्ञाप्यते तेनवातिशयितेन हंशमाहात्म्यं
सूचितं तद्वंशस्य गंगापरनामकभगवदवतारयोग्यतावनेन सूचिता २ तेषां इक्ष्वाकूणां वंशे वंशविषये रामायणमिति नाम्ना प्रसिद्धं महदाख्यानम्

येषां स सगरो नाम सागरो येन खानितः षष्टिपुत्रसहस्राणि ये यांतं पर्यवारयन् २ इक्ष्वाकूणामिदं ते
षां राज्ञां वंशे महात्मनां महदुत्पन्नमाख्यानं रामायणमिति श्रुतं ३ तदिदं वर्त्तयिष्यावः सर्वं निखि
लमादितः धर्मकामार्थसहितं श्रोतव्यमनसूयता ४

सन्नमिति शेषः तेषां इक्ष्वाकुपत्येषु इक्ष्वाकुत्वारोपादिक्ष्वाकूणामित्युक्तिः ३ त
दिति तदिदं वर्त्तयिष्यावः आदितः आदिमारभ्य निखिलं उत्तरकांडांतं सर्वं सर्वशब्दोऽवयवकार्त्स्न्ये सर्वावयवकं वर्णपदश्लोकादिरहितमिति
यावत् धर्मकामार्थाः सहिता यस्मात् तत् सहितामृत्यके नेत्याकांक्षायां मोक्षो गम्यते तेन चतुरुषार्थवत्त्वस्य साधनमिति फलितं व
र्तयिष्यावः गास्यावः ततश्च तत् श्रोतव्यं असूयया मत्कृते तस्योतवं अनेन असूयाराहित्यमेव पत्तश्रवणाधिकारिविशेषणमित्युक्तं सर्वे पुरुषा

ॐ स॰वा॰ बा॰टी॰ २५ 67

कोसलइति मुदितः राजभिर्धर्मतः परिपालनात् स्फीतः उत्तरोत्तरं वृद्धिंप्राप्तः सरयूतीरे तदुपलक्षिते देशे निविष्टः स्थितः जनपदो आसीदिति शेषः ५ अयोध्येति तत्र कोसलजनपदे अयोध्या नाम लोकविश्रुता नगरी अस्ति यामानवेंद्रेण मनुना स्वयं निर्मिता आसीत् पुरीसमष्ट्यर्थं नग। ता ६ आयतेति सरयूतीरोपश्लेषेण द्वादशयोजनदीर्घा त्रीणि योजनानीति शेषः विस्तीर्णा तिर्यग्विस्तारवती महापथा बहिर्मार्गः ७ रा।

कोसलोनाममुदितःस्फीतोजनपदोमहान् निविष्टःसरयूतीरेप्रभूतधनधान्यवान् ५ अयोध्या नामनगरीतत्रासील्लोकविश्रुता मनुनामानवेंद्रेणयापुरीनिर्मितास्वयं ६ आयतादशचद्वेच योजनानिमहापुरी श्रीमतीत्रीणिविस्तीर्णासुविभक्तमहापथा ७ राजमार्गेणमहतासुविभक्तेनशोभिता मुक्तपुष्पावकीर्णेनजलसिक्तेननित्यशः ८ तांतुराजादशरथोमहाराष्ट्रविवर्धनः पुरीमावासयामासदिविदेवपतिर्यथा ९ कपाटतोरणवतींसुविभक्तांतरापणां सर्वयंत्रायुधवतीमुषितांसर्वशिल्पिभिः १०

जेति राजमार्गः सर्वमार्गप्रशोभितो राजद्वारान्तरः प्रच्छन्नः मुक्तपुष्पाणि विकसितपुष्पाणि ८ तांत्विति दिवि देवपतिरिंद्रः पुरीं अमरावतीं यथा आवासयामास एवं राजा दशरथस्तां पुरीं आवासयामास पूर्वापि कलोकवसतिमतीं चकार धर्मन्यायबलेन पोषणात् महतो राष्ट्रस्य विशेषेण वर्द्धनकर्ता ९ कपाटेति तोरणं बहिर्द्वारालंकारदारुवं यः सुविभक्तं अंतरं येषां आपणानां तथाभूता आपणा यस्यां सा सर्वयंत्रायुधवती प्राका

२५

68 सूतेति सूताः स्तुतिपाठकाः मागधाः वंशावलीकथकाः अट्टालाः उपरिगृहाः शतघ्नी नाम प्राकारसंरक्षणार्थं अयोमयनिर्मिता प्राकारोपरिस्था
पिता: आयुधविशेषः ॥ वध्विति वधूनां नाटकशालासमुदायैः सर्वर्तुकाः उद्यानानि क्रीडार्थं उपवाटिकाः सालः प्राकारः सालवनं वा स दुर्गे
ति जलदुर्गं गंभीरा अगाधा परिखा यस्यां सा तां अत एव दुर्गामिति रिपुभिः अगम्यां अन्यैः शत्रुभिः दुरासदां प्रशाकच समीपगमनापि वारणाग

सूतमागधसंबाधां श्रीमतीममलप्रभां । अट्टालध्वजवतीं शतघ्नीशतसंकुलां ॥ वधूनाटकसं
घैश्च संयुक्तां सर्वतः शुभां । उद्यानाम्रवणोपेतां महतीं सालमेखलां ।१२ दुर्गगंभीरपरिखां दुर्गामन्यै
र्दुरासदां वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ।१३ सामंतराजसंघैश्च बलिकर्मभिरावृतां ।
नानादेशनिवासैश्च वणिग्भिरुपशोभितां ।१४ प्रासादै रत्नविकृतैः पर्वतैरिव शोभितां कूटागारै
श्च संपूर्णामिंद्रस्येवामरावतीं ।१५ चित्रामष्टापदाकारां वरनारीगणायुतां सर्वरत्नसमाकीर्णां विमा

तां ।१३ सामंतेति समंतात् भवैः राजसमूहैः बलिः करः तद्दानरूपं कर्म येषां तादृशैः ।१४ रत्नविकृतैः रत्ननिर्मितैः पर्वतसदृशैः प्रासादैः शोभि
तां कूटागारैः अगारैः गृहैः स्त्रीणां क्रीडागृहैरिति यावत् कूटाः शालाः अगारं गृहम् इत्यन्ये ।१५ चित्रामिति अष्टापदं सुवर्णं तज्जलेन कृतैः प्राका
रैः अलंकारो यस्याः इत्येके द्यूतफलकाकारामित्यन्ये विमानं गृहं सप्तभूमिगृहं विमानोस्त्री देवयाने सप्तभूमौ च सद्मनीति निचंदः ।१६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री रा. बा. टी. ३५

69

गृहैरिति गृहैः पौरजुष्टैर्विगृहैः गाढां निबिडां अत एव अविच्छिद्रां इक्षुकाण्डरसमानस्वादूदकवतीं १७ भृशं नादितां पृथिव्यां अत्यर्थं अनुत्तमां अनुत्तमामिति बहुव्रीहिः तपसाधिगतं दिवि सिद्धानां विमानमिव पृथिव्यामनुत्तमामिति संबन्धः सुष्ठु निवेशितः वेश्मनामन्तः वासप्रदेशो यस्यां तां १९ ये चेति विविक्तं असहायं सहायरहितं अपरापरं परम्परापित्रादयः तैर्हीनं वंशमेकमेकं तु मिलितं परकीयस्वकीयमिलितं केवलमेकाकिनमित्यर्थः तथा शब्दमात्रानुमितमत एव वेध्ययोग्यं प्रच्छन्नमिति यावत् तथा विततं च विस्तृतं बहुदूरे स्थितं अपक्षान्तेन पलायितेन दूरस्थात् शक्यवेधमपि ये बाणैर्न विध्यन्ति ये च लघुहस्ताः शीघ्रवेधिनः विशारदाः अस्त्रशस्त्रप्रयोगसमर्थाः तेषां सहस्रैः सहस्रैरभिसंवृतत्वेन संबन्धः

गृहगाढामविच्छिद्रां समभूमौ निवेशितां शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकां १७ दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमां १८ विमानमिव सिद्धानां तपसाधिगतं दिवि सुनिवेशितवेश्मान्तां नरोत्तमसमावृतां १९ ये च बाणैर्न विध्यन्ति विविक्तमपरापरं शब्दवेध्यं च विततं लघुहस्ता विशारदाः २० सिंहव्याघ्रवराहाणां मत्तानां नदतां वने हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि २१ ॥

७०

महारथैः आत्मानं सारथिं वास्वानुशिष्य तेयो नरः स महारथः संततः स्यात् एकोदशसहस्रैर्योद्धा वश्या वासयामास तेषामावासेन तैः पूर्णां चकारेत्यर्थः २२ तामिति अग्निमद्भिः आहिताग्निभिः गुणैः शमदमादयः वेदानां षडंगानां च पारगैः महर्षिकल्पैः महर्षिसदृशैः केवलैः नोचेः ऋषिभिर्मंत्रद्रष्टृभिस्त्राहूतां

तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडंगपारगैः सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः २३ इत्यार्षे रामायणे पंचमः सर्गः ५ तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः दीर्घदर्शी महातेजाः पौरजानपदप्रियः १ इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः २ बलवान्निहतामित्रो मित्रवान्विजितेंद्रियः धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः यथा मनुर्महातेजा लोकस्य परिरक्षिता तथा दशरथो राजा लोकस्य परिरक्षिता ४ ॥ ५

वाल्मी २३ अध्यायः ५ तस्यामिति वेदवित् त्रैवर्णिकमात्रस्याध्येयं गुणाः सर्वसंग्रहः सर्वेषामपरिमितवस्तूनां बलराष्ट्रदुर्भवीनां सार्वभौमापेक्षितानां संग्राहकः एवं सामादिप्रयोगे एवं फलं भविष्यतीत्यादि दीर्घदर्शनशीलः तेजः प्रतापः १ अतिरथः दशसहस्रमहारथैर्योद्धा वशी स्वाधीनः २

वाल्मीकीये रामायणे बालकांडे ५ ॥

ओं
रा॰बा॰
बा॰टी॰
३८

71 तेनेति सत्याभिसंधः सत्यप्रतिज्ञः धर्मकामार्थास्त्रिवर्गः तत्संपादककर्मानुष्ठानप्राधान्येन पालिता अभवदिति योजना ५ धर्मात्मनः धर्मवासनावासि
ताः बहुश्रुताः इति बहुव्रीहिः ६ नाल्पेति सतांउत्कृष्टवस्तूनांनिचयः अल्पसन्निचयोऽल्पसंचयस्तेनास्ति अभावस्तेनसर्वेषांबहुधनवत्त्वमुक्तं यद्वा तेषां
मिथ्यागवादिमान् अर्थाभावेऽप्यभावेनचतत्पुरुषवाचितोमनुष्यप्रनष्टवासिद्धार्थः असिद्धेहिकामुष्मिकप्रयोजनः ईदृशः कुटुंबीनकश्चिदासीदि।

तेनसत्याभिसंधेनत्रिवर्गमनुतिष्ठता पालितासापुरीश्रेष्ठाइंद्रेणेवामरावती ५ तस्मिन्पुरवरेहृ
ष्टाधर्मात्मानोबहुश्रुताः नरास्तुष्टाधनैःस्वैःस्वैरलुब्धाःसत्यवादिनः नाल्पसन्निचयःकश्चिदासी
त्तस्मिन्पुरोत्तमे कुटुंबीयोह्यसिद्धार्थोगवाश्वधनधान्यवान् कामीवानकदर्योवानृशंसःपुरुषःक्वचि
त् द्रष्टुंशक्यमयोध्यायांनाविद्वान्नचनास्तिकः ८ सर्वेनराश्चनार्यश्चधर्मशीलाःसुसंयताः मुदि
ताःशीलवृत्ताभ्यांमहर्षयइवामलाः ९ नाकुंडलीनामकुटीनास्रग्वीनाल्पभोगवान् नामृष्टोन
नलिप्तांगोनासुगंधश्चविद्यते १० नामृष्टभोजीनादातानाप्यनंगदनिष्कधृक् नाहस्ताभरणोवा

वापि दृश्यते नाप्यनात्मवान् ॥ ११ ॥

नियोजनाप्येवमग्रेऽपि ७ कामी कामैकतत्परः आत्मानंधर्मकृत्यंवपुत्रदारांश्चपीडयेत् लोभात्पितरौभ्रातृन्सकदर्यइतिस्मृतः नृशंसोघातुकःक्रू
रः शक्यमितिसामान्येनपुंसकंअत्रनन्वाह्यपाकाम्यादिभिःसंवध्यते तेनेकगुणवत्तासमुदितगुणवत्तावतःसत्त्वानिषिध्यते ८ सर्वेइतिसुसंयता
सुष्ठुनिगृहीतेंद्रियाः ९ भोगाधर्माविरुद्धाःकामभोगाः अमृष्टोऽनिर्मलः नचलिप्तांगइतिपाठः नलिप्तांगइतिसुप्सुपेतिसमासःलेपश्चंदनादिना

72 अयज्वा सोमयागरहितः क्षुद्रः अल्पवित्तैश्वर्यादिमान् अवृत्तः सदाचाररहितः न संकरः कुंडगोलकादिः न च निर्हीनसंकर इति पाठे निर्हीनं यन्नहितं सां
कर्यं परक्षेत्रे बीजावापादिरूपं येन स इत्यर्थः संकरशब्दो भावप्रधानः ।२ स्वेति दानं नित्यश्राद्धं यथाशक्ति विना परदत्तस्य स्वीकारः प्रतिग्रहः तत्र सं
यताः निषिद्धप्रतिग्रहरहिता इत्यर्थः ।३ नास्तिकः नास्ति परलोक इति बुद्धिमान् अनृती असत्यवचनः अनृत इति पाठेऽपि अर्शआद्यच्वा मत्वर्थः

नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः कश्चिदासीदयोध्यायां न चावृत्तो न संकरः ।२ स्वकर्मनि
रता नित्यं ब्राह्मणा विजितेंद्रियाः दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ।३ नास्तिको नानृती
वापि न कश्चिदबहुश्रुतः नासूयको न चाशक्तो नाविद्वान्विद्यते क्वचित् ।४ नाषडंगविदत्रास्ति ना
व्रतो नासहस्रदः न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ।५ कश्चिन्नरो वा नारी वा नाश्रीमा
न्नाप्यरूपवान् द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ।६ ॥

अशक्तः स्वीयैहिकामुष्मिककार्यसाधनासमर्थः ।४ नेति व्रतमेकादश्यादिव्रतं क्षिप्तचित्त इति उन्मादादिनेति शेषः व्यथितः आधिव्याधिपी
डितः ।५ कश्चिदिति नार्यो नाश्रीमतीत्याद्यूह्यं श्रीः शोभा कान्तिः रूपं गौरत्वादि राजा दशरथः तस्मिन् भक्तिः स्नेहः तदभाववान् माभूत् ।६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रथमं राजानं स्तुत्वा तस्मिन् पुरवरे इत्यादिभिर्ब्राह्मणप्रशंसा कृता इदानीं क्षत्रियादिसाधारण्येन वर्णाः प्रशंस्यन्ते वर्णेष्वित्यादिभिः अग्र्यचतुर्थेषु अग्र्यो ब्राह्मणः सचतुर्थो येषां ते षु सर्वेषु वर्णेष्विति शेषः वदान्यो दानशौण्डः स्यादिति विश्वः सर्वत्रास्तीति शेषः १७ ब्रह्ममुखं ब्राह्मणप्रधानं तदाज्ञावर्तीत्यर्थः।

वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजनाः कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः १७ दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे १८ क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः शूद्राः स्वकर्मनिरतास्त्रीन्वर्णानुपचारिणः १९ सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता २० योधानामग्निकल्पानां पेशलानाममर्षिणाम् संपूर्णा कृतविद्यानां गुहा केसरिणामिव २१ कांबोजविषये जातैर्बाह्लीकैश्च हयोत्तमैः वना-युजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः २२ ॥

शूद्राणां स्वकर्माह त्रीनिति उपचारः सेवा योधानामिति शौर्यातिशयात् अग्निकल्पानां पेशलानां अकुटिलानां अमर्षिणां कृताभिभवासहिष्णूनां कृतविद्यानां अभ्यस्तास्त्रशस्त्रादिविद्यानां योधानां संघैः संपूर्णेति योजना २१ कांबोजविषये कांबोजदेशे बाह्लीकैः तद्देशजैः बाह्लीजैरिति क्वचित्पाठः

हैमवतैर्हिमवत्पर्वतजातैः मातंगैर्गजैः २३ ऐरावतादयो दिग्गजाः २४ भद्रैरिति भद्रा मंद्रा मृगाश्चेति त्रिविधा गजाः क्रमेण हिमवद्विंध्यस
ह्यजाः भद्रमंद्रमृगाः त्रिसभावाः संकीर्णगजाः भद्रमंद्रादयो द्विसभावाः २५ नित्येति द्वयोर्योजनयोः अनंतरं योगे द्वितीयाः भूयो अभ्यधिकं सत्य

विंध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि मदान्वितैरतिबलैर्मातंगैः पर्वतोपमैः २३ ऐरावतकुलीनै
श्च महापद्मकुलैस्तथा अंजनादपि निष्क्रांतैर्वामनादपि च द्विपैः २४ भद्रैर्मंद्रैर्मृगैश्चैव भद्रमंद्रमृ
गैस्तथा भद्रमंद्रैर्भद्रमृगैर्मृगमंद्रैश्च सा पुरी २५ नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः सा
योजने द्वे च भूयः सत्यनामा प्रकाशते २६ तां पुरीं स महातेजा राजा दशरथो महान् शशास श
मितामित्रो नक्षत्राणीव चंद्रमाः २७ तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभि
तां शिवां पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः २८ इत्यार्षे रामाय
णे बालकांडे षष्ठः सर्गः ६ ॥

नामा योद्धुमशक्यत्वात् यथार्थनामा राजतोमूलधामपतावत् २६ तामिति शमितामित्रः शमिता शत्रुमित्रा येन नक्षत्राणि नक्षत्रलोकान् २७ तामिति अर्ग
लं नाम कवाटावष्टंभककाष्ठं तिर्यक्स्थापितदारुविशेषः २८ इत्यार्षे रामायणे बालकांडे षष्ठः सर्गः ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथ तस्यामंत्रिसंपद्वर्णनं तस्येति गुणैः अमात्यापेक्षितैर्गुणैर्युक्ताः इक्ष्वाकोः तद्वंशजस्य गुणा नाहमंत्रज्ञाः मंत्राः कार्यविचारः इंगितं पराभिप्रायः प्रियस्य हितस्य च रताः १ अष्टाविति शुचयः अमनस्कामिक्रोधादिरूपवाग्व्यसनश्रवित्वरहिताः नित्यशः आत्मप्रयोजनसमयेपि राजकृत्ये अनुरक्ताः २ ताना आह धृष्टिरित्यादि ३ अभिमतौ ऋत्विजौ अपरे उक्ताष्टप्रधानमंत्रिव्यतिरिक्ताः

तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः मंत्रज्ञाश्चेंगितज्ञाश्च नित्यं प्रियहिते रताः १ अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः २ धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः अकोपो धर्मपालश्च सुमंत्रश्चाष्टमोऽर्थवित् ३ ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ वसिष्ठो वामदेवश्च मंत्रिणश्च तथापरे ४ सुयज्ञोऽप्यथ जाबालिः काश्यपोऽप्यथ गौतमः मार्कण्डेयस्तु दीर्घो

इत्येके परे मंत्रिणश्च तथा वसिष्ठवामदेवयोर्मंत्रित्वमपि सूचयन्नाह इति तीर्थः तच्च मंत्रिणश्च तथे तिपाठेषामस्मिन्सकलाभेपि वसिष्ठवामदेवयोर्मंत्रित्वस्यापाठे मर्यादया वंशमर्यादया वा लाभात् वस्तुतस्तथापरे इत्यस्य ऋत्विजइत्यर्थः मंत्रिणश्च तस्य वसिष्ठाद्या इति पाठः अमात्याः देशादिकार्यनिर्वाहकाः मंत्रिणो व्यवहारद्रष्टार इति भेदः ४ परानेवाह सुयज्ञ इत्यादि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

76 पतैर्ब्रह्मर्षिभिर्नित्यसहितास्तस्य ऋत्विजः इत्यनेन सर्वथा कर्मसाद्गुण्यं दर्शितं पौर्विकाः परंपरागताः अनर्थक ममात्यविज्ञो विशेषणं विद्येति विद्य
या सह विनीताः विद्याविनययोभयसंपन्ना इत्यर्थः यथायोगवद्यमाणानि विशेषणानि अमात्येषु मंत्रिषु च योजनीयानि ६ शास्त्रज्ञाः शास्त्रप्रतिपा
दकधनवेदविदः प्रणिहिताः सर्वराजकार्येषु सावधानाः यथावचनकारिणः राज्ञ इति शेषः ७ कामात् क्रोधार्थहेतोरिति द्वंद्वगर्भः कर्मधारयः

पतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्विकाः। विद्याविनीता ह्रीमंतः कुशला नियतेंद्रियाः ६ श्रीमंत
श्च महात्मानः शास्त्रज्ञा दृढविक्रमाः कीर्तिमंतः प्रणिहिता यथावचनकारिणः ७ तेजःक्षमायशः
प्राप्ताः स्मितपूर्वाभिभाषिणः कामात्क्रोधार्थहेतोर्वा न ब्रूयुरनृतं वचः ८ तेषामविदितं किंचित्स्वेषु
नास्ति परेषु वा क्रियमाणं कृतं वापि चारेणापि चिकीर्षितं ९ कुशला व्यवहारेषु सौहृदेषु परीक्षि
ताः प्राप्तकालं यथा दंडं धारयेयुः सुतेष्वपि १०

तेषु मित्रेषु परेषु शत्रुषु चारेण करणेन कृतं क्रियमाणमपि वा अपि चिकीर्षितं च तेषां न किंचिदविदितमभूदिति शेषः ९ सौहृदं विषयवि
शेषगतदोषानदोषत्वेनाम्रेडनात् चित्तवृत्तिविशेषस्तत्र परीक्षिताः राज्ञ इति शेषः प्राप्तः सापराधत्वलक्षणः कालो यस्य तं धारयेयुः कुर्युरि

८
रा
बा

ॐ
रा.वा.
वा.टी.
२५

77 कोशसंग्रहणेव्यवहारेण बलपरिग्रहे हेतुः अहितं सहितावर्णारहितं शत्रुमपिअविद्रूषकं अनपराधिनं न हिंस्यः ।।१ राजशाहं नीतिशाहं अनुष्ठिताः तु
सारेण भूवीनामितिसेणपानृत रहिताः स्वयः विषयोदेशः ।२ वृत्ताति अभिष्टरयन्निति पावेऽभावव्यार्थः हतीक्षेणानि वलावलं अपराध्यता

कोशसंग्रहणे युक्तो बलस्य च परिग्रहे अहितं चापि पुरुषं न हिंस्यादविदूषकं ।। वीराश्च नियतोत्सा
हा राजशास्त्रमनुष्ठिताः शुचीनां रक्षिताराश्च नित्यं विषयवासिनां ।२ ब्रह्मक्षत्रमहिंसंतस्ते कोशं
समपूरयन् सुतीक्ष्णदंडाः संप्रेक्ष्य पुरुषस्य बलाबलं ।३ शुचीनामेकबुद्धीनां सर्वेषां संप्रजा
नतां नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ।४ कश्चिन्न दुष्टस्तत्रासीत्परदाररतिर्नरः प्रश
ांतं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ।५ सुवाससः सुवेषाश्च ते च सर्वे सुचिव्रताः हितार्थाश्च नरे
ंद्रस्य जाग्रतो नयचक्षुषा ॥

रक्षस्य पुरुषस्येत्युपलक्षणं देशादीनां च बलाबलं संप्रेक्ष्येत्यर्थः देशकालवयः शक्तीः संचिंत्य दंडकर्म
णीति वचनात् अयं कोशपूरणहेतुः ।३ एकबुद्धीनां परस्परमेकबुद्धीनां संप्रजानतां पुरराष्ट्रवृत्तांतं विचारयतां तेषां विचारविषये दु
ष्टादौ मृषावादिगणविशिष्टः कोपि नासीत् ।४ प्रति मंत्रिणां नीत्या सर्वं प्रशांतं निवाच्यमासीदित्यर्थः ।५ नरेंद्रस्य हितार्थाः हि

[illegible]
२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गुरोः संबंधसामान्ये षष्ठी गुरुणा स्वस्वाचार्येण राजा वा अवश्यं ग्राह्यजनं गुणग्राहेन गुणवत्त्वेन याः गृहीता वत्सया गृहीता व इत्यर्थः तेन गुर्वेश्च दृढ़शाश्च सर्वैर्वि ग्लेनरात्ता अग्रहश्चाभसर्वैश्च यत्नं च सूचितं गुणा गुणगृहीता इति पाठे गुणदोषग्रहीता इत्यर्थः बहुव्रीहौ वाहिताग्न्यादित्वात्परनिपातो निष्ठाया सा विदेशेष्वपि सर्वतो विज्ञाता नत्वेदेन्तः बुद्धिनिश्चयाः बुद्धिसंपन्नाः १७ अभितो गुणवंतः सर्वदेशे सर्वकाले च गुणवंतः संधीति सर्वत्र द्विविषकथा

गुरोर्गुणगृहीताश्च प्रख्याताश्च पराक्रमैः विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयाः १७ अभितो गुणवंतश्च न चासन् गुणवर्जिताः संधिविग्रहतत्त्वज्ञाः प्रकृत्या संपदान्विताः मंत्रसंवरणे शक्ताः श्लक्ष्णाः सूक्ष्मासु बुद्धिषु नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः १९ ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः उपपन्नो गुणोपेतैरन्वशासद्वसुंधरां २० अवेक्षमाणश्चारेण प्रजा धर्मेण रक्षयन् प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन् २१ विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसंगरः स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमां २२ ॥

तत्त्वज्ञाः प्रकृत्या त्रिगुणया संपदान्विताः तत्र सात्विका संपदा शिष्टपालने तामसी संपदा दुष्टनिग्रहे काले राजसी संपदा यत्न यान्वदासीत्तस विकाः श्रगजादिरूपया १८ संवरणे रक्षणे बुद्धिसुविचारेषु १९ ईदृशैः प्रागुक्तरूपैः अमात्यैश्च वाहृ त्रिविधैर्विभिः अतएव गुणोपेतैः उपपन्नः इति योजना २० चारेण स्वपरदेशवृत्तांतं प्रजा धर्मेण रक्षा यथा भवति तथा पुरुषै रक्षयन् सर्वत्र हेतोः शास्ता २१ अतो हेतोर्विश्रुतः सत्यसंगरः रण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 79

रा॰बा॰
बा॰टी॰
५॰

भूविगमः प्राप्तिः नताः सामंता यस्य कंटकाः शत्रवश्चोराश्च २३ तैरिति मंत्रो विचारस्तस्मा भ्यां हिते उभयत्र निविष्टैः कुशलैः सूक्ष्मार्थदर्शिनः निपुणैः समर्थैः तत्साधनशक्तैः तेजोमयैः प्रचुरतेजोवद्भिः तेजः पराभिभवसामर्थ्यं गोभिः किरणैर्युक्त उदितोऽर्क इव गवामपि तेजोमयैरित्यत्र साधिं कमयं ज्ञेतं विषयीणामित्येकेनद ५९ २४ इत्यार्षे रामायणे सप्तमः सर्गः ७ एवं समग्रगुणस्यापि प्रत्वेनाजितपितृलोकतासूचार्थम

नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः मित्रवान्नतसामंतः प्रतापहतकंटकः स शशास जगद्राजा दिवि देवपतिर्यथा २३ तैर्मंत्रिभिर्मंत्रहिते निविष्टैर्वृतोऽनुरक्तैः कुशलैः समर्थैः स पार्थिवो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः २४ इत्यार्षे रामायणे सप्तमः सर्गः ७ तस्य त्वेवं प्रभावस्य धर्मज्ञस्य महात्मनः सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः १ चिंतयानस्य तस्यैवं बुद्धिरासीन्महात्मनः सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् २ स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् मंत्रिभिः सह धर्मात्मा सर्वैरपि कृतात्मभिः ३

तस्येत्यप्रस्तावः तस्येत्यादि तप्यमानस्य तपः कुर्वतः १ चिंतयानस्य मुगभावच्छेदतः तपसाप्यसाध्यपुत्रोत्पत्त्युपायं मार्गमाणस्यएवं वक्ष्यमाणं २ सतीति यष्टव्यमिति मंत्रिभिः सह निश्चितां मतिं कृत्वेत्यन्वयः सुमंत्रमानयामामेति शेषः ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ तत इति विक्रमो गमनं सर्वान्तान्गुरूंस्तान्समस्तान्वेदपारगानध्यागतान्सुरूंश्च ५ सुयज्ञादयो विप्राः पुरवः वसिष्ठश्चैव पुरोहितस्तेनोपमेन्द्रतयोपनेतरेवाध्याय
कतवाग्गुरुत्वेपि सर्वसमानायधाम्णोस्तनयो वा देपभियातेनैवाध्यायनेति योगात्तेषामपि विप्राणां गुरुत्वमस्त्वेतं पुरोरग्रस्तमेधार्त्विज्यादिकपञ्चकाः ६ धर्मेणा
र्थेनवासहितं श्लाद्यंमधुरं ७ ममेति सुतार्थं सुतनम्रहिश्यलालप्यमानस्यपुनः पुनः भृशं चविलपतो राज्यादिनापि सुखं न भवति तान्नाध्यामानस्येति

ततोब्रवीन्महातेजाः सुमंत्रंमंत्रिसत्तमं शीघ्रमानयमेसर्वान्गुरूंस्तान्सपुरोहितान् ४ ततः सुमं
त्रस्त्वरितंगत्वात्वरितविक्रमः समानयत्सतान्सर्वान्समस्तान्वेदपारगान् ५ सुयज्ञंवामदेवंचजावा
लिमथकाश्यपं पुरोहितंवसिष्ठंचयेचान्येद्विजोत्तमाः ६ तान्पूजयित्वाधर्मात्माराजादशर
थस्तदा इदंधर्मार्थसहितंश्लक्ष्णंवचनमब्रवीत् ७ ममलालप्यमानस्यसुतार्थंनास्तिवैसुखं त
दर्थंहयमेधेनयक्ष्यामीतिमतिर्मम ८ तदहंयष्टुमिच्छामिशास्त्रदृष्टेनकर्मणा कथंप्राप्स्याम्य
हंकामंबुद्धिरत्रविचिंत्यतां ततः साध्वितितद्वाक्यंब्राह्मणाः प्रत्यपूजयन् वसिष्ठप्रमुखाः सर्वेपा

र्थिवस्यमुखेरितं साधुयज्ञः पुनर्भूयश्चतनयः ऊर्ध्वतनस्तु यथा अयमेवपायोयुक्तः सर्वैः सुतार्थिनस्तप्यमानस्येत्युक्तेः सुतस्त्वदर्थं सुतार्थं मतिमध्यवसायः ८ नदिति शास्त्र
प्रोक्तेन कर्मणा विधिना केन प्रकारेणाचरणेन अहं कामं पुत्ररूपं प्राप्स्यामीत्यत्र बुद्धिरुपायविषया विचार्यतां क्रियतां ९ तत इति प्रतिपूजनास्तुतिः
पार्थिवस्यमुखेरितं साधुवाद्गात्रास्वयमेवोक्तं १० ॥

ओं
रा०बा०
बा०टी०
५८

81

संभाराः अश्वमेधकरणोक्ताः एकविंशतियूपादिरूपाः संभ्रियंतां संपाद्यंतां ॥ सर्वेति वेदान्वर्थैरभिप्रेतान्मनोभिप्रेतेन गुणाद्युक्तान् ।२ या
ज्ञिकीधर्मप्रयोजना सर्वथा प्राप्स्यसे इति ज्ञानात्संतोषः ।३ हर्षजनिताः नेत्राश्रु परिप्लुतनेत्रः ।४ समर्थैरिति वतः याताद्दंतीति स्कन्नेः २
तणामर्थे स्मृतः शान्तराजपुत्रैः रक्षितः सोपाध्यायः उपाध्यायपदे न प्रधानर्त्विजः अश्वमेधस्यापि पदेऽज्ञहोतीम निन्सुक्तहोमनिर्वाहा

ऋत्वप्रवरमुख्यास्ते सर्वे दशरथं वचः संभाराः संभ्रियंतां ते तुरगश्च विमुच्यतां ॥ सरय्वाश्चोत्त
रे तीरे यज्ञभूमिर्विधीयतां सर्वथा प्राप्स्यसे पुत्रानभिप्रेतान् स पार्थिव ।२ यस्य ते धार्मिका बुद्धि
रियं पुत्रार्थमागता ततस्तुष्टोऽभवद्राजा श्रुत्वैतत् द्विजभाषितं ।३ अमात्यानब्रवीद्राजा
हर्षव्याकुललोचनः संभाराः संभ्रियंतां मे गुरूणां वचनादिह समर्थाधिष्ठितश्चाश्वः सोपा
ध्यायो विमुच्यतां सरय्वाश्चोत्तरे कूले यज्ञभूमिर्विधीयतां ।५ शांतयश्चापि वर्धंतां यथाकल्पं
यथाविधि शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता ।६

यजनस्थानादिकं ।५ शांतयः विघ्ननिवारककर्माणि वर्धन्तां तोकारसोपिलोपः यथाकल्पं यथाकल्पं कल्पसूत्रकथितेकल्पे ज्ञतिभाजुतिः
यथाविधि शास्त्रोक्तविधानानतिक्रमेण शक्यः इति काकुः सर्वेण सर्वगुणयुक्तेनापि राज्ञा अयं यज्ञः प्राप्तुं शक्यः एतेनानर्थः ।६ ॥

५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नदेवाह नेतियद्यत्रयज्ञेकष्टोमहाप्रायश्चित्तनाशोपराधोविध्यपराधः क्रियालोपादिरूपोनस्यात् स्यादपियत्नप्राप्यःसन्तत्रनियत्नसाध्योतोनसर्वैःसर्वा
मःक्रियतःयत्नादित्युक्तंक्रियालोपादिनाराक्षसमंत्रशास्त्रज्ञाब्रह्मराक्षसाविद्वांसोयज्ञतंत्रज्ञाःछिद्रमपचारंमृगयंतेनेचेषद्यत्नारंभस्तुयत्नेनेभुवति
यज्ञावारयतांसंपादयतेनेत्रनेनसर्वंशाम्यः १७ किंचिविधिहीनस्ययज्ञस्यकर्तायजमानऋत्विक् संयज्ञसद्योविनश्यति ततस्तेहेतोर्यथामेयज्ञः

नापराधोभवेत्कष्टोयं यस्मिन्क्रतूत्तमे छिद्रंहिमृगयंतेस्मविद्वांसोब्रह्मराक्षसाः १७ विधि
हीनस्ययज्ञस्यसद्यःकर्ताविनश्यति तद्यथाविधिपूर्वंमेक्रतुरेषसमाप्यते १८ तथाविधानंक्रि
यतांसमर्थाःकरणेष्विति तथेतिचाब्रुवन्सर्वेमंत्रिणःप्रतिपूजिताः १९ पार्थिवेंद्रस्यतद्वाक्यं
यथापूर्वंनिशम्यतेतथाद्विजास्तेधर्मज्ञावर्धयंतोनृपोत्तमं २० अनुज्ञातास्ततःसर्वेपुनर्जग्मु
र्यथागतं विसर्जयित्वातान्विप्रान्सचिवानिदमब्रवीत् २१

विधिपूर्वंशास्त्रोक्तप्रकारेण नतुमनदपचारेणयथासमाप्यतेतथाविधानंयत्नःक्रियतां १८ नन्वेवंचेदशक्यमेतदत्राह समर्थाकारणेष्वक्रियाविधि
ष्वसमर्थाःशक्ताइति इत्येवंप्रकारोत्साहितानिराजाचक्रवर्त्यर्थःतेप्रतिपूजिताःमंत्रिणस्तेयन्सर्वदनुप्रमक्षज्ययन्निति पाठेचेतिशेषः १९ पा

श्रीः 83
यो.वा.
वा.टी.
५२

सुप्रीतो वरं प्रादादनुत्तमं इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः २२ मलदाश्च क
रूषाश्च ममाङ्गमलधारिणौ साधु साधिति तं देवाः पाकशासनमब्रुवन् २३ देशस्य पूजां
तां दृष्ट्वा कृतां शक्रेण धीमता एतौ जनपदौ स्फीतौ दीर्घकालमरिंदम २४ मलदाश्च करू
षाश्च मुदिता धनधान्यतः कस्यचित्त्वथ कालस्य यक्षिणी कामरूपिणी २५ बलं नागस
हस्रस्य धारयन्ती तदा ह्यभूत् ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः २६ मारीचो राक्षसः
पुत्रो यस्याः शक्रपराक्रमः वृत्तबाहुर्महाशीर्षो विपुलास्यतनुर्महान् २७

कालस्य अपगमे इति शेषः २५ भद्रं ते इति विश्वामित्रस्य आशीर्वचनं वालिकत्वेन ताटकाया यक्षिणीनाम अप्रमाणेन आसोमा
भूदिति यद्वा ताटका नाम भद्रं च प्रशस्तं शौर्यं यस्याः सा तत्त्वेन प्रसिद्धिका एवं रूपं भद्रं त्वमस्या इति बोध्यं २६।२७

८८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सेयंयाविनाशयनिसेत्यर्थः आवृत्यनिरुध्यपंथानंप्रतिक्रांतमत्यर्धंतादृशेयोजने २९ यतस्त्वेदंनाटकावनंअस्माभिर्गंतव्यंअतएवच
हेतोस्त्वंरामस्वबाहुबलमाश्रित्यइमांजहि ३० ननुस्त्रीकथंहंतव्यातत्राहमन्नियोगादितिमद्वाक्ययास्त्रीवधपापकाभवजईदृशांता

172 सादुष्टाभैरवाकारानित्यंत्रासयतेप्रजाः इमौजनपदौनित्यंविनाशयतिराघवः २८ मलदांश्च
करूषांश्चताटकादुष्टचारिणी सेयंपंथानमावृत्यवसत्यत्यर्धयोजने २९ अतएवचगंतव्यं
ताटकायावनंयतः स्वबाहुबलमाश्रित्यजहिमांदुष्टचारिणीं ३० मन्नियोगादिमंदेशंकुरु
निष्कंटकंपुनः नहिकश्चिदिमंदेशंशक्तोह्यागंतुमीदृशं ३१ यक्षिण्याघोरयारामउत्सादि
तमसह्यया एतत्तेसर्वमाख्यातंयथैतद्दारुणंवनं ३२ यक्ष्याचोत्सादितंसर्वमद्यापिनविव
र्तते इत्यार्षेरामायणेचतुर्विंशःसर्गः २४ अथतस्याप्रमेयस्यमुनेर्वचनमुत्तमं श्रुत्वापु
रुषशार्दूलः प्रत्युवाचशुभांगिरं १ अल्पवीर्यायदायक्षीश्रूयतेमुनिपुंगवः कथंनागस

ताटकाक्रांतं ३२ अद्यापिननिवर्ततेअत्रपूर्ववत्स्थितोजनइतिशेषः ३३ इतिटीकाचतुर्विंशःसर्गः २४ अथेतिअप्रमेयस्य
प्रमेयप्रभावस्यपुरुषशार्दूलःश्रेष्ठः १ यदायतः यक्षीयक्षजातिः श्रूयतेपुराणादाविति शेषः अबलेतिसाभिप्रायं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वीर्यं शौर्यादि बलमात्रमस्त्रेवीर्याभियानं पौरुषादयोऽपि गुणाः न सन्तीति ज्ञापनार्थं ४ वरदानमिमूलमादृपूर्वमिति तेने
पे पुत्रार्थं पितामहमुद्दिश्येति शेषः ५ कन्यारत्नं दिव्यरूपवतीकन्या ८ तदभिसहितगुणवता पुत्रेणास्य तत जन

श्रुत्वातं वचनं काकुत्स्थस्यामितोजसः हर्षयन्श्लक्ष्णया वाचा सलक्ष्मणमरिंदमं १ विश्वा
मित्रोऽब्रवीद्वाक्यं शृणु येन बलोत्कटा वरदानकृतं वीर्यं धारयत्यबला बलं ४ पूर्वमासीन्
महायक्षः सकेतुर्नाम वीर्यवान् अनपत्यः शुभाचारः स च तेपे महत्तपः ५ पितामहस्तु स
प्रीतस्तस्य यक्षपतेस्तदा कन्यारत्नं ददौ राम ताटकां नाम नामतः ८ ददौ नागसहस्रस्य ब
लं चास्याः पितामहः न त्वेव पुत्रं यक्षाय ददौ चासौ महायशाः ७ तां तु बालां विवर्धन्तीं रूपयौ
वनशालिनीं जम्भपुत्राय सुन्दाय ददौ भार्यां यशस्विनीं ८ कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्य
जायत मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् ९ सुन्दे तु निहते राम अगस्त्यमृषिसत्तम

पौत्रं भवेदिति विचार्य पुत्रं न ददौ ७ विवर्धं वर्धमानां जम्भपुत्रायेत्यत्र सुन्दं जम्भपुत्रायेति पाठे सुन्दो जम्भः पुत्रः सुन्दश्च पुत्रः अनयोरस्यास्त
योः देवयोरिति वेनिवितः संबन्धः ८ व्यजायत प्रासोष्ट ९ शापं दण्डीयति सुन्दे निहते नितिनिहते अगस्त्येन शापदग्धेति

जातसंरंभा भर्तृवधजकोपवती ॥ भजस्वेत्युक्तदेवयोनिस्वरूपं मुक्त्वेति शेषः आत्मावान् राक्षसत्वं भजस्वेति ॥ १२ ॥ न देवविश्लेषेण
हरुषादि नि भवेति शेषः तदेवोपपादयति इदमिति इदं रूपं यातिणीरूपं विहाय यस्माज्जायमाना दारुणां रूपं वराक्षसरूपं अस्तु भव
तु पतत्देवाभिमेत्यपाद्येड कं तो रामलक्ष्मणौ वीरौ वायांती पथि राक्षसीं तारकानामघोरां तां ह्रदभार्यास्तके तु जामिति ॥ ११

भक्ष्यार्थं जातसंरंभा गर्जंती साभ्यधावत । आपतंतीं तु तां दृष्ट्वा अगस्त्यो भगवान् ऋषिः ॥ ११ ॥ रा-
क्षसत्वं भजस्वेति मारीचं व्याजहार सः । अगस्त्यः परमामर्षस्ताटकामपि शप्तवान् ॥ १२ ॥
पुरुषादी महायक्षी विकृता विकृतानना । इदं रूपं विहायाशु दारुणं रूपमस्तु ते ॥ १३ ॥ सैषा
शापकृतामर्षा ताटका क्रोधमूर्छिता । देशमुत्सादयत्येनमगस्त्याचरितं शुभं ॥ १४ ॥ एनां रा-
घव दुर्वृत्तां यक्षीं परमदारुणां । गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमां ॥ १५ ॥ न ह्येनां शाप-
संसृष्टां कश्चिदुत्सहते पुमान् । निहंतुं त्रिषु लोकेषु त्वामृते रघुनंदन ॥ १६ ॥

अमर्षात् असहनात् देशोत्साधने हेतुगर्भं विशेषणं अगस्त्याचरितमिति अगस्त्यतपःख्यातमित्यर्थः ॥ १४ ॥ गोब्राह्मणादिहितार्था-
येति स्त्रीवधशंकानिरासाय तद्धिताय क्रियमाणं पापवदाभासमानमपि धर्मायेति भावः ॥ १५ ॥ शापसंसृष्टां अगस्त्यशापयुक्तां

१९

ॐ·
रा·बा·
टी·
८८

175

हेतोंतरमते स्त्रीवधनिमित्ताघृणा न त्वया कार्या अत्र नरोत्तमेत्यनेन पुरुषोत्तमेश्वरस्त्वं तस्मात्तव पापसंबंधाभाव इति ध्वनितं वा
तुर्वर्ण्यहितार्थे नह्यनाथ कर्तव्यमित्यस्य नृशंसमित्याद्युत्तरेणान्वयः वाशब्दः समवार्थे अनृशंसमिव नृशंसं हरापिका
र्यमित्यर्थः १७ प्रजारक्षणकारणात् प्रजारक्षणहेतोः पथ्यधर्म इति यमेवक्ष्यलकत्वादिति भावः रक्षता सदेति रक्षाधर्म
स्थितिशेषत्वेनेति शेषः १८ पातकं वा महत्पापं पातकं तादृकं वा सदोषं वा यज्ञादिवत्स्वतो दोषं पश्चाद्गुणेन धर्मं वा सदोषवधरू

न हि ते स्त्रीवधकृते घृणा कार्या नरोत्तम चातुर्वर्ण्यहितार्थं हि कर्तव्यं राजसूनुना १७
नृशंसमनृशंसं वा प्रजारक्षणकारणात् पातकं वा सदोषं वा कर्तव्यं रक्षता सदा १८ राज्य
भारनियुक्तानामेष धर्मः सनातनः अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते १९ श्रूयते
हि पुरा शक्रो विरोचनसुतां नृप पृथिवीं हंतुमिच्छंतीं मंथरामभ्यसूदयत् २० विष्णुना च
पुरा राम भृगुपत्नी पतिव्रता अनिंद्रं लोकमिच्छंती काव्यमाता निषूदिता २१

पत्नीति यावत् अस्याः पापसा वधो न्याय्य इत्याह अधर्म्यामिति धर्मादपेतां न दोषो वधे यस्या धर्मो ह्यस्येति १९ अथ सम्मती
वधोपि धर्मपर्वेत्यर्थे संमतिभिरुपपादयति श्रूयते इति पृथिवीं नदयिष्यंती देवताय ह्यानस्याः प्रजाः इत्यर्थः २० अनिं
द्रं निंद्रासत्त्वरहितं अनिंद्रमिति पाठे इंद्ररहितं काव्यः शुक्रः २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पैतैः पतादृशैः षड्भार्गवाङ्गवं पताभ्यां शक्रविष्णुभ्यामित्यर्थः मच्छासनादिति यथा परशुरामस्य जमदग्नेर्गुरोराज्ञया वधेपि
न दोषस्तथा बलादिचित्प्राराघवेन गुरोर्ममाज्ञया स्त्रीवधेन वनदोष इति भावः २२ इति पंचविंशः २५ मुनेरिति अक्लीवमुत्साहपूर्णमपि
त्वरितिकौशिकस्य वचनं प्रविशंकया कर्तव्यत्वये त्पैवं नृपाभिदेशात् नियोगात् पितृवचनगौरवात् परमाप्तवाक्यत्वेन प्रति

पतैश्चान्यैश्च बहुभी राजपुत्रैर्महात्मभिः अधर्मसहितानार्यो हताः पुरुषसत्तमैः तस्मा
देनां घृणांत्यक्त्वाजहिमच्छासनान्नृप २२ इत्यार्षेरामायणेपंचविंशःसर्गः २५ मुनेर्वच
नमक्लीवंश्रुत्वानरवरात्मजः राघवःप्रांजलिर्भूत्वाप्रत्युवाचदृढव्रतः १ पितुर्वचननि
र्देशात्पितुर्वचनगौरवात् वचनंकौशिकस्येतिकर्तव्यमविशंकया २ अनुशिष्टोस्म्य
योध्यायांगुरुमध्येमहात्मना पित्रादशरथेनाहंनावज्ञेयंहितद्वचः ३ सोहंपितुर्वचः
श्रुत्वाशासनाद्ब्रह्मवादिनः करिष्यामिनसंदेहस्ताटकावधमुत्तमम् ४

प्रमाणत्वात् बहुवक्तव्यं कर्तव्यमतेननिश्चितमिति शेषः २ कदेवंनियोगः कृत इत्यत आह अनुशिष्ट इति गुरवो वसिष्ठवामदेवा
द्याः अतः वचनं नेदं त्वत्कृतपदः वहवो विश्वामित्रवचस्तत्नु शिष्ट इत्यन्वयः ३ सोहमिति ब्रह्मवादिनः तस्य पापस्पर्शेनतत्
संकल्पादयन्तस्यापि पापमयायं वृणोत्वेवेत्याह उत्तममिति उत्तमं धर्म्यमित्यर्थः ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० रावा० नाटी० ८५ 177

पुराणत्वमेवोपपादयति गोब्राह्मणेति अप्रमेयस्य तव च हिताय अस्य हितं स्वाज्ञापरिपालनेन संतोषरूपं एवं इदमावर्तनीत्व
वचनं कर्तुमुद्यतो विचिकित्सारहितोहं ताटकावधं करिष्यामीति पूर्वेणान्वयः ५ तीव्रं परुषश्रवणं ६ वित्रस्ताः भी
ताः मोहिता व्याकुलचित्ता जाता ७ तं शब्दं श्रुत्वा च क्रुद्धा सा यत्र शब्दो यस्मात् ततो निःसृताः तं तं अभिनिध्याय शब्दनिःसरण

गोब्राह्मणहितार्थाय देशस्य च हिताय च तवैवाप्रमेयस्य वचनं कर्तुमुद्यतः ५ एव
मुक्त्वा धनुर्मध्ये बध्वा मुष्टिमरिंदमः ज्याघोषमकरोत्तीव्रं दिशः शब्देन नादयन् ६ तेन श
ब्देन वित्रस्तास्ताटकावनवासिनं ताटका च सुसंक्रुद्धा तेन शब्देन मोहिता ७ तं शब्द
मभिनिध्याय राक्षसी क्रोधमूर्छिता श्रुत्वा चाभ्यद्रवत्क्रुद्धा यत्र शब्दो विनिःसृतः ८ तां दृ
ष्ट्वा राघवः क्रुद्धां विकृतां विकृताननां प्रमाणेनातिवृद्धां च लक्ष्मणं सोभ्यभाषत ९
पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः भिद्येरन् दर्शनादस्या भीरूणां हृदयानि च १०
एतां पश्य दुराधर्षां मायाबलसमन्वितां विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥

वधिदेशं लक्षीकृत्य अभ्यद्रवदिति योजना ८ प्रमाणेन शरीरप्रमाणेन ९ भैरवं भयंकरं दारुणं घोरं अस्य वपुः
चोपपत्तेः अभीरूणामपी अर्थः १० एतामिति विनिवृत्तां अस्मत्संमुखागमनात् परावृत्तां पलायितामिति यावत् ॥

कारणादिह रामाद्रेहे तस्मादाह नहीति वीर्यं पराक्रमं शक्तिं गतिं ऊर्ध्वाकाशादिगतिं प्राणापादच्छेदेन निशेषः तावतैव देशहिता
सप्रकृतवचनानुष्ठानस्य च सिद्धत्वात् अविगर्हितः स्त्रीवधोनुचित इति भावः रामवेषविश्वामित्रस्य दृष्यर्थं तेन तं विसृज्य मानुषबुद्ध्या
मैवेत्यर्थः ११ तां राममसंभ्रमं वमभिधावन्तीं जयत्वयुविश्यकाशिषेव १४ घोरं रजः उद्धुन्वाना नेमन्तयः रजोमेघेन रजोंधकारेण १५ मा

178 नह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षितां वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः १२ एवं
ब्रुवाणे रामे तु ताटका क्रोधमूर्छिता उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत विश्वामित्रस्तु
ब्रह्मर्षिर्हुङ्कारेणाभिभर्त्स्य तां स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत १४ उद्धुन्वाना रजो
घोरं ताटका राघवावुभौ रजोमेघेन महता मुहूर्तं सा व्यमोहयत् १५ ततो मायां समास्थाय शि
लावर्षेण राघवौ अवाकिरत्सुमहता ततश्चुक्रोध राघवः १६ शिलावर्षं महत्तस्याः शरवर्षे
ण राघवः प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः १७ ततश्छिन्नभुजां श्रान्तामभ्याशे प
रिगर्जतीं सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकाम् १८

मायां समास्थाय अन्तर्धानं गत्वेत्यर्थः यावत् चुक्रोध तस्मिन्नवसरे उदासीनं विसृज्येति शेषः १६ पत्रिभिरिति एकैकस्य बहुधा खण्ड
नाभिप्रायेण १७ हृतेकर्णाग्रे नासिका च यस्यास्तां १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ओं. अनेकशः रूपाणि कृत्वान्तर्धानं गता सती स्वमायया राघवौ मोहयन्ती १९ भैरवं अश्मवर्षमित्यस्यान्वयः २० घृणयालं

रा.बा. सीदति घृणया मास्त्वित्यर्थः दुष्टचारिणी मायाशक्त्यान्तर्धानेन पाषाणादिवर्षकत्वं चाश्रिता घृणानुचिता: २१ घृणानो

वाटी. वितेमत्र हेतुस्तस्माद्यज्ञविघ्नकरीति मायया पुनरप्या वर्धेत तत्तावत्कालात्पूर्वमेवैषा वध्यतां सायंसंध्या

५९. 179

कामरूपधरा सा तु कृत्वा रूपाण्यनेकशः अन्तर्धानं गता यक्षी मोहयन्ती स्वमायया १९ अश्मवर्षं विमुञ्चन्ती भैरवं विचचार सा ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः २० दृष्ट्वा गाधिसुतः श्रीमानिदं वचनमब्रवीत् अलं ते घृणया राम पापैषा दुष्टचारिणी २१ यज्ञविघ्नकरी यक्षी पुरा वर्धेत मायया वध्यतां तावदेवैषा पुरा संध्या प्रवर्तते २२ रक्षांसि संध्याकाले तु दुर्धर्षाणि भवन्ति हि इत्युक्तः स तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीं २३ दर्शयञ्छब्दवेधित्वं तां रुरोध स सायकैः सा रुद्धा बाणजालेन मायाबलसमन्विता २४ अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी तामापतन्तीं वेगेन विक्रान्तामशनीमिव २५

प्रवर्तते यस्मादित्यर्थः किं ततः इत्यत आह रक्षांसीति अश्मवृष्ट्येति करणे तृतीया २३ शब्दमात्रेण लक्ष्यस्य सम्यङ्निश्चित्य वेधकत्वं स्वसामर्थ्यं दर्शयन्नित्यर्थः २४ अभिदुद्रावेति अन्तर्धानरहितेति शेषः २५

५९.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भीमसंकाशांभीमरूपां २६ अभिपूजयनअक्रमावप्रार्थः सहस्राक्षः विश्वामित्रमुवाचेत्यन्वयः २७ किंमुक्तवंतस्तदाहपुनेरति २८
तोषितावयमितिशेषः अनेनकर्मणानलप्रवर्तिततादकावधरूपेणस्नेहंदर्शयमदीयायमामः शिष्य इतिस्नेहमूलव्यापारं

180 शरेणोरमिविख्यायपपातचममारव तोहृतंभीमसंकाशांहृष्ट्वासर्पितिस्वदा २६ साधुसा
क्षिनिकाज्ञत्स्यसरस्वा पाभिपूजयन् उवाचपरमप्रीतः सहस्राक्षः पुरंदरः २७ सुरास्ससर्वे संहृ
ष्टाविश्वामित्रमथाब्रुवन् मुनेकौशिकभद्रंतेसेंद्राःसर्वेमरुद्गणाः २८ तोषिताःकर्मणाने
नस्तेहंदर्शयराघव प्रजापतेर्यज्ञसमुद्भवान्स्तम्पराक्रमात् २९ तपोवलसमृतोवलेन
राघवायनिवेदय यात्रभूतस्मतेवलंसंलब्धानुगमनेरतः ३० कर्तव्यस्समहत्कर्मसुराणांराज
सूनुना एवमुक्त्वासुराःसर्वेजग्मुर्हृष्टाविहायसं ३१ विश्वामित्रंपूजयन्तस्ततःसंध्याप्रव
र्तते ततोमुनिवरःप्रीतस्ताटकावधतोषितः ३२

प्रवर्तयतमेवव्यापारमाहप्रजापतेरिति २९ तपसाज्ञानेनवलेनवृद्धतः पूर्णाः तेनवदानसपात्रभूतस्मराघवः अनन्त
सेहृशान्समग्रान्निवेदय तथालब्धानामेवास्त्राणांकार्यंत्वमननमितिभावः अनुगमनेसमुद्युक्तोऽयमित्यन्वयः ३ पूजयं
तस्तवन्तोजग्मुरित्यन्वयः प्रवर्ततेतस्मिन्समयेइतिशेषः ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रामा०
वाटी० 181
५१

मुक्ताशापं प्रणगतो एवं यद्वालत्वं शापयतात्टकयामुक्तं २५ प्रभातवेलां प्रतिबोध्यमान इति विश्वामित्रेणेत्यादिजागारे
ति शेषः २९ इत्यार्षे रामायणे षड्विंशः २९ अथेति उष्येति प्रार्थं प्रहस्य विजयशालि राम दर्पेन जस्संतोष ज्ञो ह्यासः १ सर्वशः

ऋषिभिश्चाभिपूज्यायं देवं वनमब्रवीत् इहाद्य रजनीं राम वसाम शुभदर्शन २२ श्वः प्रभाते गमि
ष्यामस्तदाश्रमपदं मम विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मज २४ उवास रजनीं तत्र
ताटकाया वने सुखं मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि २५ रमणीयं विबभ्राज यथा चैत्र
रथं वनं २५ निहत्य तां यक्षसुतां स रामः प्रशस्यमानः सुरसिद्धसंघैः उवास तस्मिन्मुनिना
सहैव प्रभातवेलां प्रतिबोध्यमानः २९ इत्यार्षे रामायणे षड्विंशः २९ अथ तां रजनीमुष्य
विश्वामित्रो महायशाः प्रहस्य राघवं वाक्यमुवाच मधुरस्वरं १ परितुष्टोस्मि भद्रं ते राज
पुत्र महायशाः प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः २ देवासुरगणान्वापि सगंधर्वोर
गान्भुवि यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ३

सर्वाणि २ देवासुरगणान्वापि वाशब्दश्चार्थे गंधर्वोरगसहितान्देवासुरगणान्शपद्रून् अपि प्रसह्य बलेन जयिष्य
सि यदि वं येदयातदा वशीकृत्य संमोहनास्त्रादिना जेष्यसि अमेघास्त्रकागणनेति भावः ३ ५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दंडचक्रादयोऽस्त्रभेदाः ४ शूलवरं शूलवज्रनामकं क्वचित् शूलवरमिति पाठः ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रात् मतं ८ गदे द्वे मोदकीशि
खरीसंज्ञे द्वे गदे गदाख्ये अस्त्रके अस्त्रे १० अस्त्रं च वारुणास्त्रं वेत्यर्थः शुष्कार्द्रे संज्ञके द्वे अशनी अशनिसंज्ञके अस्त्रे ११ पिनाकि

182 नानिदिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः दंडचक्रं महद्दिव्यं तव दास्यामि राघव धर्मच
क्रं ततो वीर कालचक्रं तथैव च विष्णुचक्रं तथात्युग्रमैंद्रं चक्रं तथैव च ५ वज्रमस्त्रं नरश्रेष्ठ
शैवं शूलवरं तथा अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ८ ददामि ते महाबाहो ब्राह्ममस्त्र
मनुत्तमं गदे द्वे चैव काकुत्स्थ मोदकी शिखरी शुभे १० प्रदीप्ते नरशार्दूल प्रयच्छामि नृ
पात्मज धर्मपाशमहं राम कालपाशं तथैव च १ वारुणं पाशमस्त्रं च ददाम्यहमनुत्तमं अ
शनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनंदन ४ ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा आग्ने
यमस्त्रं दयितं शिखरं नाम नामतः १ वायव्यं प्रथमं नाम ददामि तव चानघ अस्त्रं हयशि
रो नाम क्रौंचमस्त्रं तथैव च ॥ शक्तिद्वयं च काकुत्स्थ ददामि तव राघव कंकालं मुसलं घो

नः इदं पैनाकं दयितं अग्नेरिति शेषः शिखरं नाम शिखरमिति प्रसिद्धं १ प्रथमं मान्यं ॥ कंकालादीन्यस्त्रधार्याण्यस्त्राणि १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रावा॰
वाटी॰ 183
५२

यानिरत्नसौवर्णार्थसमर्थानिददामीत्यन्वयः ११ वैद्याधरंविद्याधरसंबंधिनंदनंनामअस्त्रसिरत्नमित्यन्वयः यतोस्त्रादा
सीनांप्राडुर्भावइतिभावः १४ दमीत्यर्षेप्रशमनंदिमूल्येणक्रोधप्रशमकमस्त्रविज्ञापनंपरिदेवकारकं १५ मादनेप्र

वथार्थेरत्नसौयानिददाम्येतानिसर्वशः वैद्याधरंमहास्त्रंचनंदनंनामनामतः ११ असिरत्नं
महाबाहोददामिरववात्मज गांधर्वमस्त्रंदयितंमोहनंनामनामतः १४ प्रस्वादनंप्रशम
नंदग्निसौम्यंचराघव वर्षणंशोषणंचैवसंतापनविलापने १५ मादनंचैवदुर्धर्षंकंदर्प
दयितंतथा गांधर्वमस्त्रंदयितंमानवंनामनामतः १६ पैशाचमस्त्रंदयितंमोहनंनाम
नामतः प्रतीच्छनरशार्दूलराजपुत्रमहायशाः १७ तामसंनरशार्दूलसौमनंचमहाबलं
संवर्तंचैवदुर्धर्षंमौसलंवरपात्मज १८ सत्यमस्त्रंमहाबाहोतथामायामयंपरं सौरंते
जःप्रभंनामपरतेजोपकर्षणं १९ सोमस्त्रंशिशिरंनाममाष्टमस्त्रंसुदारुणं दारुणंचभग.
स्यापिशीतेषुमथमानवं २० एतानरामममहाबाहोकामरूपान्महाबलान् गृहाणपरमो

न्नृणांमदनंकंदर्पदर्षमित्यायस्वविशेषणं १६ प्रतीच्छगृहाण १७ सौमलंआस्त्ररस्त्रमलादस्यत १८ १९ २० २१ ५२

मंत्रग्रामं अस्त्राणां मंत्रसमूहमिति वा तत् ननु बलातिबलादानप्रसंगेपि मंत्रग्रामं ग्रहाणेत्युक्तमिति चेत् तत्र तदानं विफलमिति चेत्त्रग्र
हणे एवं तत्रोक्तत्वात् ननु ददावित्ति तेन तत्कालोपयोगी बलातिबलयोरेव तत्र दान इत्यत्रैषां मंत्रेति विवेकः इति कतकक्कृतः
वस्तुतो बलातिबले मंत्रसमूहात्मके इति न तद्रूपं मंत्रग्राममिति तत्रार्थ इति न दोष इति परे २२ सर्वेति येषां उक्तदिव्यास्त्राणां सर्वयाव
णकं तं दैवतैरपि दुर्लभं तदक्षरं देवाश्चापि यत्किंचिद् एहमेव ज्ञानं नीतिभावः तानि सर्वाण्यस्त्राणि राघवाय रामाय विश्वामित्रः

स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ददौ रामाय सुप्रीतो मंत्रग्राममनुत्तमं २१
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभं नान्यास्त्राणि ददौ विप्रो राघवाय न्यवेदयत् २२ जपत
स्तु मुनेस्तस्य विश्वामित्रस्य धीमतः उपतस्थुर्महार्हाणि सर्वाण्यस्त्राणि राघव २४ ऊचु
श्च मुदिता रामं सर्वे प्रांजलयस्तदा इमे च परमोदार किंकरास्तव राघव २५

निवेदयन् दत्तवान् राघवाय रामलक्ष्मणाभ्यां चेत्यपि बोध्यं गुणपदेवाभयोस्तूपदेशा इति बोध्यं २२ जपतः रामाय दातुं तेषां
वीर्यवत्तासंपादनाय तान्यस्त्राणि जपत इत्यर्थः उपतस्थुः गृहीतमात्रे मंडलवन्मूर्त्तिमंत उपतस्थुः उपस्थितानि विश्वामित्रानि
योगेन रामं च उपतस्थुः २४ सर्वमस्त्रदेवाः मुदिताः स्वाधिदेवता मस्तवं येन तुष्टाः किंकराः अंगीकृतदासत्वाः २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ओं॰
रामा॰
बाल॰
५६

185

समालभ्य उपस्पृश्य मानसाः सदा मनःस्थिताः यद्यपि भगवतो रामस्य सर्वं विदितमेव तथापि विद्या गुरूपदेशमपेक्षते इति बलदा
नामधेयानि लोकान् बोधयितुं विश्वामित्रत उपदेशग्रहणमिति बोध्यं २० इत्यार्षे सप्तविंशः सर्गः २७ गच्छन्नेवेत्यादि संहारा
न् ज्ञातुमिति शेषः उपसंहारापरिज्ञाने पुनः प्रयोगानर्हतयास्त्रस्य सम्प्राप्तस्यापि त्यागः स्यादिति ज्ञानेच्छा संहारो नाम प्रयुक्तस्यास्त्र

यद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबले २९ प्रति
गृह्य च काकुत्स्थः समालभ्य च पाणिना मानसा मे भविष्यध्वमिति तानभ्यचोदयत् ३०
ततः प्रीतमना रामो विश्वामित्रं महामुनिं अभिवाद्य महातेजा गमनायोपचक्रमे ३१ इत्यार्षे
सर्गः २७ प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनः शुचिः गच्छन्नेव च काकुत्स्थो विश्वामित्रमथा
ब्रवीत् १ गृहीतास्त्रोऽस्मि भगवन् दुराधर्षः सुरैरपि अस्त्राणां त्वहमिच्छामि संहारान्मुनिपुं
गवः २ एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः संहारान्व्याजहाराथ धृतिमान्सुव्रतः शुचिः ३

समं त्वविशेषेण पुनः स्वात्मनि स्थापनं २ एवमिति उपसंहारमार्गं न्यपदिशच्च अथानन्तरं तत्र स्वसंतुष्टः परमा
त्मदृष्टिः अस्त्राणां संहारानुपदिशतीति सतेः ३

५६

186

तदाहसमर्वंतमित्यादिददामितिसर्वत्रशेषः ४५९ सार्विमालादयोमेतोश्चद्दामीत्यर्थः ८५ भास्वरानतेजोमयान
प्रतीच्छग्रहाणपात्रभूतः ग्रसदानस्येतिशेषः १ वाढमित्यंगीकारेप्रहृष्टेनान्तरात्मप्रसन्नग्रहीदितिशेषः मूर्तिम

समर्वंतेसत्यकीर्तिंपूहंपरसमेवच प्रतिहृतनंनामपराङ्मुखमवाम्भवं ४ लक्ष्मी
लक्ष्मीविमोचैवहृढनामस्तनामको दक्षान्तशतवक्त्रोवदशशीर्षशानोदद्दौ ५ पद्मना
भमहानाभौडुंडनामस्तनामको ज्योतिषंसाऊनवैवनैराश्यविमलावुभौ ६ योगेयस्वि
निद्रौवदैत्यप्रमथनैातथा शुचिवाङ्महावाङ्तिष्ठलिविकृवत्तथा ७ सार्विमालीधृतिः
मालीवृत्तिमानरुचिरस्तथा पित्र्यःसौमनसश्चैवविधूतमकरावुभौ करवीरंरतिंचैवधन
धान्यौचराघव ८ कामरूपंकामरु विमोहमावरणंतथा दृभकंसर्वनाभंचपंथ्यानवरु
णौतथा ९ कृशाश्वतनयांरामभास्वरान्कामरूपिणः प्रतीच्छममभद्रंतेपात्रभूतोसिराघव १० वाढमित्येवकाऊत्स्थःप्रहृष्टेनान्तरात्मना दिव्यभास्वरदेहाश्चमूर्तिमंतःसखप्रदाः ॥

नःसर्वस्वदेवतारूपेण ॥ प्रह्वांजलिपुटाःप्रह्वानम्राःतेचतेःप्रांजलेःपुटंसंश्लेषोयेषांतादृशाः १२

इमेस्मसन्निहितावयमितिशेषः शाधि आज्ञापय १३ गम्यतामिदानीमितिशेषः कार्यकालेषु मानसाः मनसि सन्निहिता
भूत्वा मत्साह्यं करिष्यथ १४ प्रदक्षिणं सकलस्य देवताः पितृदैवतरूपत्वाद्रामस्य प्रदक्षिणकरणं १५ एतदुत्तरं ततस्त
रामः काकुत्स्थः शासनाद्दलवादिनः लक्ष्मणायवचनात्सर्वोस्त्वाह्वानाद्रघुनंदनः समुद्दारानससंहृष्टः श्रीमांस्तस्मेद

रामं प्राञ्जलयो भूत्वा ब्रुवन्मधुरभाषिणः इमेस्म नरशार्दूल शाधि किं करवाम ते १३ गम्यता
मिति तानाह यत्र श्रेष्ठं रघुनंदनः मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ १४ अथ ते राममा
मंत्र्य कृत्वा चापि प्रदक्षिणं एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतं १५ स च तान्राघ
वो ज्ञात्वा विश्वामित्रं महामुनिं गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् १६ किमेतन्मेघ
संकाशं पर्वतस्याविदूरतः वृक्षषंडमितो भाति परं कौतूहलं हि मे १७ दर्शनीयं मृगाकी
र्णं मनोहरमतीव च नानाप्रकारैः शकुनैर्वल्गुभाषैरलंकृतम् १८

त्वा वेदयदित्यधिकाद्दश्यते तत्प्रदक्षिणं बलातिबलयोर्विद्ययोः ग्रहणमपि द्युगपद्भयो विश्वामित्रेणैवोपदेशदानसं
भवात् स तानुपदिष्टानस्त्रान्राघवो रामः ज्ञात्वा मंत्रतो मूर्तितः प्रयोगतश्चेतिशेषः १६ मेघसंकाशका
र्ष्ण्यात्तैलेवियाच्च वृक्षषंडं वृक्षसमूहः किं वन संधिरुत्तवंश्चाश्रमसंबंधीतिप्रश्नः १७ वल्गुभाषैः मधुरभाषैः १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रोमहर्षणात् ताटकायानिर्जनीकरणात् तस्मभयानकत्वेनुरोमर्षहरणात्वं अनयादेशस्य स्वखवत्तयाइदमाश्रमपदंत्वम
गच्छामिग्रा आश्रमपदंत्वनिर्णीयतत्कस्यैतिशासेतिष्टच्छानिसर्वंचशास्त्रवेशाद्विविदितंतन्निज्ञास्नांतरंस्वयमेवाहंसंग्रामा

188

निःसृताःसम्मुनिश्रेष्ठकंताराद्रोमहर्षणात् अन्यात्ववगच्छामिदेशस्यस्वखवत्तया ॥
मेशंसभगवन्कस्याश्रमपदंत्विदं संप्राप्तायत्रतेपापाब्रह्मघ्नादुष्टचारिणः २० तवयज्ञ
स्यविघ्नायदुरात्मानोमहामुने भगवंस्तस्यकोदेशःसायत्रतवयाज्ञिकी २१ रक्षितव्या
क्रियाब्रह्मन्मयावध्याश्चराक्षसाः एतत्सर्वंमुनिश्रेष्ठश्रोतुमिच्छाम्यहंप्रभो २२ इत्यार्षे
रामायणेऽष्टाविंशःसर्गः २८ अथतस्याप्रमेयस्यवचनंपरिपृच्छतः विश्वामित्रो
महातेजाव्याख्यातुमुपचक्रमे १

इति नेत्रब्रह्मघ्नाः तवयज्ञस्यविघ्नाययत्रसंप्राप्ताः सदेशःकः २०
यत्रतवयाज्ञिकीक्रियामयारक्षितव्यायत्रचराक्षसावध्याः भगवंस्तस्यतदाश्रमस्यकोदेशःकःप्रदेशइत्यन्वयः २१
इतिटीकायांअष्टाविंशः २८ तस्यरामस्यपरिपृच्छतोवाचंतंप्रकृतेतिशेषः व्याख्यातुंदृष्टोनरामितिशेषः १

ॐ रामा
टी
५५

189

इहत्मनेरहप्रदेशे २ तपश्चरणयोगार्थं स्ववीर्येण लोकप्रवर्तनाय स्वतपश्चर्यां वामनस्य करिष्यमानवामनावतारस्य
विष्णोः पूर्वाश्रमः वामनावतारात्पूर्वकाले तपोयोगार्थं परिगृहीतत्वात्पूर्वाश्रमः १ सिद्धाश्रमत्वव्यवहारे जीवमाह हि
यस्मात् अत्र महातपा विष्णुः तपःसिद्धो जातः तस्मात् एतस्मिन्काले विष्णोस्तपःकाले ४ मरुद्गणान् अत्र वहादिवायुगणान्

इहाश्रमो महाबाहो विष्णुर्देवनमस्कृतः वर्षाणि सुबहूनीह तथा युगशतानि च २
तपश्चरणयोगार्थमुवास सुमहातपाः एष पूर्वाश्रमो राम वामनस्य महात्मनः १ सि
द्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः एतस्मिन्नेव काले तु राजा वैरोचनिर्बली ४
निर्जित्य दैवतगणान्सेन्द्रान्सह मरुद्गणान् कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः
यज्ञं चकार सुमहानसुरेन्द्रो महाबलः बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः समाग

नू कारयामास स्वार्थीणि च चकार इत्यर्थः यद्वा इंद्रादिराज्यं म्य स्वयं चैव विष्णुमूचुरिहाश्रमे ६
केश्चिद्देवकारयामास इत्यन्वयः ५. बलेर्यजमानस्य व्यवहारं दृष्ट्वेति शेषः साग्निपुरोगमनेनाग्निना सहिता इत्यर्थः अग्नि
मवलम्ब्य देवानां तस्मिन् पुरोगमत्वं स्वयं मेवागम्य न तु हृतमोवेन ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

190

यजतेकर्त्रभिप्रायत्वादात्मनेपदं ननुअशरीरस्यबलेर्देवहविषोयोगायनुपपत्तिः यागतर्पणीयदेवताभावात् इंद्रादीनांत
न्देहत्वात् नचशेष्टमात्रंदेवतेतिशक्यं अर्थवादप्रामाण्येनदेवतायाविग्रहवत्त्वस्यांतरमीमांसायांसिद्धांतितत्वात्तेचत्र
कर्मदेवआजानदेवभेदेनदेवानांद्वैविध्यात् तत्रयेकर्मणादेवत्वंप्राप्ताः तेकर्मदेवाः आजानदेवास्तुयज्ञमंत्राद्यर्थभूताः
मंत्रेणनित्यसंवेद्याः कर्मदेवेभ्यःप्राचीनाएवतत्कर्मदेवानांहितर्पणेनदोषः विहितकर्मप्राप्त्यातत्रकर्मदेवाएवयष्टा
यधिकाराभावोप्याजानदेवानामेवयष्टव्यदेवतांतराभावात् कर्मदेवानांत्वस्त्येव अतएवेंद्रादीनांयज्ञादिष्व

वलिर्वैरोचनेविश्वोयजतेयत्रमत्तमं असमामवतेतस्मिंस्तुकार्यमभिपद्यते १
येचैनमभिवर्तंतेयाचितारस्ततस्ततः यद्वदंत्ययथावद्धसर्वंतेभ्यःप्रयच्छति २

णांनानुपपन्नं इत्यत्रविस्तरः असमामवते असमास्तथस्वेस्वकार्यआत्मीयानांदेवानांकार्यंअभिपद्यतेसंपाद्यते १
असमामवतइत्युक्तेः प्रजाजनंदर्शयतस्तत्संपादने उपायमिंस्वयममेववदंति येचेति अभिवर्तंतेआसंवतिष्ठंतस्त
तः नानादेशेभ्यः यत्रभोभूहिरण्यादिविषये यद्वदस्तुयाचंतेतेभ्यःतत्सर्वंयथावत् यत्नमाङ्गुणपायश्रवमातादि
रहितंसत्कारपूर्वंप्रयच्छतिचोपवार्ये २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रावा
गाटी
५८

191

मायास्वतत्वाच्छादनेनप्राकृतमत्स्यादिभावप्रकाशशक्तिः तस्यायोगःसंबंधःतमाश्रितः वामनत्वप्रभावयंहेतुःवामनरूपस्यात्मा
श्चर्यत्वेनतस्याघनाविषयस्यावयंयजमानकर्तृत्वात्तयात्तद्रूपप्रार्थनं ९ एतस्मिन्नंतरेःदेवैर्वामनावताराप्रार्थनस्यसमयेरामेतिहि
संबंधनंस्वाश्रमस्वस्त्रियानेनरामपृष्टत्वमहत्त्वकथनेनहर्षातिशयोद्बोध्यं १० आदित्यासहितोवर्तंसमाप्यदेवीसहायस्त्व
छावेमर्थः देवीभुदितिरेव यहादेवीसहायस्तेनावरंदविसृष्टरूपपुत्रप्राप्त्युद्देशेनकृतव्रतांतेवरदानोत्सवं ।। श्लोकप्रकारमाह

सत्वंस्वरचितामाद्यमायायोगमुपाश्रितः वामनत्वंगतोविष्णोजगत्कल्याणमुत्तमं ९
एतस्मिन्नंतरेरामकश्यपोग्निसमप्रभः अदित्यासहितोरामदीप्यमानइवौजसा १० दे
वीसहायोभगवान्दिव्यंवर्षसहस्रकं व्रतंसमाप्यवरदंतुष्टावमधुसूदनं ११
तपोमयंतपोराशिंतपोमूर्तिंतपात्मकं तपसात्वांसुतप्तेनपश्यामिपुरुषोत्तमम् १२

तपोमयइत्यादि अन्नमयोप्ययतइतिवत् प्रचुरतपोयुक्तमित्यर्थः तावतापरेषां किमतआह तपोराशिंइष्टदृष्टान्नांसक
लतपोजफलप्राप्त्याभगवत्तपोराशित्वेनतुतपसोमयत्वेअप्रहेतत्स्फुर्तिबोध्यःअतआह तपोमूर्तिमितिएवंचतपस्त्वतत्स
त्वेननाद्वैतहानिः तपात्मकमितिचमर्थेकाविधानमितिकमस्यघत्तयनंतपः ज्ञानंतपआलोचनइतिधातुनसारात् त
दात्मकंज्ञानस्वरूपमित्यर्थः अतएवअतमतस्मादष्टुमशक्यइत्यतस्तपसात्वामिति १२

५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हृष्यमानं चैव राजन् रूपमित्यादि शरीरेणेत्यादि अनिर्देश्यः अशक्यपरिच्छेदः ।१२ वरं अभीष्टं वरार्हः दिव्यवर्षसहस्रत
तपसा वरदानयोग्यः ।१४ मारीचः मरीचिपुत्रः अदित्यादैः याचमानायाः इत्यादि शेषः ।१५ याचमानवरमाहः पुत्रत्व

192

शरीरेण तव पश्यामि जगत्सर्वमिदं प्रभो त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥१२ त
मुवाच हरिः प्रीतः कश्यपं धूतकल्मषं वरं वरय भद्रं ते वरार्होसि मतो मम ॥१४ तच्छ्रुत्वा
वचनं तस्य मारीचः कश्यपोब्रवीत् अदित्या देवतानां च मम चैवानुयाचितं ॥१५ वरं व
रद सुप्रीतो दातुमर्हसि सुव्रत पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ ॥१६ भ्राता भव यवी
यांस्त्वं शक्रस्यासुरसूदन शोकार्तानां तु देवानां साहाय्यं कर्तुमर्हसि ॥१७ अयं सिद्धाश्र
मो नाम प्रसादात्ते भविष्यति सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्नितः ॥१८ अथ विष्णु
र्महातेजा अदित्यां समजायत वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥१९

मित्यादि १६ यवीयान् कनिष्ठः साहाय्यं बलिच्छलनरूपं १७ अयं यज्ञाश्रमे तपो मया त्वं मया देवेश अनुभूयसे त्वर्थः
सिद्धे एतदाश्रमस्थितिसाध्ये तपः कर्मणि सिद्धे सति निष्पन्ने सति प्रयोजनाभावात् इत उत्तिष्ठ देवकार्यायेति शेषः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ 193
रावा-
वाटी
९७

आक्रमत्रिभिः पादैरिति शेषः लोकार्थी त्रैलोक्याक्रमणार्थी २० नियम्य बद्ध्वा २१ तेनैव वामनावतारकर्त्ता मयापि विश्वा
मित्रेण २२ पूर्वसर्गान्ते कृतद्वितीयप्रश्नोत्तरमाह एतमिति २३ अनुत्तमं सर्वोत्तमं हे तात तव तदाश्रमपदं यथा मम स्व

श्रीमता दानवश्रीमिदिता भ्रत्यगतश्च मेदिनी आक्रम्य लोकान् लोकार्थी सर्वलोकहिते रतः २०
महेन्द्राय पुनः प्रादान्नियम्य बलिमोजसा त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः २१ तेनै
व पूर्वमाक्रान्त आश्रमः श्रमनाशनः मयापि भक्त्या तस्यैव वामनस्योपभुज्यते २२ एतमा
श्रममायान्ति राक्षसा विघ्नकारिणः अत्र ते पुरुषव्याघ्र हन्तव्या दुष्टचारिणः २३ अद्य गच्छा
महे राम सिद्धाश्रममनुत्तमं तदाश्रमपदं तात तवाप्येतद्यथा मम २४ इत्युक्त्वा परमप्रीतो
गृह्य रामं सलक्ष्मणं प्रविशन्नाश्रमपदं व्यरोचत महामुनिः २५ शशीव गतनीहारः पुनर्व
सुसमन्वितः तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः २६ उत्पत्योत्पत्य सहसा विश्वामित्र
मपूजयन् यथार्हं चक्रिरे पूजां विश्वामित्राय धीमते तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियां

भूतं तथा तवापि विश्वावतारत्वादिति गूढोऽभिसंधिः २४ पुनर्वसू द्वे तारे २५ उत्पत्योत्पत्य संतोषातिशयादिति शेषः ५० २८

अत्रैवपूर्वेशदिनएवकालविलंबेफलाभावात् सिद्धाः वयन्तसिद्धाश्रमवर्थसिद्धसंज्ञः तेवचनः अत्रैवपुरुषव्याघ्रहंत
व्यादुष्टचारिणः इतियतस्त्वसत्यमस्तुवचस्तस्मात्सर्वथाहनिष्ये इतिभावः २९ नियतानियमहीतांतःकरणाः १० कुमाराववि
वस्कंदविषाणाविव ११ प्रशुचीअवतारतादशुचितसंभावनाराहितौ नप्रकर्षेणतः शुचीनियमेनकर्मभंजयेसमा

194

अद्यवदीक्षांप्रविशभद्रंतेमुनिपुंगवः सिद्धाश्रमोयंसिद्धः स्यात्सत्यमस्तुवचस्तव २९
एवमुक्तोमहातेजाविश्वामित्रोमहर्षिः प्रविवेशतदादीक्षांनियतोनियतेंद्रियः १० कु
माराविवतांरात्रिमुषितासुसमाहितौ प्रभातकालेचोत्थायपूर्वांसंध्यामुपास्यच ११
प्रशुचीपरमंजप्यंसमाप्यनियमेनच हुताग्निहोत्रमासीनंविश्वामित्रमवंदतां १२ इ
त्यार्षेरामायणेवाल्मीकीयएकोनत्रिंशः २९ अथतौदेशकालज्ञौराजपुत्रावरिंदमौ देशे
कालेचवाक्यज्ञावब्रूतांकौशिकंवचः १

पेत्यन्वयः दीक्षामध्येनाग्निहोत्रमितिनिषेधादिग्निहो
त्रपदमौपासनहोमपरमितिकेचित् १२ इतिवाल्मीके सर्गः २९ अथेतिकौशिकंवचोऽब्रूतामित्यन्वयः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ. 195 रा० बा० वा० टी० ५८

तौ निशाचरौ संरक्षणीयौ तत्संरक्षणाय निवारणीयौ ब्रह्मादित्वाच्छ्रः तत्क्षणं तत्कालः यथा नातिवर्तेत न नातिक्रमेत तथा ब्रूहीत्यन्वयः २ एवं विश्वामित्रे दृष्टे दीक्षया तस्य मौनित्वाद्दृष्ट्वा ऊचुः अद्येति मौनित्वं च गमिष्यति अद्यापि दीक्षितत्वान्मौनमेव प्राप्तः परममिषड्रात्रपर्यंतं मौनित्वं प्राप्स्यतीत्यर्थः ४ यत्तौ सन्नद्धौ परमधन्विनाविसर्थः विश्वामित्रं तद्यज्ञं ६ काले पंचाहोरात्रल

भगवंश्छ्रोतुमिच्छावो यस्मिन्काले निशाचरौ संरक्षणीयौ तौ ब्रह्मन्नातिवर्तेत तत्क्षणं २ एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ३ अद्यप्रभृति षड्रात्रं रक्षतां राघवौ युवां दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ४ तौ तु तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ अनिद्रं षडहोरात्रं तपोवनमरक्षतां ५ उपासांचक्रतुर्वीरौ यत्तौ परमधन्विनौ ररक्षतुर्मुनिवरं विश्वामित्रमरिंदमौ ६ अथ काले गते तस्मिन्षष्ठेऽहनि तदागते सौमित्रिमब्रवीद्रामो यत्तो भव समाहितः ७ रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया प्रज

क्षणे षष्ठेऽहनि आगते रतिच्छेदः प्राप्ते इत्यर्थः यद्वा षष्ठेऽहनि गते रात्राविसर्थः यत्तः सन्नद्धः समाहितः एकाग्रचित्तः ७ उपाध्यायो ब्रह्मा पुरोहित उपद्रष्टा इदं ऋत्विगंतराणामप्युपलक्षणं वेदिः ज्वलनेनासागमनहत्वकडमानः समाः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दर्भसहितचमसस्रुती समित्कुसुमोच्चयैश्च सहिता इदं वदीज्वलनं यज्ञोद्देशकं ९ संप्रवर्तते संप्रवर्तते स्म आकाशे म
हान् शब्दः प्रादुरासीत् १० यथा प्रावृषि गगनमावार्य गगनमावृत्य महाशनिमहागर्जनमहावर्षादिविविधकार्यकारी दृ
श्यते तथा मायाः प्रकटीकुर्वाणौ राक्षसावभ्यधावतां ११ कौ तौ का च सा माया येनाह मारीचश्चेत्यादि अवासृजन् ववृषुः १२

196

सदर्भचमसस्रुक्का ससमित्कुसुमोच्चया विश्वामित्रेण सहिता वेदिर्जज्वाल सर्त्विजा ९
मन्त्रवच्च यथान्यायं यज्ञोसौ संप्रवर्तते आकाशे च महान् शब्दः प्रादुरासीद्भयानकः १०
आवार्य गगनं मेघो यथा प्रावृषि दृश्यते तथा मायां विकुर्वाणौ राक्षसावभ्यधावतां ११
मारीचश्च सुबाहुश्च तयोरनुचरास्तथा आगम्य भीमसंकाशा रुधिरौघानवासृजन् १२
तां तेन रुधिरौघेण वेदिं वीक्ष्य समुक्षितां सहसाभिद्रुतो रामस्तानपश्यत्ततो दिवि १३
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् १४
पश्य लक्ष्मण दुर्वृत्तान् राक्षसान् पिशिताशनान् मानवास्त्रसमाधूताननिलेन यथा घनान् १५

समुक्षितां अभ्यासेः इति शेषः अभिद्रुतः अभिगतः शालाया धावात्ततः आह दृष्ट्वा ततो दिवि तानपश्यत् १३ आपतन्तौ स्वसमीपमा
गच्छन्तौ १४ मानवास्त्रसमाधूतान् करिष्यामि पश्येति योजना १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईदृशानस्थितात्स्वः शोषानुदर्कलाना १९ परमोदारं परमश्रेष्ठं ७ सतेनेति समारीचः सागरसंप्लवे समुद्रमध्ये १८ विचेतनं चैतन्यर
हितं गतपवविघूर्णमानं शीतेषुरितिमानवासनामांतरं हृदपहस्त्वा १९ शीतेषुशीतेषितपरनामकं मानवाहंमनुसंहितेम

कुरिष्यामि न संदेहो नात्र हे हेतुमीदृशान् इत्युक्त्वा वचनं रामस्थापे संध्याय वै भगवान् १९ मान
वं परमोदारं मत्त्वपरमभास्वरं चित्तेपपरमक्रुद्धो मारीचो वासिताघवः ७ संपूर्णयोजन
शतं तिमः सागरसंप्लवे सतेनपरमास्त्रेण मानवेन समाहतः १८ विचेतनं विघूर्णन्तं योज
नं शीतेषुवलपीडितं निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् १९ पश्य लक्ष्मण शी
तेषु मानवं मनुसंहितं मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते २० इमानपि वधिष्यामि नि
र्घृणान्दुष्टचारिणः राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् २१ इत्युक्त्वा लक्ष्मणं
चाशु लाघवं दर्शयन्निव विगृह्य सुमहच्चास्त्रमाग्नेयं रघुनंदनः २२ सुबाहूरसि चिक्षेप
स विद्धः प्रापतद्भुवि शेषान्वायव्यमादाय निजघान महायशाः राघवः परमोदारो मुनी
नां मुदमावहन् २३

नप्रसष्पुक्तं वियुज्यते वियोजयतीति यावत् २०-२२ निजघान हतोत्सारणपूर्वकं नाशनं वायव्यास्त्रफलं बोध्यं २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निरीतिकाः निराबाधाः २५ सत्यं कृतं अन्वर्थनामकं कृतमित्यर्थः २६ इति टीकायां त्रिंशः ३० एवं स्वयज्ञविघ्नविनाशफ
लसर्वाश्रसंवंधात् अग्रे हृष्टो भगवान् विश्वामित्रः सहजलक्ष्मीशालि सर्वथाग्रहायप्रवर्ततेत्याह प्रथेतित्रयस्त

198

स हत्वा राक्षसान्सर्वान्यज्ञघ्नान्रघुनंदनः ऋषिभिः पूजितस्तत्र यथेंद्रो विजये पुरा
अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् २५
कृतार्थोस्मि महाबाहो कृतं गुरुवचस्त्वया सिद्धाश्रममिदं सत्यं कृतं वीर महायशः स हि रा
मं प्रशस्यैवं ताभ्यां संध्यामुपागमत् २६ इत्यार्षे रामायणे बालकांडे सर्गः ३० अथ तां रजनीं
तत्र कृतार्थौ रामलक्ष्मणौ ऊषतुर्मुदितौ वीरौ प्रहृष्टेनांतरात्मना १ प्रभातायां तु शर्वर्यां
कृतपौर्वाह्णिकक्रियौ विश्वामित्रमृषींश्चान्यान्सहितावभिजग्मतुः २ अभिवाद्य मुनि
श्रेष्ठं ज्वलंतमिव पावकं ऊचतुर्मधुरोदारं वाक्यं मधुरभाषिणौ ३ इमौ स्म मुनिशार्दूल किं
करौ समुपागतौ आज्ञापय मुनिश्रेष्ठ शास

शालायां १ कृतौ पौर्वाह्णिकी क्रियाया भ्यां तौ अभिवादार्थं
मिति शेषः तत्कालेप्येवं सर्गांते संध्यामुपागमदिति सहगतो विश्वामित्रो होमार्थं यज्ञशालामागत इति बोध्यम् २ स

बालकांडटी० ७

श्रीरामायणबालकाण्डम् ३१ [illegible]

ॐ॰
बा॰ बा॰
बा॰ टी॰
१०० 199

तयोर्विदिताभ्यामिमसर्थे विश्वामित्रं पुरस्कृत्य पुरस्कृत्य विश्वामित्रानुमतिकारित्वादा वत् ५ मैथिलस्य मिथिलाधिपतेः परमधर्मिष्ठः उक्तदाशरथिनर्धर्मवान् परमेनिष्ठ्यक्य देवायपरमरामायस्मिन्निस्य यज्ञे रामं संबोधने ६ पूर्वं पूर्वस्मिन् काले देवतात्वशवीन जनकस्य यत्तेसदसिदेवनैर्हत्तयज्ञवेध्मप्रासादिताद्विवालुत्वेयत्तप्रसादितैः पिवस्रहितैर्दैवैर्दत्तं अप्रतस्त

एवमुक्ते तयोर्वाक्ये सर्व एव महर्षयः विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ५ मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयं ६ त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि अद्भुतं च धनूरत्नं तत्र त्वं द्रष्टुमर्हसि ७ तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः अप्रमेयबलं घोरं मखे परमभास्वरं ८ नास्य देवा न गंधर्वा नासुरा न च राक्षसाः कर्तुमारोपणं शक्ता न कथंचन मानुषाः ९ धनुषस्तस्य वीर्यं हि जिज्ञासंतो महीक्षितः न शेकुरारोपयितुं राजपुत्रा महाबलाः १० तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः तत्र द्रक्ष्यसि काकुत्स्थ

अतिष्ठतीति शेषः ८ तस्याद्भुतत्वमाह नास्येति आरोपणं शरसंधानयोग्यज्यासंबंधः न कथंचन न कथमपीत्यर्थः ९ तत्र मिथिलायां यज्ञे चेति यज्ञं द्रक्ष्यसि चेत्यन्वयः चकारादेणजा

200

ऊतस्तस्मादपरास्यधनुष्कस्त्रस्थितिस्तत्राहतद्धीति अस्मंतदङ्गः मैथिलीननिजयज्ञप्रीतदेवेभ्यः यज्ञफलत्वेनयाचितंप्रद्देरि
भूर्णजयायसर्वदेवतैःशिवसहितैःसर्वदेवैर्दत्तं अत्रस्तत्रतिष्ठतीत्यर्थः तडके पाद्यचापंयोभोदयादत्तमितिकौमेप्रीतस्यभ
गवानीशस्त्रिस्थूलीनीसलोहितः ददौदोषाद्धनाशार्थजनकायानुतंधनुरिति सुनाभंशोभननाभिवंधनस्थानं १२ आ

तद्धियज्ञफलंतेनमैथिलीनोत्तमंधनुः याचितंनरशार्दूलसुनाभंसर्वदैवतैः १२ आयाग
भूतंनृपतेस्तस्यवेश्मनिराघव अर्चितंविविधैर्गंधैर्धूपैश्चागुरुगंधिभिः १३ एवमुक्त्वामु
निवरः प्रस्थानमकरोत्तदा सर्षिसंघःसकाकुत्स्थआमंत्र्यवनदेवताः १४ स्वस्तिवोस्तु
गमिष्यामिसिद्धःसिद्धाश्रमादहं उत्तरेजाह्नवीतीरेहिमवंतंशिलोच्चयं १५ प्रदक्षिणंततःकृ
त्वासिद्धाश्रममनुत्तमं १५ इत्युक्त्वामुनिशार्दूलःकौशिकःसतपोधनः उत्तरांदिशमु
द्दिश्यप्रस्थातुमुपचक्रमे १६

यागभूतंयजनीयदेवताभूतमित्यर्थः वेश्मनीत्यस्यतिष्ठतीति
शेषः अत्रएवाह अर्चितमित्यादिश्यासम्भूतंनरपतेरितिक्वचित्पाठः तत्रापितस्यपतेश्चसिद्देवेनत्विग्जुत्यस्याष्टएवार्थः
देवतानांयागार्थंप्रवप्रतिमादौ १३ एवमुक्तेतिमहर्षिगणाग्रणोरित्यर्थः मुनिवरोविश्वामित्रः वनदेवताःव
नदेवताःवनदुर्गाद्याः १४ सिद्धःनिर्विघ्नयज्ञासिध्येतिभावः क्वगमिष्यसीत्यत्राह उत्तरेइति १५१६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ.
रावा.
वाली. 201
९१

अनुसारिणां उक्तदिगनुसारिणां पश्चाज्ज्ञापिनामितिवा शकटीशतमात्रं शकटीशतपरिच्छिन्नशाकल्यादेः पित्राग्निहोत्रसंभारादिमत्त्व
सवादिकं प्रथ्यं अनुगादितिसंबंधः १७ १८ यत्तिणोनिवर्तयामासेत्यनेनऋषीणामनिवर्तनमुक्तं तद्वाहतेगणेति १९

तं व्रजंतं मुनिवरमन्वगादनुसारिणां शाकटीशतमात्रं तु प्रयाणे ब्रह्मवादिनां १७ मृगप
क्षिगणाश्चैव सिद्धाश्रमनिवासिनः अनुजग्मुर्महात्मानं विश्वामित्रं तपोधनं १८ निवर्त
यामास ततः सर्षिसंघः सपक्षिणः ते गत्वा दूरमध्वानं लंबमाने दिवाकरे १९ वासं चक्रुर्मु
निगणाः शोणाकूले समाहिताः तेऽस्तं गते दिनकरे स्नात्वा हुतहुताशनाः २० विश्वामित्रं पुरस्कृ
त्य निषेदुरमितौजसः रामोपि सह सौमित्रिर्मुनींस्तानभिपूज्य च अग्रतो निषसादाथ वि
श्वामित्रस्य धीमतः अथ रामो महातेजा विश्वामित्रं तपोधनं २२ पप्रच्छ मुनिशार्दूलं कौ
तूहलसमन्वितः भगवन्कोन्वयं देशः समृद्धवनशोभितः २३

शोणा इति गिरिव्रजसमीपस्थो नदीविशे
षः इत्येतदुत्तरसर्गे स्पष्टं अस्तं गते अस्तंजितमिषतीत्यर्थः २०।२१।२२ अयं देशः शोणाकूलस्थः २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निखिलं वैभवमिति शेषः २५ इत्यार्षे रामायणे एकत्रिंशः सर्गः ३१ शोणाकूलदेशोद्भवप्रश्ने महं स्मारणामयं देशाः समत
स्मात् ब्रह्मयोनिरिति ब्रह्मपुत्रमित्यर्थः अक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति विग्रहः १ युक्तायां अशेषस्त्रीगुणयुक्तायामित्य

202

श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्वतः नोदितो रामवाक्येन कथयामास सुव्रतः त
स्य देशस्य निखिलमृषिमध्ये महातपाः २५ इत्यार्षे रामायणे बालकाण्डे एकत्रिंशः ३१
ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः १
स महात्मा कुलीनायां युक्तायां सुमहाबलान् वैदर्भ्यां जनयामास चतुरः सदृशान्सुतान् २
कुशाम्बं कुशनाभं च असूर्तरजसं वसुं दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया ३
तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यवादिनः क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलं ४ कु
शस्य वचनं श्रुत्वा चत्वारो लोकसत्तमाः निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ५ कुशा
म्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीं कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयं ६

२१

त्यर्थः असूर्तरजसं न विद्यते सूर्तं प्रसृतं रजो यस्य तं अजितियोगविभागाद्वृत्तं क्षत्रधर्मचिकीर्षया न तु स्मृतिहृत्किरणेच्छया
पालनं प्रजापालनम् ४ निवेशं सन्निवेशं ५ महोदयं महोदयनामकम् ६

एषागिरिव्रजाप्रपर्यया ८ समागधीनत्संज्ञात्रयथाविनिपद्धेत ९ मामागधीमगधादागतनयासागधीत्वेनप्रसि
द्धायासाएषाशोणा तस्मत्ठयपस्ववसोभवति पूर्वादिचरितातपूर्वादिक्‌गामिनीसत्तीव्राणाम्धिद्वयेपीतिशेषः ९

असूर्त्तरजसोनामधर्मारण्यंमहामतिः चक्रेपुरवरंराजावसुर्नामगिरिव्रजं ७ एषावसुम
तीनामवसोस्तस्यमहात्मनः एतेशैलवराःपंचप्रकाशंतेसमंततः ८ सुमागधीनदीर
म्यामगधान्विश्रुतायया पंचानांशैलमुख्यानांमध्येमालेवशोभते ९ सैषाहिमागधी
रामसुक्षेत्रासस्यमालिनी कुशनाभस्तुराजर्षिःकन्याशतमनुत्तमं १० जनयामासध
र्मात्माघृताच्यांरघुनंदन ११ तास्तुयौवनशालिन्योरूपवत्यःस्वलंकृताः ११ उद्यानभूमिमा
गम्यप्राहृषीवशतह्रदाः १२ गायंत्योनृत्यमानाश्चवादयंत्यस्तुराघव आमोदंपरमंजग्मु
र्वराभरणभूषिताः १३ अथताश्चारुसर्वांग्योरूपेणाप्रतिमाभुवि उद्यानभूमिमागम्य
ताराइवघनांतरे १४ ताःसर्वगुणसंपन्नारूपयौवनसंयुताः दृष्ट्वासर्वात्मकोवायुरिदंवच

घृताच्यांतन्नाम्निकाप्सरसि ११ ताःशतंकन्याः १२ आमोदंसंतोषं १३ घनांतरेमे नमब्रवीत १५
घमध्येताराइवरेजुरितिशेषः १४ १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

204

मकामनाश्रणेममदेवसमानुष्योपिभार्याभविष्यथेत्यादिर्वशीकरणायार्थवादः ननुमानुषीणांदेवसंबंधोऽनुचित
स्तत्राह मानुषस्त्यज्यतोभावइतिमदंगीकारमात्रेणविलक्षणशक्त्याविर्भावान्मानुषभावस्त्यागोस्त्वेवंभवतीनांसामर्थ्यं
भविष्यतितत्फलमाहदीर्घमिति ॥ मानुषेष्वहियतःविशेषेणनित्यमनुत्तणंयौवनंचलंचेचलंघ्यमाणमितियावत्
अतःमत्संबंधेनअक्षय्यंयौवनमित्याद्यन्वयः ॥ अपहास्यमहासपूर्वकमपमान्य ॥ अंतश्चरसीतिपूर्वार्धेनस्वभावज्ञ

अहंवःकामयेसर्वाभार्याममभविष्यथ मानुषस्त्यज्यतांभावोदीर्घमायुरवाप्स्यथ ॥ च
लंहियौवनंनित्यंमानुषेषुविशेषतः अक्षय्यंयौवनंप्राप्ताअमर्यश्चभविष्यथ ॥ तस्यतद्व
चनंश्रुत्वावायोरक्लिष्टकर्मणः अपहास्यततोवाक्यंकन्याशतमथाब्रुवन् अंतश्चरसि
भूतानांसर्वेषांसुरसत्तम प्रभावज्ञाश्चतेसर्वाःकिमर्थमवमन्यसे ॥ कुशनाभसुतादे
वसमस्ताःसुरसत्तम स्थानाच्च्यावयितुंदेवंरक्षामस्तुतपोवयं ॥

तावयाःसूचितानुषुभस्वभावायेदपामस्वभावोधिकइतिचेत्तत्राह प्रभावज्ञाश्चतेसर्वाः तथापिअस्मिंमाकांक्षीरितिभा
वः तस्माद्देवमननुचितप्रार्थनयाअस्मान्नवमाननमनुचितमित्याह किमर्थमित्याह किमर्थमित्यादि ॥ स्वप्रभावंदर्श
यंतिकुशनाभेत्यादिस्थानाच्चावाबुपदात् देवमपित्वांच्यावयितुंसमर्थाइतिशेषः रक्षामस्त्विनिपातेनतथाकरणेहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· रावा· वासी· १·१ 205

हे दुर्मेधः दुर्बुद्धे यत्र काले पितरमवमन्य अप्रमानविषयं कृत्वा स्वधर्मेण कामेन स्वयंवरमुपास्महे आत्मना स्वातंत्र्येण
वयं वरं संगीकुर्मः स कालः कदाचिदपि मास्त्वित्यन्वयः नावमेत्यपि पाठस्तत्र काविकौः पपाठः तथा पाठे नञ्भ्यस्ति छेदः छांदसो दे
दिनं तः अस्माकं स कालो मा भूदित्यन्वयः क्वचित् नो वमन्यस्वेति पाठः अतएव मा भूत्स कालो यत्रास्तो पितरं सत्यवादिनं

मा भूत्स कालो दुर्मेधः पितरं सत्यवादिनं अवमन्य स्वधर्मेण स्वयंवरमुपास्महे २१ पिता
हि प्रभुरस्माकं दैवतं परमं च नः यस्य नो दास्यति पिता स नो भर्ता भविष्यति २२ तासां तु व
चनं श्रुत्वा हरिः परमकोपनः प्रविश्य सर्वगात्राणि बभंज भगवान्प्रभुः २३ ताः कन्या वायु
ना भग्ना विविशुर्नृपतेर्गृहं प्रविश्य च सुसंभ्रांताः सलज्जाः साश्रुलोचनाः २४ स च ता दयिता
भग्नाः कन्याः परमशोभनाः दृष्ट्वा दीनास्तदा राजा संभ्रांत इदमब्रवीत् २५ किमिदं कथ्य
तां पुत्र्यः को धर्ममवमन्यते कुब्जाः केन कृताः सर्वाश्चेष्टंत्यो नाभिभाषथ २६

कामतः सत्यमिति कम्यप्रवरे ये मस्वयंवरं इमे दत्तर्थं विवराणस्मो कोहरणने का वित् २१ तत्र वीजमाह पिता हीति २२
हरिः वायुः क्वचित् वायुरित्येव पाठः २३ सलज्जाः अन्याय्य पति प्रसंगतः सलज्जाः २४ भग्नाः भग्नांगाः २५ धर्ममव
मन्यते बलात्कारं करोतीति यावत् रोदनादि ताश्चेष्टंत्यः किं नाभिभाषध्ये इत्यन्वयः २५ २६

१·१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवेष्टेतिशेषः समार्थिसंदर्शति तद्वचः श्रवणैकाग्रचित्तोऽभूदिसर्थः २० इत्यार्षे रामायणे सर्गः ३२ तस्येति वरयोः स्पृष्टान
मस्तहत्य १ प्रसह्यधर्षयितुं अभिभावितुं इच्छति स्म अशुभं वलात्काररूपं अवेदत्तस्य २ पितृमन्तः पित्रधीनाः स्वच्छन्दपति·
स्वीकारविषयं स्वातंत्र्येन स्थिताः नवर्तामहे यतः अतो नः पितरं वृणीष्व यदि नः अस्मान्नत्वम्प्रसदास्यति तदा तव वदीयाः

एवंराजाविनिश्चस्यसमार्थिसंदधेततः २० इत्यार्षे रामायणे बालकांडे द्वात्रिंशः सर्गः ३२
तस्यतद्वचनंश्रुत्वाकुशनाभस्यधीमतः शिरोभिश्चरणौस्पृष्ट्वाकन्याशतमभाषत १
वायुःसर्वात्मकोराजन्प्रधर्षयितुमिच्छति अशुभंमार्गमास्थायनधर्मंप्रत्यवेक्षते २
पितृमत्यःस्मभद्रंतेस्वच्छंदेनवयंस्थिताः पितरंनोवृणीष्वत्वंयदिनोदास्यतेतव ३ ते
नपापानुबंधेनवचनंनप्रतीच्छता एवंब्रुवत्यःसर्वाःस्मवायुनाभिहताभृशम् ४ तासां
तद्वचनंश्रुत्वाराजापरमधार्मिकः प्रत्युवाचमहातेजाःकन्याशतमनुत्तमम् ५

भविष्यामः तेन भद्रं ते अस्तु इति योजना ३ एवं ब्रुवतीनां नो वचनं न प्रतीच्छता अनंगीकुर्वता पापानुबंधेन अधर्म वद्ध
चित्तेन एवं धर्मं ब्रुवत्यः सर्वा वायुना अभिहताः स्म इति योजना ४ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

207

हेप्रज्ञः त्वमावतो त्वमावद्भिः कर्तमं देयत् त्वं तं त्वमानन्त्वम महत्कृतं मदतीत्वमाकृतेति यावत् गाचमंगोप्यक्रोधवेगसहवम
तिदुष्करमितिभावः यच्चकुलेअवेत्तितंकाम वेगसहेन कृतं तदपि सुमहत् ८ प्रकर्षस्यवेति अविशेषतिएणोषः तदुत्व
ष्करं यत् त्रिदशविषयेत्वां तं कामवेगसहनं कृतं तत् अतिदुष्करं तेषां आभिरूप्यादिकामनीयगुणवाहुल्यात् ९ स्वक
न्यानां त्वमेनाप्राप्यतादृशी त्वं स्वकुले प्राध्यते यादृशी प्रजाकं त्वमातादृशीअस्माकुले सर्वासामविशेषः

त्वं तेत्वमावतो प्रज्ञः कर्तव्यं सम महत्कृतं । येकमत्पमप्यापामपकुलं चावेदितं मम ८ अलं
कारोहि न भीर्णां त्वमातप्रकर्षस्य वा दुष्करं तच्च वै त्वांतं त्रिदशेषु विशेषतः ९ यादृशी च त्वमा
प्रज्ञः सर्वासामविशेषतः त्वमादानं त्वमासस्त्वं त्वमायत्नस्य पुत्रिकाः ८ त्वमायशः त्वमाध
र्मः त्वमायाविष्टितं जगत विस्मयकमाकाजैतया जाता त्रिदशविक्रमः ९ मंत्रेत्वां मंत्रयामास
प्रदानं सह मंत्रिभिः देशकाले च कर्तव्यं सहृशे प्रतिपादनम् १०

अथवा विशेषतः सकलस्त्रीप्ररूपाविशेषेणेत्यर्थः त्वमायाः प्रार्थनीयत्वेनिमित्तमाह त्वमेत्यादिना न सत्यवचनयज्ञ
समाधिजसकलयज्ञफलात्त्वमासकेलज्ञमादायाम्भूताचत्त्वमातः सोपादयोत्यर्थः ८९ प्रदानं कस्यायथानेऽचिते देशे
कालेसदृशे स्वकुलादिसदृशेणो प्रदानं कर्तव्यं इतिमंत्रणप्रक्रमः १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऊर्ध्वरेता ब्रह्मचारी ब्राह्मं तपः ब्रह्मविषये चित्तैकाग्र्यं मनसश्चेंद्रियाणां चैकाग्र्यं परमं तप इति स्मृतेः ॥ ११ ॥ यदा चूली तप आस्थितः तदा
ऊर्मिलातनया सोमदा नाम गंधर्वी तं पर्युपास्ते मम पुत्रानुग्रहं करिष्यतीति प्रार्थनया सेवते स्म पर्युपासनं तत्र [illegible] शब्दलिंगार्थः १२ अक
नमिति प्रतियोगे द्वितीया तत्सामीप्ये प्राप्ते सर्थः १३ कालयोगेन सुप्रसन्नो जातः इति धर्मपरिपाकार्हकालसंबंधेन अनेन द्वितीया

208

एतस्मिन्नेव काले तु चूली नाम महाद्युतिः ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ११ ॥ तप
स्यन्तमृषिं तत्र गंधर्वी पर्युपासते सोमदा नाम भद्रं ते ऊर्मिलातनया तदा १२ सा च तं प्रणता भू
त्वा शुश्रूषणपरायणा उवास काले धर्मिष्ठा तस्यास्तुष्टोऽभवद्गुरुः ॥ स च तां कालयोगेन प्रो
वाच रघुनंदन परितुष्टोऽस्मि भद्रं ते किं करोमि तव प्रियं १४ परितुष्टं मुनिं ज्ञात्वा गंधर्वी मधुर
स्वरं उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदम् १५ लक्ष्म्या समुदितो ब्राह्म्या ब्रह्मभूतो म
हातपाः ब्राह्म्येण तपसा युक्तं पुत्रमिच्छामि धार्मिकम् १६

शितोः अकल्मषतपः महद्भिः स्वविताः १५ ब्राह्म्या लक्ष्म्या ब्रह्मवर्चसेन ब्रह्मभूतः ब्रह्मात्मभावनया अत एव महातपाः यतः
स्त्वमीदृशः अतः ब्राह्म्येण तपसा युक्तं पुत्रमिच्छामि ब्राह्मं तपः ब्रह्मविषयमैकाग्र्यं यद्वा ब्राह्म्यं तपः स्वाध्यायः १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· रामा· वाटी· १·५ 209

ननु पुत्रप्रार्थनायत्नात्सुविनीतात्तत्राह अपतिरस्मीत्यादि अपतिरस्मि इत्यादि। तथापि अस्मि अहं न कस्यचित् भार्या भविष्यामीति शेषः अनेन नैष्ठि
कब्रह्मचारिणीत्वमुक्तं अपि यथा पुत्रा वाग्मि भवति तथा ते भद्रं अनुग्रहोस्तु नन्वेवं नैष्ठिकब्रह्मचर्ये कथं पुत्रलाभः स
भावोत्तत्राह ब्राह्मेणेति उपनतायाः किं करिष्यामीत्याशयाः ब्राह्मेण ब्रह्मसंबंधिना उपायेन मे सुतं देहि ब्राह्मणस्य सनका
देरिव मानसः पुत्रो देय इति भावः ७ तस्याः सोमदायाः किं नाकामाभिसरतः चूलिननामा ब्रह्मर्षिभिः ब्राह्मं ब्रह्मतपसा उ

अपतिरस्मि भद्रं ते भार्या वास्मि न कस्यचित्। ब्राह्मेणोपगतायाश्च दातुमर्हसि मे सुतं
तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ ब्राह्ममनुत्तमम्। ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतं १८ स राजा
ब्रह्मदत्तस्तु पुरीमध्यवसत्तदा। कांपिल्यां परया लक्ष्म्या देवराजो यथा दिवि १९ स बुद्धिं कृतवा
न्राजा कुशनाभः सुधार्मिकाः। ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा २० तमाहूय म
हातेजा ब्रह्मदत्तं महीपतिः। ददौ कन्याशतं राजा सुप्रीतेनान्तरात्मना २१ यथाक्रमं तदा पा

णिं जग्राह रघुनंदन। ब्रह्मदत्तो महीपालस्ता
के ब्राह्मणा दत्तवान् ब्रह्मदत्त इति ख्यातं मानसं सुतं ददावि
त्यन्वयः फलीफलिन इति वत् चूली चलिन इति वत् चूली चलिन इति अयं नाम द्वयं साधु १८ राजा गंधर्व्याः सोमदायाः त्विति
यात्वान् कांपिल्यां कंपिलेन निर्वृता १९।२०।२१ देवपतिर्यथा इंद्रः सहशोमहीपालः ता उर्यः २२ १·५

तदा तेन वायुना पाणौ स्पृष्टमात्रे ताः कन्याः विकुब्जाः कुब्जत्वरहिताः आसन्निति शेषः ब्राह्मतपोयुक्तत्वादेवं हि महर्षी राज्ञः
एवं वसति तदा तत्कन्याशतं परया लक्ष्म्या बभौ विरराजेत्यन्वयः २३ स राजा वायुना मुक्ता दृष्ट्वेत्यन्वयः भग्ना इति पाठस्तु विरसः के
चित्तु तस्माद्देहपूर्वं भग्ना इति व्याचख्युः २४ प्रेषयामास काम्पिल्यामिति शेषः २५ सदृशीं क्रियां दारक्रियामित्यर्थः प्रतिनन्दनप्र

210

स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः युक्तं परमया लक्ष्म्या बभौ कन्याशतं तदा २३
स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः बभूव परमप्रीतो हर्षं लेभे पुनः पुनः २४ कृ
तोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिः सदारं प्रेषयामास सोपाध्यायगणं तदा २५ सोमदापि सुतं
दृष्ट्वा पुत्रस्य सदृशीं क्रियाम् यथान्यायं च गन्धर्वी स्नुषास्ताः प्रत्यनन्दत स्पृष्ट्वा स्पृष्ट्वा च ताः कन्याः
कुशनाभं प्रशस्य च २६ इत्यार्षे रामायणे बालकाण्डे त्रयस्त्रिंशः सर्गः ३३

कारमाह स्पृष्ट्वेत्यादि प्रशस्य वचनेनेत्यर्थः आश्चर्यमासीत् धैर्यं यद्देवशप्तस्याप्यनादरः यन्नायं राजा यस्मै इह पपरस्ताः स्नुषा मे भा
गधेयस्य मे ईदृशः स्नुषाः इत्येवं प्रतिदिनं ब्रुवाणा स्त्री महात्म्यं च दर्शितं २६ इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे त्रयस्त्रिंशः सर्गः

३३ ३३ ३३ ३३

ॐ·
रावा·
वाटी·
१९ 211

ब्रह्मदत्ते चेति चस्त्वर्थः कस्माच्छांतसमस्तद्यापार्थो वा पुत्रलाभाय पुत्रमामये १ कुशः कुशनाभपिता २ कुशवाक्यमाह
पुत्रइत्यादि सदृशः त्वत्सदृशः कौशोत ब्राह्मगाधिं गाधिनामानं प्राप्स्यसि तेन लोके शाश्वतीं कीर्तिं च प्राप्स्यसि ३ कुशेना
मेति पाठे पतत्कुशाद्युत्तं नाम प्रसिद्धमित्यर्थः आकाशमाविश्य आकाशरूपो भूत्वा अनेन तस्य मुक्तत्वं सूचितं तेन स्ववंश

कृतोद्वाहे गते तस्मिन्ब्रह्मदत्ते च राघव अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् १ इष्ट्यांतु
वर्तमानायां कुशनाभं महीपतिम् उवाच परमोदारः कुशो ब्रह्मसुतस्तदा २ पुत्रस्ते सदृ
शः पुत्र भविष्यति सुधार्मिकः गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीं ३ एवमुक्त्वा कुशो
राजन् कुशनाभं महीपतिं जगामाकाशमाविश्य ब्रह्मलोकं सनातनं ४ कस्यचित्त्वथ काल
स्य कुशनाभस्य धीमतः जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ५ स पिता मम काकुत्स्थ गा
धिः परमधार्मिकः कुशवंशप्रसूतोस्मि कौशिको रघुनंदन ६ पूर्वजा भगिनी चापि मम रा
घव सुव्रता नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ७

स्य महात्म्यातिशयः सूचितः ४ कस्यचि
त्त्वथ कालस्य कस्यचित्कालस्यानंतरमित्यर्थः ५ मम विश्वामित्रस्य कुशवंशप्रसूतत्वादहं कौशिकः ६ न केवलमहमेव
गाधेः पुत्रः पूर्वजा ज्येष्ठा नाम्ना सत्यवतीति प्रसिद्धनामा ऋचीके प्रतिपादिता ऋचीकाय दत्ता इति नाम प्रसिद्ध ७

१९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सशरीरस्वर्गंगतोहेतुर्भर्तारमनुवर्तिनीतिसहगमनंहृतवतीत्यर्थः अपिचअस्यदपितस्याअपितिकौशिकीनाम्नीमहानदीत
द्रूपाप्रवृत्ताचजाता ८ हितकार्यार्थइतिकामार्थमितिपाठेहितेआमुष्मिकंकामःऐहिकंतदुभयदानी ९ यतोभगिन्यांस्ने
हसंयुक्तः अतः हिमवत्पार्श्वेकौशिक्यांनियतःनित्यंसुखंवसामित्यन्वयः १० सत्यव्रतस्यावासस्तदासासतीति सत्येधर्मेइ

212

सशरीरागतास्वर्गंभर्तारमनुवर्तिनी कौशिकीपरमोदाराप्रवृत्ताचमहानदी ८ दिव्या
पुण्योदकारम्याहिमवंतमुपाश्रिता लोकस्यहितकार्यार्थंप्रवृत्ताभगिनीमम ९ ततो
हंहिमवत्पार्श्वेवसामिनियतःसुखं भगिन्यांस्नेहसंयुक्तःकौशिक्यांरघुनंदन १० सातुस
त्यवतीपुण्यासत्येधर्मेप्रतिष्ठिता पतिव्रतामहाभागाकौशिकीसरितांवरा ११ अहंहि
नियमाद्रामहित्वातांसमुपागतः सिद्धाश्रममनुप्राप्यसिद्धोस्मितवतेजसा १२

प्रतिष्ठितातज्जलपानादिनासस्नातमनोननिवर्ततइतिभावः ११ नन्वेवंकथंसिद्धाश्रमेस्थितिरतआह अहंहीति नियमाद्
गयापिंडदानवसिद्धाश्रमेकसाध्ययागजन्यसिद्धिहेतोः आगमनकार्यंचत्वदनुग्रहात्सिद्धमित्याह सिद्धाश्रममित्यादि १२
ॐनमोभगवतेवासुदेवायनमोनमः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· गवा· वाटी· १०७ 213

उपसंहरति एषेति मम गाधेः सकाशादुत्पत्तिः कीर्तिता स्वस्य स्ववंशस्य उत्पत्तिः ब्रह्मपुत्रात्कुशात् उत्पत्तिकीर्तिता देशस्य शो
णाह्वलीयगिरिव्रजदेशस्य पृच्छसि पर्यपृच्छः तत्सर्वमुक्तमिति शेषः १२ अतः परं न प्रष्टव्यमित्याह गत इति विघ्नः गतप्राय
निनिद्राभावप्रयुक्तजाड्यमलः १४ अर्धरात्रविह्वलानाह निष्पंदा इति पदिचलनाभावादिति भावः तदाह निलीना इति १५

एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता देशस्य हि महाबाहो यन्मां त्वं परिपृच्छसि १२
गतोऽर्धरात्रः काकुत्स्थ कथाः कथयतो मम निद्रामभ्येहि भद्रं ते मा भूद्विघ्नोऽध्वनीह नः १३
निष्पंदास्तरवः सर्वे निलीना मृगपक्षिणः नैशेन तमसा व्याप्ता दिशश्च रघुनंदन १५ शनैर्वि
सृज्यते संध्या नभो नेत्रैरिवावृतं नक्षत्रतारागहनं ज्योतिर्भिरवभासते १६ उत्तिष्ठते च शीतांशुः
शशी लोकतमोनुदः ह्लादयन्प्राणिनां लोके मनांसि प्रभया स्वया १७ नैशानि सर्व
भूतानि प्रचरंति ततस्ततः यक्षराक्षससंघाश्च रौद्राश्च पिशि

शनैर्विसृज्यते विमुक्तेत्यर्थः वर्तमानसामी
प्ये भूते लट् संध्याशब्देन तदुपासनयोग्यगौणकालस्याहि सेनसार्थयाद्रूपः नक्षत्रतारागहनं भस्महह्नात्वत् नेत्रैरावृत
मिव जतज्योतिर्भिः नटविमिभिः अवभासते १६ उत्तिष्ठते उदेतीत्यर्थः कर्मणि इति तङ् नैशानि निशाप्रभवानि निशामेवाह यक्षेत्या

८ १४ १०७

ग्रभ्यपूजयन् १९ स्तुतिप्रकारमाह कुशिकानामित्यादि ब्रह्मोपमाः ब्रह्मर्षितुल्याः २० हे महायशो यद्विश्वामित्र भवानेव
विशेषेण महात्मेति शेषः यस्य तपसा ब्राह्मण्यं त्वं प्राप्स्यसीति भावः किंच यस्य तव भगिनी तव कुलस्योद्योतकरी उत्सवकरी स

214

एवमुक्त्वा महातेजा विरराम महामुनिः साधु साध्विति तं सर्वे मुनयो ह्यभ्यपूजयन् १९ कुशि
कानामयं वंशो महान्धर्मपरः सदा ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः २० विशेषे
ण भवानेव विश्वामित्र महायशाः कौशिकी सरितां श्रेष्ठा कुलोद्योतकरी तव २१ मुदितैर्मु
निशार्दूलैः प्रशस्तः कुशिकात्मजः निद्रामुपागमच्छ्रीमानस्तंगत इवांशुमान् २२ रामोऽपि
सहसौमित्रिः किंचिदागतविस्मयः प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते २३ इत्यार्षे रा
मायणे चतुस्त्रिंशः ३४ उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः निशायां सुप्रभातायां वि
श्वामित्रोऽभ्यभाषत १ सुप्रभाता निशा राम पूर्वा संध्या प्रवर्तते उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभि

रितां श्रेष्ठा अनेन सकलजगदुद्धारकत्वं तस्याः सूचितं २१ प्रशस्ताः स्तुतः अस्तंगत इवांशुमानिति पाठः २२ सेवते सेवते स्म
२३ इत्यार्षे रामायणे तिलके बालकांडे चतुस्त्रिंशः सर्गः ३४ रात्रिशेषं उपास्य निद्रया अतिवाह्य । गमनाय गमनं कर्तुं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रामा॰
बाटी॰
१०८

215

अयंशोणइति शोणोवशोणइतिवयदिष्टा कतरेणयथासंतरिष्यामहेइत्यन्वयः प्रभवीजमगाधइति अतलस्पर्शीइत्यर्थः ४ उद्दिष्टःमंतव्यत्वेननिश्चितः ५ सारसःपक्षिविशेषः ७ वासपरिग्रहंसमार्जनादिनाआवसथ्यानेवचक्रुरित्यर्थः ८ अमृतवत्

तच्छ्रुत्वावचनंतस्यकृतपूर्वाह्णिकक्रियः गमनंरोचयामासवाक्यंचेदमुवाचह १ अयंशोणः शुभजलोगाधःपुलिनमंडितः कतरेणपथाब्रह्मन्संतरिष्यामहेवयं ४ एवमुक्तस्तु रामेणविश्वामित्रोब्रवीदिदं एषपंथामयोद्दिष्टोयेनयांतिमहर्षयः ५ तेगत्वादूरमध्वानं गतेर्धदिवसेतदा जाह्नवींसरितांश्रेष्ठांददृशुर्मुनिसेवितां ६ तांदृष्ट्वापुण्यसलिलांहंससा रससेवितां बभूवुर्मुनयःसर्वेमुदिताःसहराघवाः ७ तस्यास्तीरेततश्चक्रुस्तेआवासपरिग्रहं ततःस्नात्वायथान्यायंसंतर्प्यपितृदेवताः ८ हुत्वाचैवाग्निहोत्राणिप्राश्यचामृतवद्धविः विविशुर्जाह्नवीतीरेशुभामुदितमानसाः ९ विश्वामित्रंमहात्मानंपरिवार्यसमंततः वि ष्ठिताश्चयथान्यायंराघवौचयथार्हतः स

प्रवहस्सतारमितिविश्वामित्रस्यावधेहं

अमृततत्त्वस्यपंचयज्ञावशिष्टमन्नं यद्वाःअमृतवत् तत्सदृशंगं गाजलंहविश्वप्राशंकमाप्स्येहत्यर्थः ९ विष्ठिताःविशेषेणस्थिताः यथार्हतः यथावस्थानमर्हतस्तथास्थितावित्यर्थः १०

१०८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गंगाश्रोतुं गंगाविषयं किं विश्वोतुमित्यर्थः श्रोतव्यं विषयमाह त्रैलोक्यमित्यादि ॥ वृद्धिं त्रैलोक्यव्याप्तिरूपां ।२ धातूनां
स्वर्णादीनां ।३ या मेरुदुहिता मेना मनसा तयोः कन्ययोर्माता मेनेत्यन्वयः ।४ तस्यां मेनायां या ज्येष्ठा हिमवतः सुता कुटिलाना

216 भगवन् श्रोतुमिच्छामि गंगां त्रिपथगां नदीं त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिं ॥
चोदितो राम वाक्येन विश्वामित्रो महामुनिः वृद्धिं जन्म च गंगाया वक्तुमेवोपचक्रमे शै
लेंद्रो हिमवान् राम धातूनामाकरो महान् तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि ।२
या मेरुदुहिता राम तयोर्माता सुमध्यमा नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया ।३
तस्यां गंगेयमभवत् ज्येष्ठा हिमवतः सुता उमा नाम द्वितीयाभूत् कन्या तस्यैव राघव ।४
अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया शैलेंद्रं वरयामासुर्गंगां त्रिपथगां नदीं ।५ द
दौ धर्मेण हिमवांस्तनयां लोकपावनीं स्वच्छंदपथगां गंगां त्रैलोक्यहितकाम्यया ।६

मन्सां इयं गंगा अभवदित्यर्थः तस्यैव हिमवतः ।५ देवकार्यं वक्ष्यमाणं भववीर्यधारणं त्रिपथगां स्वर्गभूपातालमार्गगां इदं
वर्तमानापदेशेन वराणां च यस्याः शिवभार्यात्वाय ।६ धर्मेण कन्यादानधर्मेण स्वच्छंदपथगामित्यपि वर्तमानापदेशेन स्वच्छं

२

ॐ. 217
रा.वा.
वा.टी.
१०९

त्रिलोकार्थं तारकतोभीतत्रिलोकरक्षकब्रह्मप्रार्थनार्थं अगच्छन ब्रह्मलोके नेत्रब्रह्मणा पवमाजलरूपता प्राप्तिनादिवाम
नपुराणोक्तदिशा मध्ये कुर्वन्वामनपुराणे हननात सप्तायणाद प्रत्यभिज्ञानात एवं हि त्राख्यायिका उमाज्येष्ठा कुटिला ना
महिमवत्कन्या देवैः शिववीर्यधारणाय हिमवन्तं प्रार्थितो तेन तदनया सह देवा ब्रह्मलोकं गत्वा ब्रह्मणे निवेदितवन्तः ब्रह्म
ब्रह्मणा च मम सर्व्वयत्तद्धारणे समर्थाः स्वरूपं धारयामीति कथितवाक्याः वृत्तान्तेन ब्रह्मणा जलरूपा भवेति शापात्तेन च ब्रह्माण्ड
धं कटाहे जलरूपेण जगद्भिश्रितात् तस्यामेव ग्रिनाशप्य वीर्यं हि ममिति: विलम्बिगण प्रसरता कटाहे मेदिते वरान्तकुटिला
विस्तुपादाता न सपाता कुलितानततः तस्माद्धि स्तुपदी त्याने निवामनपुराणे केरेव ब्रह्माण्डधं कटाहे लग्ने तिष्ठायते

प्रतिगच्छत्रिलोकार्थं त्रिलोकहितकांक्षिणः गंगामादाय ते गच्छन् कृतार्था नोतनात्म

पतनसमये च ब्रह्माण्डवाह्यजलेन सहैव पतितं तज्जलं ब्रह्मणः कमण्डलो धृतं वाक्यजलं वशिवावंद ना १८
वामज्ञाते नारायणलकमिति कामिकासंहितादौ स्पष्टं ततो भगवता यदा वशोपणेनैव कमण्डलुजलेन तस्मा
दवक्षालनं कृत्वा तज्जलं कमण्डलौ वव्रिमे शंकरसंहितो त्रयी ता गौरी विवाहान्तं लीलया गौर्या पाणिभ्यां पि
वनयनाच्छादने कृते शिवेन ललाटलने त्रेप्रकाशिते ततो भया गौर्याः स्वेदजलस्तुतं तदपि ब्रह्मणा कमण्ड
लौ स्थापितमितिसप्तत्रा गौरीविवाहकथनेन सूचितं भगीरथप्रार्थनया याच ब्रह्मरूपः सर्वपवित्रजलसमूह
रूपसैव देवः सर्वेषां जलसूपक्रमपुराणे भगीरथस्यैव प्रवणात विलासस्मत्सु तगो महात्मा प्रकाशिताः

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कन्याश्चकृतपतिः उग्रेणापिवीर्यस्वबलस्तादिवर्कं वैतद्दृणितं उग्रंसुव्रतंपर्णभोजनमापित्यागसंकल्परूपंतपः पिवव्यानवूर्वं १९।२।
यथावत्रिपथगामिनीगंगातथाप्रतिपादयतीतिशेषः तदेवविवृणोति खमित्यादिप्रथमंखंगगनं आकाशमार्गंगता २२

218

याचान्याशैलदुहिताकन्यासीद्रघुनंदन उग्रंसुव्रतमास्थायतपस्तेपेतपोधना १९ उग्रेण
तपसायुक्तांददौशैलवरः सुतां रुद्रायाप्रतिरूपायउमांलोकनमस्कृतां २० एतेतेशैलरा
जस्यसुतेलोकनमस्कृते गंगाचसरितांश्रेष्ठाउमादेवीचराघव २१ एतत्तेसर्वमाख्यातंय
थात्रिपथगामिनी खंगताप्रथमंतातगतिंगतिमतांवर २२ सैषासुरनदीरम्याशैलेंद्रस्य
सुतातदा सुरलोकंसमारूढाविपापाजलवाहिनी २३ इत्यार्षेरामायणेपंचत्रिंशः सर्गः ३
उक्तवाक्येमुनौतस्मिन्नुभौराघवलक्ष्मणौ प्रतिनंद्यकथांवीरावूचतुर्मुनिपुंगवं १ ध
र्मयुक्तमिदंब्रह्मन्कथितंपरमंत्वया दुहितुःशैलराजस्यज्येष्ठायावक्तुमर्हसि विस्तरंवि

पश्चात्सुरलोकंसमारूढाः भवतजलवाहिनीतत्स्वभावाजाताविपापासकलपापहर्त्री २३ इतिटीकायांपंचत्रिंशः ३५
उक्तवाक्येइतिउपरतेइत्यर्थः १ वक्तुमर्हसीत्यस्यविस्तरमित्यनेनान्वयः दिव्यमानुषसंभवंदिव्यलोकमिवंयनेव २

ॐ·
वावा·
बाली·
१०१०

219

सुसूचितंविस्तरमाह त्रीनित्यादि भूर्भुवःस्वर्भागानित्यर्थः प्लावयेत्व्याप्नुयात् इत्येकोविस्तारः द्वितीयमाह कथमितित्रिपथ
गेतिप्रसिद्धिःकिंनिबंधनेतिद्वितीयं २ कर्मभिस्त्रिविधैःकैःसमन्वितेतितृतीयः द्वयोर्हिमवत्कन्ययोः वैपरीत्यवंश्योद्धारकत्वा

त्रीन्पथोहेतुनाकेनप्लावयेल्लोकपावनी कथंगंगात्रिपथगाविश्रुतासरिदुत्तमा ३ त्रि
षुलोकेषुधर्मज्ञकर्मभिःकैःसमन्विता तथाब्रुवतिकाकुत्स्थेविश्वामित्रस्तपोधनः ४
निखिलेनकथांसर्वामृषिमध्येन्यवेदयत् पुरारामकृतोद्वाहःशितिकंठोमहातपाः ५
दृष्ट्वाचभगवान्देवींमैथुनायोपचक्रमे तस्यसंक्रीडमानस्यमहादेवस्यधीमतः ६
शितिकंठस्यदेवस्यदिव्यंवर्षशतंगतं पवंमन्मथयुद्धेनतनयोनासीत्पराजयः नचापित
नयोरामतस्यामासीत्परंतप सर्वेदेवाःसमुद्युक्ताःपितामहपुरोगमाः ७

गंगाविषयकएवभगवतःप्रश्नइत्यलं ४ निखिलेनकार्त्स्न्येनविस्तरेणेतियावत् उद्वाहोविवाहः ५ गतंक्री
डयेतिशेषः ६ समुद्युक्ताःसेनानीप्राप्त्यर्थंपरमयत्नेनरुद्रोमयोः संयोजनेकृत्वापितसंसारोद्दतेजसोमोचनंवारयितुं
समुद्युक्ताबभूवुरित्यर्थः समुद्विग्नाइतिपाठस्तत्रसुगमएव ७

११·

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रश्नार्थसंयोजनोद्यमभवतांतन्निवासस्थानेद्योगेनविवेतस्तत्राह यदिहेति इहरहुमार्याऽस्यतेऽस्मत्पतिप्रब्रुवतइतिविचार्येत्यादि ८ ५
प्रसादविषयमाह नलोकाइति भूरादिलोकास्तत्प्रजाश्चेत्यर्थः ब्राह्मणेनतपसाबलानस्तालह्मणेनेतपसेसर्थः तेजा
देताःतेजसिश्रात्मनिमतेजसिमयाम्रतेकोलाभस्तत्राह रक्षसर्वानिति ध्रुवेतिपाषः ननुरुद्रेणास्वतेजोधारणेकथंलोक

220 यदिहात्स्यते भूतंकस्तत्त्रातिमहिप्यति अभिमाम्यमराः सर्वेप्रणिपत्येदमब्रुवन् ८ देवदेव
महादेवलोकस्यास्यहितेरत सर्वाणांप्रतिपत्येनप्रसादंकर्तुमर्हसि ९ नलोकाधारयि
ष्यंतिनवतेजस्सुरोत्तम ब्राह्मणेनतपसायुक्तोदेव्यासहतपश्चर १० त्रैलोक्यहितकामार्थं
तेजस्तेजसिधारय रक्षसर्वानिमांल्लोकान्नालोकंकर्तुमर्हसि ११ देवतानांवचःश्रुत्वा
सर्वलोकमहेश्वरः बाढमित्यब्रवीत्सर्वान्पुनश्चेदमब्रवीत् १२

रक्षेतिचेत्रप्रणयदेतत्स्वरूपेरेतोभवतिश्रादित्यस्यतद्रूपंइति श्रुतेस्तदेतोरूपंतेजएवश्रादित्यमंडलंतद्रूतोसक
कलंजगद्रक्षितंभवतिविपर्ययेविपर्ययइत्याहुः तदेवाहनालोकमिति श्रादित्यविनाशाद्धिसर्वलोकविनाशनं
प्रसंगइतिभावः ।। १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ॰
रा॰वा॰
वा॰टी॰
॥ 221

धारयिष्यामीति सहोमया उमायि स्वरजो रूपं तेजो ऽग्निं स्वस्वरूपेण तेजसा धारयिष्यति यदेतत् त्रिलोके हितं भवति अन्ये
लहृषमिति स्फुत्तैः भो त्रिदशाः अनेन तेजो धारणेन पृथिवी चकारात् सर्वो लोकः निर्वाणं सुखं प्राप्नोतु अन्यथा
येश्वरते जो जनन्य स्य डर्थी येन च पृथिव्याः लोकस्य च पीडा स्यादिति भावः ३ दिव्यवर्षशतं भोगवशानुस्थान

धारयिष्याम्यहं तेजस्तेजसैव महात्मना । त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ३
यदिदं क्षोभितं स्थानान्मम तेजो ह्यनुत्तमं । धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ४ ए
वमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् । यत्तेजः क्षोभितं ह्यद्य तद्धरा धारयिष्यति ५
एवमुक्तः सुरपतिः प्रमुमोच महाबलः । तेजसा पृथिवी येन व्याप्ता सगिरिकानना ६

ननु च्युतस्य शुक्रांशस्य धारणासंभावेन तद्धारणसमर्थमात्मानं निरूपयन्नित्याह यदिदमिति स्थानात् हृद
यपुंडरीकलक्षणात् तत्र भिन्नचिरकालभोगवशात् स्खलितं अनुत्तमं देवकार्यार्हं सुतसमर्थं तेन सर्वोत्तमं भ
वत्प्रार्थनया च ब्रह्मा गर्भो नहं को धारयिष्यति ४ उक्तममाहुः एवमिति धरा धारयिष्यतीति तस्याश्च शेषधारणा
शक्तिमत्त्वादिति ५ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पृथिव्यांमुक्तस्यतेजसोधारणार्थंअग्नेःपृथिव्यधिपतित्वेनपृथिव्यभिमानित्वात्तंद्विगुंजनेतेतश्ततति पुनःशब्दोवाक्यालंकारे
हुताशनंदेवीस्वंदेहेशान्तरूपंग्रसाहशपाग्नेः रौद्रतेजः प्रवेशासंभावात् वायुसमन्वितइत्यनेनचालनलक्षणःप्रवेशोपाय
उक्तः १७ तदग्निरितितिउक्ताग्निनावालनरूपकप्रवेशात्ततेजोवहूतकेवलस्त्रेतपर्वतरूपंजातंतद्रूपंतेजः प्रवेशप्रदेशात्
महिम्नादिव्यपावकादिसमसंनिभं शरवणंचाभूत् १८ यत्रेतिकिंचित्कालंभूत्वाततकार्तिकेयवव्रदेवअग्निसंभवत्

ततोदेवाःपुनरिदमूचुस्तापिहुताशनं आविशत्वंमहातेजोरौद्रंवायुसमन्वितः १७ तदग्नि
नापुनर्व्याप्तंसंजातंश्वेतपर्वतं दिव्यंशरवणंचैवपावकादित्यसंनिभं १८ यत्रजातोमहा
तेजाःकार्तिकेयोग्निसंभवः अथोमांचशिवंचैवदेवाःसर्षिगणास्तथा १९ पूजयामासु
रत्यर्थंसुप्रीतमनसस्तदा अथशैलसुतारामत्रिदशानिदमब्रवीत् २० समन्युरशपत्
सर्वान्क्रोधसंरक्तलोचना यस्मान्निवारिताचाहंसंगतापुत्रकाम्यया २१

रोऽर्थः १९ सुप्रीतमनसःलोकानुग्रहायमलतेजसोऽश्नताततदेवकार्यायस्कन्दतेजसश्चदत्वान्तंसंतोषः क्रियमाणमप
पिपूजां उमादेवीनांगीकरोतिस्म पश्चात्क्रुद्धेवाभूदित्याह अथशैलेतिकिमब्रवीत्तदाहाशपदित्साहूपंचोवनी
दिसार्धेः २० समकारणमाह यस्मादिति २१

222

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रावा
वारी
११२ 223

शापस्वरूपमाह अपत्यमित्यादि २२ एवमुक्ता शापद्यरूपं वचः इति शेषः भुवने पृथिव्यां नैकरूपा एकस्यैव देहस्य नैकबीजफ
लजनकत्वात् बहुभार्या अनेकभूपतिभोग्यात् २३ नचपुत्रकृतां प्रीतिं वा तत्र हि तत्र तस्यापि नरकात्त्राणकर्त्रस्य भौमस्य कु
लावतारे तेनैव हननात् सदुर्मेधः इति नित्यमसि च प्रजामेध्यपि सि च सचतेरा दुष्टमेधा यस्याः सा सदुर्मेधा अमपु

अपत्यं स्वेभद्रा येभ्रुनोत्पादयितुमर्हथ अद्यप्रभृति युष्माकमप्रजाः संतु पत्नयः २२ एव
मुक्त्वा सुरान्सर्वान्सा शापपृथिवीमपि भुवनेनैकरूपात्वं बहुभार्याभविष्यसि २३ नचपु
त्रकृतांप्रीतिंमत्क्रोधकलुषीकृता प्राप्स्यसेत्वंसदुर्मेधाममपुत्रमनिच्छती २४ तान्सर्वान्
पीडितान्दृष्ट्वासुरान्सुरपतिस्तदा गमनायोपचक्रामदिशंवरुणपालितां २५ सगत्वा
तपआतिष्ठत्पार्श्वेतस्योत्तरेगिरेः हिमवत्प्रभवेशृङ्गेसहदेव्यामहेश्वरः २६

त्रमनिच्छन्तीति जोथरणान्नमत्यायद्येषां तत्तेजो धरणी नाव्रममेतत हिमप्रपुत्री ममैव स्यादित्याशयः २४ पीडितान् देवीशा
पदुःखितान् उपचक्राम पादन्यासं कृतवान् २५ तस्य गिरेः हिमालयस्योत्तरे पार्श्वे हिमवत्प्रभवाख्ये शृंगे २६ ११२

उपसंहरति एवमिति त्रिलोकेऽप्रमेयकर्मभिः कैः समन्वितेति प्रश्नोत्तरं तया वक्तव्यस्य गर्भधारणरूपं गंगाचरितं स्पष्टेष
तया शैलपुत्र्या विस्तारो निवेदितः प्रकृतप्रश्नोत्तरं वक्तुं प्रतिजानीते गंगाया इति प्रभवमिति विष्णुपदोद्भवः पश्चात्तेजोधा
रणरूपप्रभावमित्यर्थः २० इति श्रीरामायणे षट्त्रिंशः ३६ देवे शिवे सेन्द्राः देवा इति शेषः साग्निपुरोगमाः अग्निनाप्र

224

एवं ते विस्तरो राम शैलपुत्र्या निवेदितः गंगायाः प्रभवं चैव शृणु मे सह लक्ष्मणः २०
इत्यार्षे रामायणे षट्त्रिंशः सर्गः ३६ तप्यमाने तदा देवे सेन्द्राः साग्निपुरोगमाः सेनापतिमभी
प्सन्तः पितामहमुपागमन् १ ततोऽब्रुवन् सुराः सर्वे भगवन्तं पितामहं प्रणिपत्य सुरा राम सेन्द्राः
साग्निपुरोगमाः २ येन सेनापतिर्देव दत्तो भगवता पुरा स तपः परमास्थाय तप्यते स्म सहोम
या ३

रोगमेन सहिता इत्यर्थः सेन्द्राः सर्षिगणाः पुरा इति क्वचित्पाठः १ अब्रुवन् सुराः सर्वे इति प्रकृतं अत्र
पाठान्तरमन्वेषणीयं द्वितीयार्धे सुरा रामेति पाठः रामसंबोधनं चैतत् २ येन रुद्रेण सेनापतिर्बीजात्मना दत्तः स पर
मास्थाय परं मौनं संगीकृत्य तपः तप्यते अनुतिष्ठति ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ. रा.वा.टी. ११२ 225

अत्रानंतरं वीर्यधारणपरस्मानंतरं यत्कार्यं पुत्रोत्पादनं संपन्नये विधेयं तत्त्वं विधत्स्व ४ सांत्वयन् इष्टकार्यलाभविज्ञानेनेति शेषः ५
यत् यस्मात् शैलपुत्र्या अप्रजा भविष्यथेत्युक्तं तत् तस्मात् युष्माकं स्वासु पत्निषु न प्रजाः संतीति शेषः यद्वा क्षितिरूक्षस्तब्धच्छांदसं य
तः तस्या वचनमक्लिष्टमुमीवं एवं प्रजा सत्येति पाठकल्पना च्छांदसत्वकल्पना च विफलैव ६ तर्हि का गतिस्तत्राह

यदत्रानंतरं कार्यं लोकानां हितकाम्यया संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ४ देवतानां वचः श्रुत्वा सर्वलोकपितामहः सांत्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत् ५ शैलपुत्र्या यदुक्तं तन्न प्रजाः स्वासु पत्निषु तस्या वचनमक्लिष्टं सत्यमेव न संशयः ६ इयमाकाशगा गंगा यस्यां पुत्रं हुताशनः जनयिष्यति देवानां सेनापतिमरिंदमम् ७ ज्येष्ठा शैलेंद्रदुहिता मानयिष्यति तं सुतम् उमायास्तद्बहुमतं भविष्यति न संशयः ८

यमिति यस्यां हुताशनः पुत्रं जनयिष्यति सेयं आकाशगंगा अस्ति इति शेषः ७ ज्येष्ठा उमा स्वकनिष्ठापत्यत्वात्स्वापत्य
वत् मानयिष्यतीत्यर्थः इति कतकस्तत्र पूर्वं गंगाया एव ज्येष्ठत्वोक्तानेन विरोधात् तस्मात् ज्येष्ठा गंगा स्वकनिष्ठोमापत्य
त्वात् मानयिष्यतीत्यर्थः उमाशिवसंयोगेन च्युतरेतोरेजोभ्यामुत्पन्नेरुमापत्यत्वं अत एवाह उमाया इति तत् स्वापत्यसंमाननम्

५ ११२

कैलासपर्वतं गत्वेत्यन्वयः १० समाधत्स्व कुरु महातेजः इति संबुद्धिः शैलपुत्र्यां गंगायां श्रेष्ठं तेजः उत्सृजेत्यन्वयः ११ प्रतिज्ञाय तथा
करोमीति प्रतिज्ञाय इदं गर्भधारणं देवतानां प्रियमित्यन्वयः १२ दिव्यरूपं धारयत् स्रोतोरूपं त्यक्त्वेति शेषः १३ तस्याः महिमा
दिव्यरूपवैभवं सः पेश्वरतेजोराशिः पावकः अवशीर्यत शीर्णः उत्तमहीदर्शने रसेश्वरस्य तह्यमहत्वाय उज्ज्वलनं हि जातमर्थं

226 तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनंदन प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ९ ते गत्वा पर्वतं
राम कैलासं धातुमंडितं अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः १० देवकार्यमिदं देव समा
धत्स्व हुताशन शैलपुत्र्यां महातेजो गंगायां तेज उत्सृज ॥ देवतानां प्रतिज्ञाय गंगामभ्येत्य पावकः
गर्भं धारय वै देवि देवतानामिदं प्रियं १२ इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् स तस्या महिमा
दृष्ट्वा समंतादवकीर्यत १३ समंततस्तदा देवीमभ्यषिंचत पावकः सर्वस्रोतांसि पूर्णानि गंगा
या रघुनंदन १४ तमुवाच ततो गंगा सर्वदेवपुरोगमं अशक्ता धारणे देव तेजस्तव समुद्धतं

तमिति सर्वप्रसिद्धं यहासपुरीः अवशीर्यत पेश्वरं तेजस्त्याकवाति सर्थः ११ अभ्यषिंचत् तेति रसेश्वरेणेति शेषः तमस १५
स्रोतांसि नाड्यः १४ पुरोगमः पुरोयायी हितकरश्च तव आग्नेयेन तेजसा संवधात् समुज्ज्वलतेत्र संग्रतेजः पोवं यतो तस्य
धारणेऽहम् अशक्तेत्यन्वयः १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· रा॰बा॰ बा॰टी॰ ११४ 227

संप्रव्यथितचेतना व्यस्मीतिशेषः सर्वदेवहुताशनः सर्वदेवोद्देशेनहुतस्यभक्षकः १९ संनिवेश्यतां स्थाप्यतां १० स्रोतोभ्य उत्सृ
ष्टं तत्तेजः हिमवतः पार्श्वे उत्ससर्जेत्यन्वयः ततः यस्मात् अस्याः निर्गतं तत् तस्मात् गंगागर्भतो निर्गमात् तत्तेजः जाम्बूनदाकार
सुमेरुकल्पायस्तत्वात् गंगायास्तस्य जांबूनदस्य वर्णेन समप्रभं आसीदितिशेषः १८ तत एव धरण्यां प्राप्तं सा तदा तस्य स

दह्यमानाग्निना तेन संप्रव्यथितचेतना अथाब्रवीदिदं गंगा सर्वदेवहुताशनः १९ इह हैम
वते पार्श्वे गर्भोयं संनिवेशितो श्रुत्वा त्वग्निवचो गंगा तं गर्भमतिभास्वरं १० उत्ससर्ज महा
तेजाः स्रोतोभ्यो हि तदानघ यदस्या निर्गतं तस्मात् तप्तजांबूनदप्रभं १८ कांचनं धरणीं प्रा
प्तं हिरण्यममलप्रभं ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभिजायत १९ मलं तस्याभव
त्तत्र त्रपुसीसकमेव च तदेतद्धरणीं प्राप्य नानाधातुरवर्द्धत २०

वढुधरण्यां स्वं वस्तु कांचनमकरोत् ततस्समीपवर्तिस्थं संस्थं अतुलप्रभाद्धिरण्यं रजतं अकरोत् ततेजः सर्वं
यितत्तापाद्देवतद्रूपवह्नितस्थं स्वं वस्तु जातं ताम्रं कार्ष्णायसं लोहं अभिजायत अनुभावश्चार्षः १९ ततस्त
गर्भस्य मलं त्रपुसीसं चाभवत् अयं भावः तेजस्तापमलं गाधसहितेन श्वेतेन स्पर्शेनाविद्धं स्वर्णगाधयुक्तेन अविद्धं रजतं
तेजस्तापयुक्तेन विद्धं ताम्रं लोहं च मलयुक्तेन अयुक्तेन विद्धं त्रपुसीसं इति नानाधातुः तद्वत् २०

११४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवास्पर्शवेधित्वमेवनत्वस्यापितद्रूपवेधित्वमपीत्याह निक्षिप्तमित्यादि सन्नद्धं संवद्धं २१ जातरूपं रूपेजातमित्यर्थः २२ तं
कुमारमिति ततः सेन्द्रा देवाः जातक्रमेण समाकारं तं प्रामत्क्षीरसंभावनार्थाय क्षीरपानप्रयोजनसिद्ध्ये कृत्तिकाः कृत्ति
काभिः यद्वा समयोजयन्निमंत्र्य प्रेरयन्नित्यर्थः २३ अथ ताः कृत्तिकाः अस्माकं सर्वासां पुत्रो भवत्विति उत्तमं समयं कृ

निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरंजितं सर्वपर्वतसन्नद्धं सौवर्णमभवद्वनं २१ तं देशं तत
तो वत्सा संप्राप्येनमभाषत जातस्य तु रूपं यत्त स्याजातरूपं भविष्यति २२ जातरूपमिति ख्या
तं तदाप्रभृति राघव सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभं २३ तं कुमारं ततो जातं सेन्द्राः स
हमरुद्गणाः क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन् २४ ताः क्षीरं जातमात्रस्य कृत्वा सम
यमुत्तमं ददुः पुत्रोयमस्माकं सर्वासामिति निश्चिता २५ ततस्तु देवताः सर्वाः कार्त्तिकेय
इति ब्रुवन् पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः २६

त्वा निश्चिताः तद्विषयकनिश्चयवत्यः जातमात्रस्य तस्य क्षीरं ददुरित्यन्वयः २४ ततः सर्वदेवताः युष्माकं पुत्रमयं पुत्रः
कार्त्तिकेय इति त्रैलोक्यविख्यातो भविष्यति अत्र न संदेहः इति ब्रुवन् अब्रुवन्नित्यर्थः अडभाव आर्षः २५ २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ·
रावा·
बाटी·
११५ 229

तेषांदेवानांतत्स्पष्टानुकूलंवचनंश्रुत्वास्कन्नंआदौईश्वरयोः सकाशात्स्कन्नंपश्चाद्गंगायांगर्भपरिस्रवेसतिपवयालक्ष्म्या
दीप्यमानंअनलमिवदृः सर्वाणिनानिहृत्तिप्रयोजकपौत्रसिद्धयेताः स्नापयन्स्नपयन्तोऽनुप्रयन्तीत्यर्थः २६ ततस्तन्नंगर्भपरिस्रुत
त्वहेतोः पूर्वोक्तीयतेनोक्तंस्कन्दइत्यन्वर्थनाम्नाअब्रुवन्नित्यर्थः स्कन्नंगर्भपरिस्रुतंस्कन्दइतिएवंदयादितत्वामाथुः २७

तेषांतद्वचनंश्रुत्वास्कन्नंगर्भपरिस्रवे स्नापयन्पवयालक्ष्म्यादीप्यमानंयथानलं स्कं
दइत्यब्रुवन्देवाःस्कन्नंगर्भपरिस्रवे कार्त्तिकेयंमहाबाहुंकाकुत्स्थज्वलनोपमं २७ प्रादुर्भू
तंततःक्षीरंकृत्तिकानामनुत्तमं षण्णांषडाननोभूत्वाजग्राहस्तनजंपयः २८ गृहीत्वाक्षी
रमेकाह्नासुकुमारवपुस्तदा अजयत्स्वेनवीर्येणदैत्यसैन्यगणान्विभुः २९ सुरसेनाग
णपतिमभ्यषिंचन्महाद्युतिं ततस्तममराःसर्वेसमेत्याग्निपुरोगमाः ३०

ततःकृत्तिकानांक्षीरंप्रादुर्भूतंआसीदितिशेषः ततःषण्मासंपिजन्तंसपयःद्वयातिशयेनषडाननोभूत्वाजग्राह २८
एवंतदाषड्भिर्मुखैःयावदपेक्षितंक्षीरंगृहीत्वा एकाह्नाएकदिनेनैवसुकुमारवपुरपिस्वतेजसैवदैत्यसैन्यगणान्
अजयत् २९ ततःसकलासुरजयाद्धेतोःसर्वेप्रियगमामादेवाः समेत्यसुरसेनागणपतित्वेनाभ्यषिंचन्नित्यन्वयः ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उपसंहरति एष इत्यादि ३१ यश्च तु पुण्येन विष्णोर्तिभक्तश्चेति ऐहलौकिकफलेन धन्यमामुष्मिकेन पुण्यं तं पुत्रपौत्रैश्चेत
सायुज्यं स्कन्दसालोक्यं इतिशेषः ३२ इतिरामायणे बालकांडे सप्तत्रिंशः सर्गः ३७ अथ वीरमथो देवनाकेनेत्यादि प्रश्नसेतान्

230

एषतेरामगंगाया विस्तरोभिहितोमया कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ३१ भ
क्तश्चयः कार्तिकेये काकुत्स्थभुवि मानवः आयुष्मान्पुत्रपौत्रैश्च स्कंदसालोक्यतां व्रजेत ३२
इत्यार्षे रामायणे सप्तत्रिंशः ३७ तां कथां कौशिको रामे निवेद्य मधुराक्षरां पुनरेवापरं वाक्यं
काकुत्स्थमिदमब्रवीत १ अयोध्याधिपतिर्वीरः पूर्वमासीन्नराधिपः सगरो नाम धर्मात्मा
प्रजाकामः स चाप्रजा २ वैदर्भदुहिता राम केशिनी नाम नामतः ज्येष्ठा सगरपत्नी सा धर्मि
ष्ठा सत्यवादिनी ३ अरिष्टनेमिदुहिता सुपर्णभगिनी तु सा द्वितीया सगरस्यासीत्पत्नी सु
मतिसंज्ञिता ४

एवं क्रमात्तां कथामिति अपरं वाक्यं वक्ष्यमाणं प्रश्नोत्तरं १ यस्मादप्रजः तस्मात्प्रजा
कामोऽभूदित्यन्वयः २ अरिष्टनेमिः कश्यपः अस्याः सुपर्णभगिनीत्वं तु पदप्रयोगात् ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भृगुप्रस्रवणेभृगवधिष्ठितंप्रस्रवणंप्रवाहोयस्मिन्गिरौहिमवत्पादपर्वते ५ तानेकमपत्यलाभंजनयिताजनयिष्यतिषष्टि मितिनित्यैकवचनांतत्वात्सहस्राणीत्यनेनसामानाधिकरण्यं ८ राजपुत्र्यावितिच्छंदस्त्वमायेनप्रयोगः ९ इच्छावहेइच्छा

ताभ्यांसहमहाराजःपत्नीभ्यांतप्तवांस्तपः हिमवंतंसमासाद्यभृगुप्रस्रवणेगिरौ ५ अथवर्षशतेपूर्णेतपसाराधितोमुनिः सगरायवरंप्रादाद्भृगुःसत्यवतांवरः ६ अपत्यलाभःसुमहान्भविष्यतितवानघ कीर्तिंचाप्रतिमांलोकेप्राप्स्यसेपुरुषर्षभः ७ एकाजनयितातातपुत्रंवंशकरंतव षष्टिंपुत्रसहस्राणिअपराजनयिष्यति ८ भाषमाणंनरव्याघ्रंराजपत्न्यौप्रसाद्यतं ऊचतुःपरमप्रीतेकृतांजलिपुटेतदा ९ एकःकस्याःसुतोब्रह्मन्काबहून्जनयिष्यति श्रोतुमिच्छावहेब्रह्मन्सत्यमस्तुवचस्तव १० तयोस्तद्वचनंश्रुत्वाभृगुःपरमधार्मिकः उवाचपरमांवाणींस्वच्छंदोत्रविधीयतां ॥ एकोवंशकरोवास्तुबहवोवाम

विधीयतांज्ञाप्यतांस्वेच्छयैवएकपुत्रताबहुपुत्रतावाव्रियतामितितात्पर्यं ११ तदेवाहएकोवंशकरोवेतिवंशकरःपूर्वंव्याहितेहेतुः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नृपसन्निधावित्यनेन तस्यापि सान्निध्यमात्रं न तु वरप्रदानियकर्तृत्वमेतित् सूचितं १३ सुपर्णी गरुड १४ व्यजायत प्रसूतवती १६
गर्भतुंबं तुंबफलाकारगर्भपिंडं व्यजायत प्रसूतवती कथं ततः पुत्रोदयस्तत्राह षष्टिरित्यादि १७ दीर्घेण कालेन यौ

232

एतस्य वचनं श्रुत्वा केशिनी रघुनंदन पुत्रं वंशकरं राम जग्राह नृपसन्निधौ १३ षष्टिं
पुत्रसहस्राणि सुपर्णभगिनी तदा महोत्साहान्कीर्तिमतो जग्राह सुमतिः सुतान् १४ प्र
दक्षिणमृषिं कृत्वा शिरसाभिप्रणम्य तं जगाम स्वपुरं राजा सभार्यो रघुनंदन १५ अथ
काले गते तस्य ज्येष्ठा पुत्रं व्यजायत असमंज इति ख्यातं केशिनी सगरात्मजं १६ सुमति
स्तु नरव्याघ्र गर्भतुंबं व्यजायत षष्टिः पुत्रसहस्राणि तुंबभेदाद्विनिःसृता १७ घृतपूर्णेषु
कुंभेषु धात्र्यस्तान्समवर्धयन् कालेन महता सर्वे यौवनं प्रतिपेदिरे १८ अथ दीर्घेण
कालेन रूपयौवनशालिनः षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा १९ स च ज्येष्ठो नरश्रे
ष्ठः सगरस्यात्मसंभवः बालान्गृहीत्वा तु जले सरय्वा रघुनंदन २० प्रक्षिप्य प्राहसन्नित्यं मज्ज

वनशालित्वे हेतुनाऽत्रतीया १९ ज्येष्ठः असमंजः बालान्गृहीत्वा जले २० प्रक्षिप्य मज्जतः तान् समीक्ष्य नित्यं प्राहसत् प्रहसन्नि

ॐ· रावा· बाटी· ११८

233

निर्वासितोनिष्कासितः तस्यपुत्रसमंजस्यपतह्यावीग्रसमंजपाहोऽर्दितः सांतश्रुतिवोध्यं २२ समभिजायत प्रादुर्भावप्राप्तः
यज्ञकर्मणीत्यस्य निश्चयंकृत्वेतिशेषः केनान्वयः २५ इतिरामायणेसर्गः ३८ यज्ञांतेयज्ञोपक्रमकथान्ते स्पष्टः १ ३

पौराणामहितेयुक्तः पित्रानिर्वासितःपुरात् तस्यपुत्रोंऽशुमान्नामअसमंजस्यवीर्यवा
न् सम्मतः सर्वलोकस्यसर्वस्यापिप्रियंवदः ततः कालेनमहतामतिः समभिजायत
सगरस्यनरश्रेष्ठयजेयमितिनिश्चिता सकृत्वानिश्चयंराजासोपाध्यायगणस्तदा
यज्ञकर्मणिवेदज्ञोयष्टुंसमुपचक्रमे २५ इत्यार्षेरामायणेसर्गः ३८ विश्वामित्रवचःश्रु
त्वाकथांतेरघुनंदनः उवाचपरमप्रीतोमुनिंदीप्तमिवानलं १ श्रोतुमिच्छामिभद्रंते
विस्तरेणकथामिमां पूर्वजोमेकथंब्रह्मन्यज्ञंवैसमुपाहरत् २ तस्यतद्वचनंश्रुत्वा
कौतूहलसमन्वितः विश्वामित्रस्तुकाकुत्स्थमुवाचप्रहसन्निव ३ श्रूयतांविस्तरोरा
मोयज्ञसंबंधिनी २ प्रसन्निवसंविकसितवद मसगरस्यमहात्मनः शंकरश्वशुरोनाम्नाहिमवानि
नः स्वपूर्वजनहृतांततयाश्रवणकौतुकेनरामभद्रस्यायंप्रश्नः सतएवमुनेर्हासः स्ववंशपरतिरामस्यापिलोकवन्नेहः संप

२२ २५

११८

मध्येमहापर्वतनिरोधाभावाद्विंध्यपर्वतं हिमवान्तथाविंध्योपिहिमवंतं स्वेर्वंपरस्परमासाद्यउच्चैस्सामर्थ्यंप्राप्यश्रेष्ठोत्रमा
तिशयेनवीक्षानिरोधकाभावात्परस्परंनिरीक्षेतेपश्यतइत्यर्थः तयोर्मध्येआर्यावर्तमस्तौ आर्यावर्तः उएवभूमि
मर्थ्यंविद्धिधर्मामयोरितिवचनात् ५ प्रशस्तः प्रशस्तत्वेनप्रसिद्धः उक्तवचनात् कृष्णवर्णोरक्ताश्चैमस्त्वानुगम

234

विंध्यपर्वतमासाद्यनिरीक्षेतेपरस्परं तयोर्मध्येसमभवत्पततः सपुत्रघोत्तम ५ सहि
देशोनरव्याघ्रप्रशस्तोयज्ञकर्मणि तस्मात्कृष्णवर्णाकाकुत्स्थहेतुधन्वामहारथ ६ कृष्ण
मानेकरोनातसगरस्यमतेस्थितः तस्यपर्वणितेयज्ञयजमानस्यवासवः ७ तात्सर्गत
त्तमाश्वायज्ञियपाश्वमपाहरत् ह्रियमाणेतुकाकुत्स्थतस्मिन्नश्वेमहात्मनः ८ उपाध्या
यगणाःसर्वेयजमानमथाब्रुवन् अयंपर्वणिवेगेनयज्ञियोश्वोपनीयते ९ हर्तारंज
हिकाकुत्स्थहयश्चैवोपनीयतां यज्ञच्छिद्रंभवेदेतत्सर्वेषामशिवायनः १०

ने ६ मतेशासनेपर्वणिउच्चथाहेस्याश्वयं तत्रद्वितीयेश्वमेधालंभनहिवसेश्वविशसनात्सप्तांतंयज्ञंविहंतुमितिपोषः ७
यज्ञियाश्वंयज्ञार्हमश्वं ८ अयंयज्ञियोश्वःपर्वणिवेगेनअपनीयतेअपह्रियते ९ अतः हर्तारंअश्वहर्तारंजहि अ
श्वश्वतीचमुपनीयतांयज्ञच्छिद्रंयज्ञस्यविघ्नः १०

ॐ
रामा॰
बा॰ टी॰ 235
११८

छिद्रइतिच्छेदः यथायतः छिद्रंदोभवेदित्यन्वयः सोपाध्यायवचः उपाध्यायसहितदीक्षितगणवचः ॥ भोपुरुषर्षभाः पु
त्रकाः तेजस्वितैर्महाभागैः यद्यपिमहाक्रतुः आस्थितः सुविष्टितः तथापि रत्नसंज्ञायया यदिविच्छेदस्तात्तदा आत्मनोगतिं
नपश्यामितस्माद्गच्छथविचिनुध्वंय अन्वेषयतेत्यर्थः इतिकेचित् परेतु आस्थितोहीतिपाठः हियस्मात् रैरेटैर्महाभा

तथाक्रियतांराजन्यतोः छिद्रः कुतोभवेत् सोपाध्यायवचः श्रुत्वाः तस्मिन्सदसिपार्थि
व ॥ षष्टिंपुत्रसहस्राणिवाक्यमेतदुवाचह गतिंपुत्रानपश्यामिरक्षसांपुरुषर्षभाः १२
मंत्रपूतैर्महाभागैरास्थितोपिमहाक्रतुः तद्गच्छथविचिनुध्वंपुत्रकाभद्रमस्तुवः १३
समुद्रमालिनींसर्वांपृथिवीमनुगच्छथ एकैकंयोजनंपुत्राविस्तारमभिगच्छथ १४
यावत्तुरगसंदर्शस्तावत्खनतमेदिनीं तमेवहयहर्तारंमार्गमाणाममाज्ञया १५
दीक्षितःसोपसहितःसोपाध्यायगणस्त्वहं इहस्थास्यामिभद्रंवोयावत्तुरगदर्शनं १६

गैः आस्थितोयंक्रतुः अतः अतोवःक्रतुरक्षसांगतिंनपश्यामि तस्मात्केनापिदेवेनस्यतर इति तमन्वेषयतेत्यर्थइत्याहुः ११।१२।१३
अनुगच्छथ अन्वेषयत यथा स्वतादेशाभावंप्राप्तत्वात् १४ यदिभूमौनलभ्यतेतदाप्राह यावत्तुरगेत्यादि १५ स्वस्यत
रगानुगमनमयुक्तमित्याह दीक्षितइत्यादि तत्पश्चात्तावनिषेधात् पौत्रस्यबालकत्वाच्चेतिभावः १६

११८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यंत्रितानियुक्ताः १७ आयामो दैर्घ्यं विस्तारो विशालस्तत्र युक्तं धरणीतलमेकैकोन्वेषयामासेत्यर्थः विभिद्य इति दारयित्वा
महद्भ्य इति शेषः १८ भिद्यमाना सर्वतः इति शेषः १९ अनुत्तमं रसातलं विवेत्तमिव धरणीं योजनानां षष्टिसहस्राणि विभिद्य
236 ते सर्वे लक्ष्मणस्य सो राजपुत्रा महाबलाः जग्मुर्महीतलं राम पितुर्वचनयंत्रिताः १७ योजनायाम
मविस्तारमेकैको धरणीतलं विभिद्य पुरुषव्याघ्रा वज्रस्पर्शसमैर्भुजैः १८ शूलैरशनिक
ल्पैश्च हलैश्चापि सुदारुणैः भिद्यमाना वसुमती ननाद रघुनंदन १९ नागानां वध्यमाना
नामसुराणां च राघव राक्षसानां दुराधर्षः सत्वानां निनदोभवत् २० योजनानां सहस्राणि षष्टिं
तु रघुनंदन विभिद्युर्धरणीं राम रसातलमनुत्तमम् २१ एवं पर्वतसंबाधं जंबूद्वीपं नृपात्मजाः
खनंतो नृपशार्दूल सर्वतः परिचक्रमुः २२ ततो देवाः सगंधर्वाः सासुराः सहपन्नगाः सं
भ्रांतमनसः सर्वे पितामहमुपागमन् २३ ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ऊचुः प
रमसंत्रस्ताः पितामहमिदं वचः भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः बहवश्च महा
रितान्वयः २१ पर्वतसंबाधं पर्वतनिविडं महात्मानः सिद्धगंधर्वादयः २५ त्मानो वध्यंते जलचारिणः २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
वन.
वा.टी.
११५

237

यज्ञहनइतिपाठेहन्तीतिहनः अश्वनीयते अश्वयते स सर्वभूतानि तत्र संगराद्दितान्यपि २९ इतिएकोनचत्वारिंशःसर्गः ३९ कृतान्तवलमोहितान् कृतः सर्वलोकस्य अन्तो नाशो यैः ताहशानियानि वलानि सगरपुत्रवलानि तैमोहितान् मूर्छितान् १ एषा वसुधा २ धारयति योगवलेनेतिशेषः ३ पृथिव्याश्च निर्भेदः खननं सनातनः प्रतिकल्पमवश्यंभावी श्रोतव्यस्मार्तैः सागरादि

ध्रुवंयज्ञहनोलोकामनेनाश्वोपनीयते इतितेसर्वभूतानिदृष्ट्वातेसगरात्मजाः २९
इत्यार्षेवामायणोएकोनत्रिंशः २९ देवतानांचवचःश्रुत्वाभगवान्वैपितामहः प्रत्युवाच
समेतांस्तान्कृतान्तबलमोहितान् १ यस्येयंवसुधाकृत्स्नावासुदेवस्यधीमतः म
हिषीमाधवस्यैषासएवभगवान्प्रभुः २ कापिलंरूपमास्थायधारयत्यनिशंधरां तस्य
कोपाग्निनादग्धोभविष्यन्तिनृपात्मजाः ३ पृथिव्याश्चापिनिर्भेदोदृष्टएवसनातनः स
गरस्यचपुत्राणांविनाशोदीर्घदर्शिनां ४ पितामहवचःश्रुत्वात्रयस्त्रिंशदरिंद

शास्त्रैर्दृष्टएव श्रुतस्तत्रनशोकःकार्यइतिभावः

माः देवापरमसंहृष्टाःपुनर्जग्मुर्यथागतम् ५

एवंत्वदीर्घदर्शिनांदीर्घदर्शिभिः सगरपुत्रविविनाशोयं दृष्टएव श्रुतस्तापायिपिशोकोनवितः शेषेषष्ठीयद्वाअदेर्घद
र्शिनामितिपदच्छेदः ४ त्रयस्त्रिंशत् श्रेष्ठोवसवः एकादशरुद्राः द्वादशादित्याः अश्विनौच ५

११५

निघातसममन्विस्वनः निर्घातनिस्वनसमस्तर्थः ९ ततोभित्वेतिपादः ७ सबवंतोवलवंतः = तेप्रस्मात्हभंद्यश्वगुरहत्वाहि
रस्तु वयंकिंकरिष्यामस्तोपछादसः त्रुहिहपायः ९ भूयोनिर्भिद्येसत्वयः कृत्वार्थाश्वतदानिवर्तेथ निवर्तेधुनिव

सगरस्य सुत्राणांप्राडुरासीन्महास्वनः पृथिव्यांभिद्यमानायांनिर्घातसमनिस्वनः ९ ततो
भित्वामहीं सर्वांकृत्वाचापिप्रदक्षिणं सहिताः सागराः सर्वेपितरंवाक्यमब्रुवन् परिक्रा
६ तामहीसर्वासत्ववंतश्चसूदिताः देवदानवरक्षांसिपिशाचोरगपन्नगाः ८ नचपश्यामहेः
श्वतेप्रश्वहर्तारमेवच किंकरिष्यामभद्रंतेबुद्धिरत्रविचार्यता ९ तेषांतद्वचनंश्रुत्वापु
त्राणांराजसत्तम समन्युरब्रवीद्वाक्यंसगरोरघुनंदन १० भूयःखनतभद्रंवोनिर्भिद्यवसु
धातले अश्वहर्तारमासाद्यकृतार्थाश्चनिवर्तथ ११ पितुर्वचनमासाद्यसगरस्यमहा
त्मनः षष्टिपुत्रसहस्त्राणिरसातलमभिद्रवन् १२ खन्यमानेततस्तस्मिन्ददृशुःपर्व
ताभमं दिशागजंविरूपाक्षंधारयंतंमहीतलं १३ सपर्वतवनांकृत्स्नांपृथिवींरघुनंदन

तेधर्मिमस्थैर्थ्यप्रार्थैमेतत् अस्मयानिवृत्तिरित्यर्थः ११ खन्यमानेर्ज्ञिषष्टियोजनसहस्त्राण्यवसपीतिशेषः दिशाङ्गमावेते १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· रावा· वाली· १२·

239

यदापर्वणियस्मिन्कालेयस्मिन्क्षणेतिथिभेदेक्षणोपर्वतःस्मरा १४ मानयांतः दिग्गजमितिशेषः हिस्वर्थे १५ महापद्मंत
नामानं १६ प्रदक्षिणंकृत्वादिग्गजमितिशेषः १९ २० निरामयंकुशलंसोमवतींउदीचीं २१ भद्रंभद्राख्यं २२समालु

यदापर्वणिकाकुत्स्थविश्रमार्थंमहागजः खेदाच्चालयतेशीर्षंभूमिकंपस्तदाभवेत् १४
तंतेप्रदक्षिणंकृत्वादिशापालंमहागजं मानयंतोहितेरामजग्मुर्भित्वारसातलं १५ ततः
पूर्वांदिशंभित्वादक्षिणांबिभिदुःपुनः दक्षिणस्यामपिदिशिददृशुस्तेमहागजं १६ महा
पद्मंमहात्मानंसुमहापर्वतोपमं शिरसाधारयंतंगांविस्मयंजग्मुरुत्तमं १७ तेतंप्रदक्षि
णंकृत्वासगरस्यमहात्मनः षष्टिपुत्रसहस्राणिपश्चिमांबिभिदुर्दिशं १८ पश्चिमायामपि
दिशिमहांतमचलोपमं दिशागजंसौमनसंददृशुस्तेमहाबलाः १९ तेतंप्रदक्षिणंकृत्वापृ
ष्ट्वाचापिनिरामयं खनंतःसमुपाक्रांतादिशंसोमवतींतदा २० उत्तरस्यांरघुश्रेष्ठददृशु
र्हिमपांडुरं भद्रंभद्रेणवपुषाधारयंतंमहीमिमां २१ समालभ्यततःसर्वेकृत्वाचैनंप्रदक्षिणं
षष्टिःपुत्रसहस्राणिबिभिदुर्वसुधातलं २२ ततःप्रागुत्तरांगत्वासागराःप्रथितांदिशं रोषा
भ्यखनं २३ प्रागुत्तरांपूर्वोत्तरांप्रथितांसर्वकर्माहितेनप्रसिद्धाम २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

240

कपिलंकपिलधारिणं २५ तस्यकपिलस्य २९ तंकपिलंहंतीतिहन्नः पर्यंयेच अविवारनस्तमेवअश्वापहारंह्वारायज्ञहंतारं ज्ञात्वेत्यर्थः २० २८ २९ ३० इतिरामायणेवालकांडेचत्वारिंशः सर्गः ४० विरगतान्अप्रत्यागछतइतिशेषः नप्तारंपौत्रं २ पूर्वैः

तेतंसर्वेमहात्मानोभीमवेगामहाबलाः ददृशुःकपिलंतत्रवासुदेवंसनातनं २५ हयंचतस्य देवस्यचरंतमविदूरतः प्रहर्षमतुलंप्राप्ताः सर्वेतेरघुनंदन २६ तेतंयज्ञहनंज्ञात्वाक्रोधपर्याकुलेक्षणाः खनित्रलांगलधरानानावृक्षशिलाधराः २७ अभ्यधावंतसंक्रुद्धास्तिष्ठतिष्ठेतिचाब्रुवन् अस्माकंत्वंहितुरगंयज्ञीयंहृतवानसि २८ दुर्मेधस्त्वंहिसंप्राप्तान्विद्धिनःसगरात्मजान् श्रुत्वातद्वचनंतेषांकपिलोरघुनंदन २९ रोषेणमहताविष्टोहुंकारमकरोत्तदा ततस्तेनाप्रमेयेनकपिलेनमहात्मना ३० भस्मराशीकृताःसर्वेकाकुत्स्थसगरात्मजाः इत्यार्षेवालकांडेसर्गः ४० पुत्रांश्चिरगतान्ज्ञात्वासगरोरघुनंदन नप्तारमब्रवीद्राजा दीप्यमानंस्वतेजसा १ शूरश्चकृतविद्यश्चपूर्वैस्तुल्योसितेजसा पितॄणांगतिमन्विच्छ

पितृभिःगतिंहततांयेनचअश्वोपवाहितः देशांतरंप्रापितानः तदितिंचअन्विच्छअन्वेषय २ अंतर्भौमानिमहांतिजाता

रा॰
बाल॰
बाटी॰
१२१
२४१

अभिवाद्यान् नमस्कारार्हान् मम यज्ञस्य पारगः पारसमाप्तिकर्त्ता भवेत्यर्थः ४ पितृभिः खातं भूमेरन्तर्विद्यमानं मार्गं पितृहतो तपरिखातायमापद्यत प्राप्तः ६ निरामयं कुशलं ८ आसमञ्ज पुत्रइति संबोधनं इति भावः प्राप्तोः ९ वाक्यं वक्तुमर्हे काल

अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरानपि सिद्धार्थः संनिवर्तस्व मम यज्ञस्य पारगः ४
एवमुक्तोंशुमान्सम्यक्सगरेण महात्मना धनुरादाय खड्गं च जगाम लघुविक्रमः ५
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः प्रापद्यत नरश्रेष्ठ तेन राज्ञाभिचोदितः ६ देव
दानवरक्षोभिः पिशाचपतगोरगैः पूज्यमानं महातेजा दिशागजमपश्यत ७ स तं प्रद
क्षिणं कृत्वा दृष्ट्वा चैव निरामयं पितॄन्स परिपप्रच्छ वाजिहर्तारमेव च ८ दिशागजस्तु त
च्छ्रुत्वा प्रत्युवाच महामतिः आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि तस्य तद्वचनं श्रु
त्वा सर्वानेव दिशागजान् यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे १० तैश्च सर्वैर्दिशापालैर्वा
क्यज्ञैर्वाक्यकोविदैः पूजितः सहयश्चैवागन्तासीत्यभिचोदितः ११ तेषां तद्वचनं श्रुत्वा जगा

देशोचितवक्तव्यज्ञैः तद्वचितवचनसमर्थैश्च समर्थः हि म लघुविक्रमः भस्मराशीकृता यत्र पितर
तीयवाक्ये भावेक्तः सहयः आगन्तासीत्यभिचोदितश्चचोदितश्च ११ यत्र पितरः सागराः भस्मराशीकृताः तत्र दे

१२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुःखेनाशमसीभूतपितृनितिशेषः ११ विख्यातयशसं मत्तात्स्वकार्येसमर्थः निपुणं हृदि विवेचनसमर्थो पितृणां मातुलंसुपर्णाम
गिनीस्त्वमतिरिति प्राशक्तत्वात् अनिलोपमंवेगेनवायूपमं १६ लोकसंमतः लोककृतः एवमूलकत्वयोसर्वलोकहित
गोमोपामूलोकेअवतारणात् १७ हियस्मात् कपिलेनदग्धाः यतस्तुमहाबलाः महाबलस्तेनप्रायश्चित्तमर्यादाति

242

सदुःखवशमायमस्य समंजसस्ततस्तदा दुःखेनाशपरमार्तस्त्वयातेषां सदुःखवितः १८ यस्मिं
यं वह्न्यंतनत्रवर्तमविहूवतः ददर्शापुरुषव्याघ्रोदुःखशोकसमन्वितः १७ स तेषां राजपु
त्राणांकर्तुकामोजलक्रियां सजलार्थीमहातेजानवापश्यज्जलाशयं १५ विसार्यनिपुणं
दृष्टिं ततोपश्यत्खगाधिपं पितृणां मातुलंरामसुपर्णमनिलोपमं १६ स चैनमब्रवीद्वा
कां वैनतेयोमहाबलः माशुचः पुरुषव्याघ्र वधोयं लोकसंमतः १७ कपिलेनाप्रमेयेन द
ग्धाहीमेमहाबलाः सलिलं नार्हसे प्राज्ञ दातुमेषांहि लौकिकं १८ गंगाहिमवतोज्ये
ष्ठा दुहिता पुरुषर्षभ तस्यांकुरुमहाबाहोपितॄणां सलिलक्रियां १९ क्रांतयापयावतोः तो लौकिकं
सलिलंदातुंनार्हसि वडालादुदकात्सपीहेयुतात्हालसादपि दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां उदकं पिंड

सर्वं तत्तीर्थविधिनेदलिखितेनेः प्रकृतिकालाम
दुर्घटः महाबाणेनंव १८

243

तर्हि देवलोकं गत्वा गांगोदकेन क्रिया कार्येत्यत आह भस्मेति यदा प्लावयेत् तदा गंगया क्लिन्नं सिक्तं इदं भस्म हे पुत्र षष्टिं
सहस्राणि सागरान् स्वर्गलोकं गमिष्यति शाययिष्यतीत्यर्थः नयिष्यतीति पाठे नेत्यर्थः अनेन सगरादपुत्राणाम् नत्वा
पुत्रकाप्रायश्चित्ताविषयत्वं सूचितं तत्प्रायश्चित्तविषयाणामपि पापिनां पुंसां गंगाजलस्पर्शः सर्वपापप्रायश्चित्त

भस्मराशीकृतानेतान् प्लावयेल्लोकपावनी तया क्लिन्नमिदं भस्म गंगया लोककान्तया
षष्टिं पुत्रसहस्राणि स्वर्गलोकं गमिष्यति २० निगच्छाश्वं महाभाग संगृह्य पुरुषर्षभ
यज्ञं पैतामहं वीर निर्वर्तयितुमर्हसि २१ सुपर्णवचनं श्रुत्वा सोंऽशुमानतिवीर्यवान् त्व
रितं हयमादाय पुनरायान्महातपाः २२ ततो राजानमासाद्य दीक्षितं रघुनंदन न्यवे
दयद्यथावृत्तं सुपर्णवचनं तथा २३ तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः य
ज्ञं निर्वर्तयामास यथाकल्पं यथाविधि २४

मितिसूचितं अकृतप्रायश्चित्तानां महापातकिनामौर्ध्वदेहिकायोग्यानां गंगाजलस्पर्शपूर्वं लानो विनाप्रायश्चित्तांतरं त
त्कालेप्यवसकलौर्ध्वदेहिकक्रियायोग्यत्वं च सूचितं २० अश्वं स्वहोतानि गच्छ निर्वर्तयितं समापितं २१।२२ वृत्तं पितृव्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इष्टयज्ञइतिवह्नीदि: २५ आगमेष्यमावागमेतिश्रुयंउपायविषयंनाधगच्छतेतितदर्थः २९ इतिचत्वारिंशःसर्गः ४०
कालधर्मंगतस्तु:प्रकृतीजनाः धर्मात्मवर्गाः दीर्घःछांदसः रोचयामासुःसाधमाममताद्देवपैवपञ्छेन १ दिलीपे
स्वपुत्रंरगामकीर्तिमानिष्टयज्ञोमहीपतिः गंगायाश्चागमेराजानिश्चयंनाध्यगच्छत २ ५
अप्राप्यनिश्चयंराजाकालेनमहतामहान् त्रिंशद्वर्षसहस्राणिराज्यंकृत्वादिवंगतः २९
इत्यार्षेचत्वारिंशः ४० कालधर्मंगतेरामसगरेप्रकृतीजनाः राजानंरोचयामासुरंशुमं
तंसुधार्मिकं १ सराजासुमहानासीदंशुमान्रघुनंदन तस्यपुत्रोमहानासीद्दिलीपइति
विश्रुतः २ तस्मैराज्यंसमादिश्यदिलीपेरघुनंदन हिमवच्छिखरेरम्येतपस्तेपेसुदारु
णं ३ द्वात्रिंशच्छतसाहस्रंवर्षाणिसुमहायशाः तपोवनगतोराजास्वर्गंलेभेतपो
धनः ४ दिलीपस्तुमहातेजाःश्रुत्वापैतामहंवधं दुःखोपहतयाबुद्ध्यानिश्चयंनाध्य
गच्छत ५ कथंगंगावतरणंकथंतेषांजलक्रिया तारयेयंकथंचैतानितिचिंतापरोभ
दीलीपायतनपक्षेपेपितरगतयेगंगायाम्भूलोकावतारणायेतिशेषः १४ पैतामहंवधंपितामहानांसागराणामपरसं

ॐ॰ रावा॰ वाटी॰ १२२ 245

धर्मेण विदितेनेति धर्मेण प्रसिद्ध इत्यर्थः ७ अकारयत कृतवान् ८ व्याधिना पितॄणामुद्धरणालाभजन्यदुःखजेन तद्दिली
पवंश्यजो रघुपुत्रको दिलीपः कालिदासोक्तोऽन्य एवेति बोध्यं ९। सर्वाः प्रजा इत्यस्य मेत्रिष्वाधायेत्यन्तेनान्वयः ॥

तस्य चिंतयतो नित्यं धर्मेण विदितात्मनः पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ७ दि
लीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ८ अ
गत्वा निश्चयं राजा तेषामुद्धरणं प्रति व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ९ इं
द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः १० भगीर
थस्तु राजर्षिर्धार्मिको रघुनंदन अनपत्यो महाराजः प्रजाकामः सर्वाः प्रजाः ॥ मंत्रि
ष्वाधाय तद्राज्यं गंगावतरणे रतः तपो दीर्घं समातिष्ठद्गोकर्णे रघुनंदन ११ ऊर्ध्वबाहुः
पंचतपा मासाहारो जितेंद्रियः तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः १२ अतीतानि

प्रजाः सदा राज्यं च मंत्रिष्वाधाय गंगावतरणोत्सुकस्तपश्चातिष्ठत् गोकर्णो हिमवत्सादविशेषः दक्षिणदिक्स्थतीर्थविशेषो वा ११
पंचतपाः पंचाग्निमध्ये तपो यस्य स महाराजः मासे गते आहारो यस्य वर्षसहस्राण्यतीतानीत्यन्वयः १२ तस्य राज्ञः सुप्रीत इत्यन्व

रा॰ १२ १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तपसा वेति चस्त्वर्थे १२ यद्यस्मीत्यादि असंदिग्धेऽसंदिग्धवचनं वेदाश्चेत्प्रमाणं स्युरितिवत् सलिलस्पर्शमात्रेण स्वर्गि
तिसाध्यं तत्सलिलं १३ अमीषामिक्ष्वाकूणां सलिलप्राप्तिं दर्शयति गङ्गाया इति एषां भस्मनि गङ्गायाः सलिलेनाक्लिन्ने सलि
ले तेऽसंततेऽसत्त्वं यथा भवति तथा स्वर्गं गच्छेयुर्नाम प्रेत्यर्थः १४ इक्ष्वाकूणां कुले जातस्य मम संततिर्देया यथा

246

ततः सुरगणैः सार्धमुपागम्य पितामहः भगीरथं महात्मानं तप्यमानमथाब्रवीत् १५
भगीरथ महाराज प्रीतस्तेऽहं जनाधिप तपसा च सुतप्तेन वरं वरय सुव्रत १६ तमुवाच
महातेजाः सर्वलोकपितामहं भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः १७ यदि मे
भगवन्प्रीतो यद्यस्ति तपसः फलं सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयाः १८ गङ्गायाः
सलिलक्लिन्ने भस्मन्येषां महात्मनां स्वर्गं गच्छेयुरत्यन्तं सर्वे च प्रपितामहाः १९ देव या
चे ह संतत्यै नावसीदेत्कुलं च नः इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः २०

संततेः इति चतुर्थ्यर्थे प्रथमार्थे षष्ठ परो वरः द्वितीयवरस्त्वर्थः परेत्य संततेऽत्र दर्शनः कुलं नावसीदेदिति नः कुलं नावसीदेत् वस्या चेम यावेम
कुलेऽसंततिः कोऽपि माभूदित्यर्थः उपसंहरति इक्ष्वाकूणामिति तत्कुले जातस्य एष एव परो वरोऽस्तु नान्योऽधिक इतीयवरो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रा॰
बा॰टी॰
१२४

247

मनोरथः तावकः इति शेषः २१ स्वसमीपे स्थितत्वादियमिति निर्देशः २१ हरनियोगे हेतुमाह गंगायाः इति तां गंगां २४ गंगामाभाष्य राजानं यथाकालमनुग्रहाण मनुज्ञाप्य देवो राजानं नैः मरुद्गणैः कर्मदेवैः २५ इति वालकांडे सर्गः ४२ देवदेवे ब्रह्मणि राजा

उक्त्वा वाक्यं ततो राजानं सर्वलोकपितामहः प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षरां २१
मनोरथो महानेष भगीरथ महारथ एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन २२ इयं हैमवती ज्येष्ठा गंगा हिमवतः सुता तां वै धारयितुं राजन् हरस्तत्र नियुज्यतां २३ गंगायाः पतनं राजन् पृथिवी न सहिष्यते तां वै धारयितुं राजन् नान्यं पश्यामि शूलिनः २४ तमेवमुक्त्वा राजानं गंगां चाभाष्य लोककृत् जगाम त्रिदिवं देवैः सर्वैः सह मरुद्गणैः २५ इत्यार्षे सर्गः ४२
देवदेवे गते तस्मिन् सोंगुष्ठाग्रनिपीडितां कृत्वा वसुमतीं राम वत्सरं समुपासत १ अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः उमापतिः पशुपती राजानमिदमब्रवीत् २ प्रीतस्तेहं नरश्रेष्ठ करिष्यामि तव प्रियम् शिरसा धारयिष्यामि शैलराजसुतामहम् ३

नामपि देवानां देवे ब्रह्मणि गते अंगुष्ठाग्रेण निपीडितां तां समुपासते स्माप्रथमवचनं समुपास्ते त्यर्थः उमापतिमिति शेषः १२ ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदामासीतोतिरीश्वरेणाधारणांगीकारे हृतेगर्वादित्यर्थः ४ शिवेशोभनेताहृशरूपकथणेहेतुमाह अचिंतयदित्यादि ५
तस्यावलेपनमितिसंधिरार्षः अवलेपनेखस्यापिस्रोतसाअभिभवनचिंतारूपगर्वे ६ तिरोभावयितुंजटामंडलेतिरोधा

ततोहैमवतीज्येष्ठासर्वलोकनमस्कृता तदासातिमहद्रूपंकृत्वावेगंवदुःसहं ४ आ
काशादपतद्गामपिशिवेशिवशिरस्युत अचिंतयच्चसादेवीगंगापरमदुर्धरा ५ विशाम्य
हंहिपातालंस्रोतसागृह्यशंकरं तस्यावलेपनंज्ञात्वाक्रुद्धस्तुभगवान्हरः ६ तिरोभाव
यितुंबुद्धिंचक्रेत्रिनयनस्तदा सातस्मिन्पतितापुण्यापुण्येरुद्रस्यमूर्धनि ७ हिमव
त्प्रतिमेरामजटामंडलगह्वरे साकथंचिन्महींगंतुंनाशक्नोद्यत्नमास्थिता ८

तअभिभूतांकर्तुं ७ जटामंडलेनगह्वरेदुःप्रवेशोनिर्गमेयत्नमास्थितापिमहींगंतुंनाशक्नोदित्यन्वयः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ· 2.49
रा·बा·
टी·
१२५

नैवेति जटामंडले भ्रांता भ्राजमाना गतापि वर्षं ततः तत्प्रांतभागतोऽपि निर्गमनं न लेभे प्रांतभागेऽपि तत्र एव भ्रमसमाप्त्या
भगवतोऽत्यादनान् यद्यपि त्रिलोकीं व मायया भोगाजलरूपमिति पुराणेतिहासादिषु प्रसिद्धं तस्य वाहं ममेवेत्यभिमानहा
न स्यायमहंकारः शिवस्य च तादृशस्य न पराभवाहंकारो ऽतः तं न व्यवितस्तथ्यातादृशा गंगाया प्रांतभागे मध्य एव भ्रमो
ऽयं संततमनुवितः अत एवोक्तं मत्स्य च परमात्मा शिवो ह्यप्रमत्तस्मादस्मा च जाह्नवी इति यः सेवते गंगा न समोऽस्य सभा

नैवसा निर्गमं लेभे जटामंडलमंततः तत्रैवाबभ्रमद्देवी संवत्सरगणान् बहून् ९ तामपश्यत्
पुनस्तत्र तपः परमममास्थितः सतेन तोषितश्चासीदत्यंतं रघुनंदन १० विससर्ज ततो गंगां
हरो बिंदुसरः प्रति तस्यां विसृज्यमानायां सप्तस्रोतांसि जज्ञिरे ॥ ह्लादिनी पावनी चैव
नलिनी च तथैव च तिस्रः प्राचीं दिशं जग्मुर्गंगाः शिवजलाः शुभाः १२

जनमिति तथापि लीलामात्रत्वाददोषः शिवविष्णोः परस्परमुपास्योपासकभाववदिति बोध्यं तर्हि किं कृतवती तत्राह त
त्रैवेति अबभ्रमत् भ्रांताभूत् अत्राषत्वात्तदन्तेन ९ अथ तां जटाटवी निरोहितां गंगां भगीरथः अपश्यत् पुनस्तत्र तस्या
निविषये परमुद्दिश्य परमं तपश्चास्थितः स हरः तेन तपसा १० ततस्तुष्टः स न हरः बिंदुसरः प्रति हिमवतः स्थितं त्रलमिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एतेन भगीरथतपोहेतुकं त्रिपथगमनमुक्तं अथ चरितप्रश्नोत्तरमाह भगीरथोपीति १४ अनुव्रजाद्दिमडभावृष्ठा
र्थः १५ तोत्रयाह्रु पुरस्कृत मिमत्र देतुर्गगनादित्यादिनाडक्तः शिंशुमारः कच्छाकारो जलचरविशेषः १६० गगनाङ्गा

250 सवदत्तश्चैव सीता च सिंधुश्चैव महानदी तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु दिशं शुभाः १६ स
प्तमी चान्वगात्तासां भगीरथरथं तदा भगीरथोपि राजर्षिर्दिव्यं स्यंदनमास्थितः १४ प्रा
यादग्रे महातेजा गंगा तं चाप्यनुव्रजत गगनाच्छंकरशिरस्ततो धरणिमागता १५ प्रसर्प
त जलं तत्र तीव्रशब्द पुरस्कृतं मत्स्यकच्छपसंघैश्च शिंशुमारगणैस्तथा १६ पतद्भिः पा
तितैश्चैव व्यरोचत वसुंधरा ततो देवर्षिगंधर्वा यक्षसिद्धगणास्तथा १७ व्यलोकयंत ते त
त्र गगनाद्गां गतां तदा विमानैर्नगराकारैर्हयैर्गजवरैस्तदा १८ पारिप्लवगताश्चापि देव
तास्तत्र विष्ठिताः तदद्भुततमं लोके गंगावतरमुत्तमं १९ दिदृक्षवो देवगणाः समीयुर
मितौजसः संपतद्भिः सुरगणैस्तेषां चाभरणौजसा २० शतादित्यमिवाभाति गगनं गतमनोघद
गता रुद्रजटाकाशानुवामिनर्थः विमानैर्निसादेश्वरनरति पापः १८ परिप्लवगताः धर्मसामोद्यर्थरसेके पारिप्लवो यान
भेदः शिबिकादिरूपः शिबिकादियानस्याद्यर्थं समेदेवगणाश्चादयः संपतद्भिः आगच्छद्भिः २० तन्मूलिकामपमामाहरप

५

नारसिंहवि २१

उ॰ 251 विद्विमैः निरस्तैः विद्युद्भिहं ७ लिंगोपिपतत्सामाणा तत्सलिलोत्पीडैः फेनैः सहस्रधा कणं वाष्पाद्युपादितः आकाश
रावा॰ मभवत्प्रामामितिशेषः २२ शारदाभ्रैरिव हंससंप्लवैर्हंससमूहैः संकीर्णंगगनं अभवदिति पूर्वेणान्वयः आपनविस्ट
वाटी॰ तम्बाहं २३ विनतं अमार्धदेशे संकुचितं तदुद्भूतं याचाणाण्ड्रियोगात् २४ मुहूर्तादिति ऊर्ध्वपथगमन सलिलपरंपरातो

१२९ विद्युद्भिरिव विद्विष्टैराकाशमभवत्तदा पांडुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ॥ २२
शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः क्वचिद्द्रुततरं याति कुटिलं क्वचिदायतं २३ विन
तं क्वचिदुद्भूतं क्वचिद्याति शनैः शनैः सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः २४ मु
हूर्तादूर्ध्वपथगं नाम पपात वसुधां पुनः तच्छंकरशिरोभ्रष्टं भ्रष्टं भूमितले पुनः २५ व्य
रोचत तदा तोयं निर्मलं गतकल्मषं तत्रर्षिगणगंधर्वा वसुधातलवासिनः २६
भवांगपतितं तोयं पवित्रमिति पस्पृशुः शापात्प्रपतिता ये च गगनाद्वसुधातलम् २७

निमित्तं शंकरशिरसि भ्रष्टं २५ निर्मलं नैर्मल्येपातकक्षयेण हेतुः गतकल्मषं स्वजलस्पर्शवतां प्राणिनां नाशितपापं
२६ भवांगेति वयीयस्पृशुः स्पृशुः न केवलं पापसंहारमात्रं गंगायाः कृत्यं अपितु उपलोकप्रापणमपीत्याह
पापादित्यादि गगनात्तु वसुधातलात् २७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

252

गतकल्मषाः मुक्तशापाः अनेनब्रह्मशापपरिहारोपि गंगास्नानफलमिति हृतपापानां तज्जलस्पर्शेन तत्पापनाशः पूर्वकं स्वर्गप्राप्तिः कैमुतिकन्यायेनैव सिद्धेतिबोध्यं २८ मुदितः दर्शनमात्रेण मुमुदे स्नानपानादिना २९ २२ भगीरथरथानुगाः सुतो

कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः पुनराकाशमाविश्य स्वान् लोकान् प्रतिपेदिरे मुमुदे मुदितो लोकस्तेन तोयेन भास्वता कृताभिषेको गंगायां बभूव गतकल्मषः भगीरथो हि राजर्षिर्दिव्यं स्यंदनमास्थितः २० प्रायादग्रे महाराजस्तं गंगा पृष्ठतोन्वगात् देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः २१ गंधर्वयक्षप्रवराः सकिन्नरमहोरगाः सर्पाश्चाप्सरसो राम भगीरथरथानुगाः २२ गंगामन्वगमन् प्रीताः सर्वे जलचराश्च ये यतो भगीरथो राजा ततो गंगा यशस्विनी २३ जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी ततो हि यजमानस्य जह्नोरद्भुतकर्मणः २४ गंगा संप्लावयामास यज्ञवाटं महात्मनः तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च

गंगामन्वगमन्नित्यन्वयः यतः येन कर्मणा २३ अद्भुतकर्मणः वक्ष्यमाणगंगापानेनाद्भुताभिप्रायमेतत् २४ तस्यावलेपनं तस्याश्च अवलेपनेन गर्वमित्यर्थः २५ अपिवान् अगस्त्यः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

253

ॐ गंगा वा टी १२०

सृजयंतित्सोत्रादिनेतिशेषः अनुनयंतीतिपाठेशैलराजदुहितुः कथममदुहितृत्वमितिविमतिवारणायगंगानुनयः १०
तुष्टः गंगायाः वैरदुहितृत्वमापणात् तस्मात्तयतः पीतोपुनरसृजत् तस्मादित्यर्थः ३८ सागरंसागरस्वनत्वातं संप्रा
सातत्पूरणायेतिशेषः द्वारंवतं तस्यागमस्यनयानोत्तरमितिसत्यवत्सकृटे ३९ तस्यकर्मणः सिद्ध्यर्थंभगीरथस्यस्वंवशो

सृजयंतिमहात्मानंजह्नुंपुरुषसत्तमं गंगांचापिनयंतिस्मदुहितृत्वेमहात्मनः ३८
ततस्तुष्टोमहातेजाः श्रोत्राभ्यामसृजत्प्रभुः तस्माज्जह्नुसुतागंगाप्रोच्यतेजाह्नवी
तिच ३९ जगामचपुनर्गंगाभगीरथरथानुगाः सागरंचापिसंप्राप्तासरिच्छ्रेष्ठातदा
रसातलमुपागच्छत्सिद्ध्यर्थंतस्यकर्मणः भगीरथोपिराजर्षिर्गंगामादाययत्नतः ४१
पितामहान्भस्मकृतानपश्यद्गतचेतनः अथतद्भस्मनांराशिंगंगासलिलमुत्तम ४२
प्लावयत्पूतपाप्मानः स्वर्गंप्राप्तारघूत्तम ४२ इत्यार्षेसर्गः ४२ सगत्वासागरंराजागंगयानु

द्धारकर्मणः यत्नतः प्रायत्नयत्नैः ४० भस्मसात्कृतान्कपिलकोपाग्निनाभस्मभावंप्राप्तान् ४१ प्लावयेत्सेचयतिस्म पूत
पापत्वंयापाप्मानः ४२ इतिश्रीचत्वारिंशः सर्गः ४३ उक्तमेवविस्तरेणाह सगरेतिभस्मसात्कृताः कार्त्स्न्येनभस्मकृताः १२०

254 तारिताः प्रेतत्वात् देववत् स्वर्गप्राप्तास्य अनेन प्रेतत्वविमुक्तिस्वर्गप्राप्ती भस्मनोपि गंगांभःस्पर्शस्य फलं किमुतास्थिपुञ्जादेरि
त्युक्तं १ यावत्सागरस्य जलं स्थास्यति तावत् दिवि स्थास्यंतीत्यर्थः तन्निमित्तमपि तया गंगया यावत् एवात्र सागरस्य पूरणं
मिति भावः ४ त्वत्कृतेन नाम्ना दिक्श्रुतत्वमेव दर्शयति गंगेत्यादि त्रिपथगेति नाम्नोऽर्थः तं दर्शयति त्रीनित्यादि अनेन क

भस्मन्येषां तु निर्दग्धां गंगायाः सलिलेन वै॥ सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् २
तारितास्ते नरशार्दूल दिवं याताश्च देववत्॥ षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ३ सा
गरस्य जलं लोके यावत् स्थास्यति पार्थिव॥ सगरस्यात्मजाः सर्वे दिवि स्थास्यंति देववत् ४
इयं च दुहिता ज्येष्ठा तव गंगा भविष्यति॥ त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता ५
गंगा त्रिपथगा नाम दिव्या भागीरथीति च॥ त्रीन्पथो भावयंतीति तस्मात् त्रिपथगा स्मृता ६
पितामहानां सर्वेषां त्वमत्र मनुजाधिप॥ कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय ७

र्यंतं गंगा त्रिपथगेत्युत्तरं संहृतं ८ कुरुष्वेति गंगाजलसेकः स्नानप्रायश्चित्तत्वात् सलिलदानयोग्यतायं संबंधः प्रतिज्ञां
गंगासलिलदानेन सागरात्मजानां स्वर्गे स्वेवं नृपांगत्वमुपादिष्टोऽपवर्जय समापय इत्यर्थः ७

255 पूर्वकेन सगरेण प्रपौत्रः गंगालाभं नृप पूर्वकेनेति कर्मण्येन पुषेव कृत्स्नो योत्पते ८ गंगां नेतुं भूलोकं प्रापयितुं प्रार्थ
यता प्रतिज्ञा न समुपवर्जिता तत्फलपर्यवसायिनी कृता ९ मत्तुल्येति बलत्वेत्यर्थः १० गंगां नेतुं प्रार्थयता तातेन गंगां नेतुं
न शकितेत्यर्थः यद्वा गंगामानेतुं न शकिता न विचारिता प्रतिज्ञेति शेषः चिंताविषयमपि प्रापितेत्यर्थः इति तत्प्राध

पूर्वकेन हि ते राजंस्तेनातियशसा तदा प्रार्थिता गंगां प्रार्थयता नेह प्राप्तो मनोरथः ८ त
थैवांशुमता वत्स लोकेऽप्रतिमतेजसा गंगां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ९
राजर्षिणा गुणवता महर्षिसमतेजसा मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च १० दिले
पेन महाभाग तव पित्रातितेजसा पुनर्न शकिता नेतुं गंगां प्रार्थयतानघ ११ तच्च गंगा
वतरणं त्वया कृतमरिंदम अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् १३ सा त्वया समति
क्रान्ता प्रतिज्ञा पुरुषर्षभ प्राप्तोसि परमे लोके यशः परमसंमतम् १२

यतेति पदस्वरसविरोधाश्चिंत्यं ११ समतिक्रान्ता निस्तीर्णा परमं संमतं परममुत्कृष्टं च तत्संमतं सर्वलोकसंमतमि
त्यर्थः १२ धर्मस्यायतनं धर्मप्राप्तिस्थानं महत्त्वं ब्रह्मलोक रूप १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यथास्याब्रह्मलोकप्रापकत्वं तदाह स्नावयस्वेति आत्मानं स्वदेहं सदोचिते सिंहकर्कटमध्येपि स्नानाविध्यवहारोचिते
भूप्रवहनदीनामेव तत्काले भौमत्वमूलरजः संबंधात् स्नानाद्यनर्हत्वं पुण्यफल इति मत्वर्थीयाजंतो व्रतुर्वो दिवो अनेन
स्नानमात्रेण गंगा ब्रह्मलोकप्रापिका भवतीति सूचितं १४ सागराणां गंगास्नानात् प्रायश्चित्ततत्त्वसंदेहाय नु तयैव गंगाजलसंबंध

256

स्नावयस्व त्वमात्मानं नरोत्तम सदोचिते । सलिले पुरुषश्रेष्ठ पुण्यफलो भव १४ पि
तामहानां सर्वेषां कृत्वा सलिलक्रियां । स्वस्ति तेस्तु गमिष्यामि स्वलोकं गम्यतां नृप १५
इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः । यथागतं तथा गच्छद्देवलोकं महायशाः १६
भगीरथस्तु राजर्षिः कृत्वा सलिलमुत्तमं । यथाक्रमं यथान्यायं सागराणां महायशाः १७
कृतोदकः शुचीराजा स्वपुरं प्रविवेश ह । समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह १८

सर्वपापप्रायश्चित्तत्वबोधनाय वक्तृत्वरस्तेषां सलिलं कार्यमित्याह पितामहानामित्यादि इदं लोकं ब्रह्मलोकं गम्यतां कृ
तोदकक्रियेणास्वपुरमिति शेषः अयं नियोगो राजधर्मपरिपालनाय १५ यथागतमिति च्छेदः देवलोकं ब्रह्मलोकं १६
यथाक्रमं ज्येष्ठक्रमेण यथान्यायं कल्पक्रमेण उक्तमुत्तमलोकप्रापकं १७ कृतोदक इति अस्मेषामपीति शेषः १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

257

नष्टशोकः नष्टह्रियो जगाशोकः विगतज्वरः कथमस्मत्पालनं भविष्यतीति विगतचिंतः १९ उपसंहरति एषइति स्वस्तिभद्रयोः न
त्वीमास्वसृत्वनार्थिग्रहणं २० आख्यानश्रवणफलमाह धन्यमित्यादि २१ इत्यार्षेरामायणेचतुश्चत्वारिंशः सर्गः ४४ अ

प्रमुमोदचलोकस्तंनृपमासाद्यराघव नष्टशोकःसमृद्धार्थोबभूवविगतज्वरः १९ ए
षतेरामगंगायाविस्तरेभिहितामया स्वस्तिप्राप्नुहिभद्रंतेसंध्याकालोतिवर्तते २० ध
न्यंयशस्यमायुष्यंपुत्र्यंस्वर्ग्यमथापिच यःश्रावयतिविप्रेषुक्षत्रियेष्वितरेषुच २१ प्री
यंतेपितरस्तस्यप्रीयंतेदेवतानिच इदमाख्यानमायुष्यंगंगावतरणंशुभं २२ यःशृणो
तिचकाकुत्स्थसर्वान्कामानवाप्नुयात् सर्वेपापाःप्रणश्यंतिआयुःकीर्तिश्चवर्धते २३
इत्यार्षेरामायणेवालकांडेचत्वारिंशः ४४ विश्वामित्रवचःश्रुत्वाराघवःसहलक्ष्मणः वि
स्मयंपरमंगत्वाविश्वामित्रमथाब्रवीत् अत्यद्भुतमिदंब्रह्मन्कथितंपरमंत्वया गंगाव
तरणंपुण्यंसागरस्यापिपूरणम् २

ब्रवीत् राज्यंतेइतिशेषः १ पूरणंगंगयेतिशेषः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इमां तव कथां त्वदुक्तां कथां चिंतयतो मम रात्रिः क्षणभूतेव संवृत्ता अतीता एवमाश्चर्यभूता त्वदुक्ता गंगाकथेति भा
वः १ विश्वामित्रेति संबोधनं उक्तस्यैवार्थस्य आदरातिशयबोधनाय पुनरुपादानं ४ भगवतीगंगाकथाश्रवणात्पुण्या

258

क्षणभूतेव नौ रात्रिः संवृत्तेयं परंतप इमां चिंतयतः सर्वां निखिलेन कथां तव १ त
स्यास्तु शर्वरी सर्वा मम सौमित्रिणा सह जगाम चिंतयानस्य विश्वामित्र कथां शुभां ४ त
तः प्रभाते विमले विश्वामित्रं तपोधनं उवाच राघवो वाक्यं कृताह्निकमरिंदमः ५ गता
भगवती रात्रिः श्रोतव्यं परमं श्रुतं तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीं ६ नौरेषा
हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणां भगवंतमिह प्राप्तं ज्ञात्वा त्वरितमागता ७ तस्य त
द्वचनं श्रुत्वा राघवस्य महात्मनः संतारं कारयामास सर्षिसंघस्य कौशिकः ८ उत्तरं ती
रमासाद्य संपूज्यर्षिगणं ततः गंगाकूले निविष्टास्ते विशालां ददृशुः पुरीं ९ ततो मुनिव
रस्तूर्णं जगाम सहराघवः विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा १० अथ रामो महाप्राज्ञो

त्वास्तीर्णा सुखं शुभं आस्तीर्णं यस्यां सा नौ त्वरितमागता भवतस्तव सेवार्थमित्याशयः ७ कारयामास नाविकैरिति शेषः
संपूज्य ऋषिगणं ततो वस्यामि इति शेषः ९ विशालां जगाम पूर्वं दृष्टामिति शेषः १० विशालापप्रच्छ विशालां विषये

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ. रामा. बालो. १३.

259 विस्मालायां संप्रतिवर्ततइतिशेषः १२ विशालायां पुरातनमितिपाठः पुरातनं नत्वधुनानिर्मितं प्राक्तनं वृत्तांतं विशालस्येतिपा
ठेतत्रनगरीनिर्माता राजा विशालो नाम यद्वा विशालस्य विशालानगर्यधिष्ठानदेशस्येत्यर्थः १३ शक्रस्य कथां विशालावै
भवप्रतिपादकां कथयतः सकाशात् मया श्रुतां अस्मिन्देशे विशालानगर्यधिष्ठानदेशे यद्वृत्तं पुरातनं तद्विषयां तत्वेन

कतमोराजवंशोयं विशालायां महामुने श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे १२ तस्यत
द्वचनं श्रुत्वा रामस्य मुनिपुंगवः आख्यातुं तत्समारेभे विशालस्य पुरातनं १३ श्रूयतां राम
शक्रस्य कथां कथयतः श्रुतां अस्मिन्देशे हि यद्वृत्तं शृणु तत्वेन राघव १४ पूर्वं कृतयुगे रा
म दितेः पुत्रा महाबलाः अदितेश्च महाभागा वीर्यवंतः सुधार्मिकाः १५ ततस्तेषां नरव्या
घ्र बुद्धिरासीन्महात्मनां अमरा विजराश्चैव कथं स्याम निरामयाः १६ तेषां चिंतयतां
तत्र बुद्धिरासीद्विपश्चितां क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै १७ ततो निश्चित्य मथ
नं योक्त्रं कृत्वा च वासुकिं मंथानं मंदरं कृत्वा मम

स्यएवेतियोजना १४ सुधार्मिका इत्यादि पुत्रविशेषणं आ
सन्नितिशेषः १५ अमराः मराः मरणं रहिताः विजराः जराः रहिताः निरामयाः नीरोगाः १६ रसं अमृतरूपं रसायनं १७ योक्त्रं मथ

१३

योऽक्रूसर्पः मथनरज्जुभूतः सर्पः वमंतन इति तिं उग्रमार्गं प्रतिशापितं विषं १९ उत्पपातेति ततस्तस्मादि शिलादशनादित्यर्थः दष्टशि
लाखंडात् एवं महाविषं द्रूपं भूत्वा उत्पपात २० प्रभुर्महादेवः ततः महादेव शङ्करभावानेनतदं २२ स्मितं कृत्वा छलेन विषदानात्

260

अथ वर्षसहस्रेण योऽक्रूसर्पशिरांसि च वमंतोऽतिविषं तत्र ददंशुर्दशनैः शिलाः १९ उत्पपाता
ग्निसंकाशं हालाहलमहाविषं तेन दग्धं जगत्सर्वं सदेवासुरमानवं २० अथ देवा महादेवं शं
करं शरणार्थिनः जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः २१ एवमुक्तस्ततो देवैर्देवदे
वेश्वरः प्रभुः प्रादुरासीत्ततो देवांस्त्वव्रवक्रथयो हरिः २२ उवाचैनं स्मितं कृत्वा तदं शूलधरं ह
रिः देवैस्तैर्मथ्यमाने तु यत्सर्वं समुपस्थितं २३ तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रतो हि यत् अ
ग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो २४ इत्युक्त्वा च सुरश्रेष्ठस्तेषां तत्रैव तिष्ठतां देवता
नामयं हृष्टा श्रुत्वा वाक्यं तु शार्ङ्गिणः २५ हालाहलं विषं घोरं संजग्राहामृतोपमं देवा

स्मित २६ यत् यतो भगवान् सुराणामग्रतः तेषां मध्ये श्रेष्ठस्तस्मात् सर्वः २४ सर्वश्रेष्ठः विष्णुः २५ अमृतोपमेय यथा भवति तथा
संजग्राह अन्वयः सर्वदेवेषु मथनसहायतया स्थितेष्वपि विषयातानंतरं तमीड्यातामस्मत्का जगामामृत ऊरुमिति शेषः २९

वामनपु॰ ५९

ॐ
गावा
वाटी
१३१

261

मंथानः पर्वतोत्तमः मंदरः २७ कामठं काच्छपं २९ विशेषे स्थितवान् जलाशाय इत्यादौ स्थितमर्थं स्पष्टो निर्दर्शनात् ३० ममंथ पुरुषोत्तमः अनेनाक्षिवैचित्र्यं प्रकटीकृतं ३१ धन्वंतरिरुदतिष्ठदित्यन्वयः अप्सरा इत्यार्षं उदतिष्ठन्निरत्नकर्षः ३२ अप्सरी

ततो देवासुराः सर्वे ममंथुरजुनंदन प्रविवेशाथ पातालं मंथानः पर्वतोत्तमः २७ ततो
देवाः सगंधर्वास्तुष्टुवुर्मधुसूदन त्वं गतिः सर्वभूतानां विशेषेण दिवौकसां २८ पाल
यस्मान्महाबाहो गिरिमुद्धर्तुमर्हसि इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः २९
पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः दे
वानां मध्यतः स्थित्वा ममंथ पुरुषोत्तमः अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ३० उदति
ष्ठत्सुधर्मात्मा सदंडः सकमंडलुः अथ धन्वंतरिर्नाम अप्सरास्तु सुवर्चसः ३१ अप्सु निर्म
थनादेव रसात्तस्माद्वरस्त्रियः उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ३२ षष्टिः कोट्यो
भवंस्तासामप्सराणां सुवर्चसां असंख्येयास्तु काकुत्स्थ

दीरूपास्तु तस्मात्क्षीरोदमाः भवन्तादित्यर्थः ३३
षष्टिः कोट्यः षष्टिकोटिसंख्याः प्रधानाप्सरसाम भवन् अपरिमितपरिचारिकोपेताः षष्टिकोट्यप्सरसो जाता इत्यर्थः ३४ १३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ताः उक्ताप्सरसः न प्रतिगृह्णांति स्मैवेमाः नास्मस्येति नांगीकुर्वंति सर्वे देवा दानवाश्चेत्यर्थः तासां विशिष्य यस्य निष्ठ
यैवं समुग्याकारतया स्थितत्वात् तासां विशिष्य प्रतिग्रहाभावाः अत एव तासां साधारण्यं २५ वारुणीसुरापि देवतापरिग्रहे
केनचित् दासाधारण्येन नांगीकारे २६ अदितिसुत नांगीकारे हेतुरनिंदितामिति निषीयशास्त्रतमानुषविषयशास्त्रे देवता

262

र परमं तपः अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ३ हविष्पंदो मधुष्पंदो दृढनेत्रो महारथः
पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ४ अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं जिता रा
जर्षिलोकास्ते तपसा कुशिकात्मज ५

वैरइति इदमेव तपोनाशकमस्य १ ततापतपश्चकारेत्यर्थः २ तपसोद्योरत्वंद
र्शयति फलेत्यादि दांतो जितेंद्रियः ३ पुत्रा हविष्पंदादयः ३ ब्रह्मर्षितायब्रह्मविघायातपः कुर्वाणं तं तदधिदेवनत्वात् ब्रह्माब्रवीत् ४ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रा॰
बा॰
टी॰
१५५

309

८ देवैः सह त्रिविष्टपं स्वर्गं गता न तु स्वं लोकं गताः लोकानां भरतादीनां ७ समन्युः सदैन्यः स्वं प्रत्येवेदं वचः सुमहत्तितपसि कृतेऽपि सर्षिगणा देवा मां राजर्षिरित्येव विदुः प्रगवच्छंति तस्मादस्य तपसः तद्ब्राह्मणत्वफलं नास्ति न भवतीति मन्ये ८ परमात्मवान् परमात्म

प्रसन्नेन तपसा तात राजर्षिरिति विद्महे एवमुक्त्वा महातेजा जग्मुः सह दैवतैः ८ त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ७ दुःखेन महताविष्टः समन्युरिदमब्रवीत् तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ८ देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलं एवं निश्चित्य मनसा भूय एव महातपाः ९ तपश्चचार धर्मात्मा काकुत्स्थ परमात्मवान् एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः १० त्रिशंकुरिति विख्यात इक्ष्वाकुकुलवर्धनः तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ११ गच्छेयं स्वशरीरेण देवतानां परां गतिं वसिष्ठं स समाहूय कथयामास चिंतितं १२ अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना प्रत्याख्यातो वसिष्ठेन स ययौ दक्षिणां दिशं १३ ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो

प्यात्मवान् परमधीरश्च ११ गच्छेयं यज्ञबलेनेति शेषः देवतानां परां गतिः स्वर्गः १२ अशक्यं तत्कथनरूपं कर्म प्रत्याख्यानं जीवच्छरीरत्रिशंकुरमे चेति प्रत्याख्यातः १३ तत्कर्म स्वशरीरस्वर्गमापकयज्ञकर्म तस्य वसिष्ठस्य पुत्राः यत्र तेपिरे तत्र गत इति शेषः १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शतशब्देनसावयवगतवहुत्वेनवहुवचनं अनभिधानात् अतःवसिष्ठपुत्रानित्यनेनशतमित्यनेनचसामानाधिकरण्यं १५ ह्रियात्र
स्मितह्रीतश्रत्याख्यानजया महात्मनइतिद्वितीयार्थेमहात्मानइत्यर्थः १६ शरण्यान्रक्षणसमर्थान्शरणागतः अस्मेचारक्ष्यास्मा

त्रिशंकुस्तुमहातेजाःशतंपरमभास्वरं वसिष्ठपुत्रान्ददृशेतप्यमानान्मनस्विनः १५ सोभि
गम्यमहात्मानःसर्वानेवगुरोःसुतान् अभिवाद्यानुपूर्व्येणह्रियाकिंचिदवाङ्मुखः १६ अब्र
वीत्समहात्मानःसर्वानेवकृतांजलिः शरणंवःप्रपन्नोहंशरण्यान्शरणागतः १७ प्रत्याख्या
तोस्मिभद्रंवोवसिष्ठेनमहात्मना यष्टुकामोमहायज्ञंतदनुज्ञातुमर्हथ १८ गुरुपुत्रानहंसर्वा
न्नमस्कृत्यप्रसादये शिरसाप्रणतोयाचेब्राह्मणांस्तपसिस्थितान् १९ तेमांभवंतःसिद्ध्यर्थंयाज
यंतुसमाहिताः सशरीरोयथाहंवैदेवलोकमवाप्नुयां २० प्रत्याख्यातोवसिष्ठेनगतिमन्यां
स्तपोधनाः गुरुपुत्रानृतेसर्वान्नाहंपश्यामिकांचन २१

शरणागतोपिशरण्यान्त्वंप्राप्तोपीत्यर्थः १७ ब्राह्मणान्ब्रह्मत्वार्थब्राह्मण्येन १९ सिद्ध्यर्थंसशरीरस्वर्गगमनसिद्ध्यर्थं २० गुरुपु
त्रान्ऋतेतान्विनाअन्यांकांचनगतिमहंनपश्यामीत्यन्वयः २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ॰
रामा॰
बाटी॰
१५८

311

अयं श्लोकः प्रतिमरुन्निकत्तकस्वरसः तस्मात् इक्ष्वाकूणां परमगतिरूपात्पुरोधसो वसिष्ठादनन्तरमित्यर्थः २२ इति सप्तपंचाशः ५७
क्रोधसमन्वितमिति ऋषिपुत्रशतविशेषणं १ दुर्मेधः दुर्बुद्धे शाखान्तरं याजनादिना रक्षकान्तरं २ न चातिक्रम्य तं शक्यमित्वाऊ

इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः तस्मादनन्तरं सर्वे भवन्तो दैवतं मम २२ इत्यार्षे सर्गः ५७
ततस्त्रिशंकोर्वचनं श्रुत्वा क्रोधसमन्वितं ऋषिपुत्रशतं राम राजानमिदमब्रवीत् १ प्रत्याख्या
तोसि दुर्मेधो गुरुणा सत्यवादिना तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् २ इक्ष्वाकूणां
हि सर्वेषां पुरोधाः परमा गतिः न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ३ अशक्यमिति
सोवाच वसिष्ठो भगवान् ऋषिः तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ४ बालिशस्त्वं नरश्रे
ष्ठ गम्यतां स्वपुरं पुनः याजने भगवाञ्छक्तस्त्रैलोक्यस्यापि पार्थिव ५ अवमानं कथं क
र्तुं तस्य शक्ष्यामहे वयं तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् ८

मितिशेषः इत्सोवाचेति सोविलोपे चेदिति साधु तं क्रतुं यमशक्यमिति वावदत् यज्ञमित्यर्थः कथं च कायमपि न शक्ता इत्यर्थः ४
बालिशोऽज्ञः त्रैलोक्यस्यापि सिद्धार्थं याजने इत्यर्थः भगवान्वसिष्ठः ५ अवमानं तेनेतरेणासाध्यं तयोक्तार्थस्य साधनरूपम् ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पतितान्वर्जयिष्यन् ७ अन्यांगतिंयोजकांतरं घोराभिसंहितंघोराभिप्रायसंयुक्तं कुलगुर्वतिक्रमेणान्याश्रयस्यकृतत्वाच्छापहेतुत्
यातदभिप्रायसघोरत्वं ८ चंडालत्वंगमिष्यसीति शेपुरितियोजनात् नाहशापायिष्टदर्शनस्यपापजनकत्वात्स्वस्वाश्रमप्रवेशोक्तिः

312

सराजापुनरेवैतानिदंवचनमब्रवीत् प्रत्याख्यातोभगवतागुरुपुत्रैस्तथैवहि ७ अन्यांग
तिंगमिष्यामिस्वस्तिवोस्तुतपोधनाः ऋषिपुत्रास्तुतच्छ्रुत्वावाक्यंघोराभिसंहितं ८ शेपुःप
रमसंक्रुद्धाश्चंडालत्वंगमिष्यसि इत्युक्तातेमहात्मानोविविशुस्स्वमाश्रमं ९ अथरात्र्यां
व्यतीतायांराजाचंडालतांगतः नीलवस्त्रधरोनीलःपुरुषोध्वस्तमूर्धजः १० चित्यमाल्यां
गरागश्च आयसाभरणोभवत् तंदृष्ट्वामंत्रिणःसर्वेत्यक्त्वाचंडालरूपिणं ११ प्राद्रवन्सहि
ताःसर्वेपौरायेस्यानुगामिनः एकोहिराजाकाकुत्स्थजगामपरमात्मवान् १२

कं ९ परुषोरूक्षांगः ध्वस्तमूर्धजः स्रस्तकेशः १० चितास्मशानंतत्रभवंतद्भस्मादिमाल्यांगरागोयस्य अयोविका
रश्चायसंतदाभरणः त्यक्त्वा ११ अनुगामिनः सहगताः प्राद्रवन् तेत्यक्त्वागताः परमात्मवान्धीरः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दह्यमानस्यस्पर्शः स्वेनत्यादि विश्वामित्रंजगामेतिपूर्वेणान्वयः वसिष्ठवैरित्वात् विफलीकृतंवसिष्ठतत्पुत्रैर्विनाशितेहिकाम
स्मिकार्थे १४ यस्त्वंशापात्त्वंचंडालतांगतस्तस्येतः हागमनकार्यंकिमित्यन्वयः १५ ये काममनुद्दिश्य गतस्तंकाममवाप्य नै

दह्यमानोदिवारात्रंविश्वामित्रंतपोधनं विश्वामित्रस्तुतंदृष्ट्वाराजानंविफलीकृतं चं
डालरूपिणंराममुनिःकारुण्यमागतः कारुण्यात्समहातेजावाक्यंपरमधार्मिकः
इदंजगादभद्रंतेराजानंघोरदर्शनं किमागमनकार्यंतेराजपुत्रमहाबल १५ अयोध्या
धिपतेवीरशापाच्चंडालतांगतः अथतद्वाक्यमाकर्ण्यराजाचंडालतांगतः १६ अब्रवी
त्प्रांजलिर्वाक्यंवाक्यज्ञोवाक्यकोविदं प्रत्याख्यातोस्मिगुरुणागुरुपुत्रैस्तथैवच १७
अनवाप्यैवतंकामंमयाप्राप्तोविपर्ययः सशरीरोदिवंयायामितिमेसौम्यदर्शनं १८
मयाचेष्टंक्रतुशतंतच्चनावाप्यतेफलं अनृतंनोक्तपूर्वंमेनचवक्ष्येकदाचन १९

तावदेव अपितु विपर्ययो जातिभ्रंशो वेषरूपः कामस्माद्धि सशरीरस्य स्वर्गकामः इति शेषः सौम्यदर्शनेति संबोधनं १८ तद्धि तया
पितत्फलं सशरीरस्वर्गप्राप्तिरूपं नावाप्यत इत्यन्वयः क्रतुशतेन कृतेन यतितं चेत्यत्राह अनृतमिति १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृच्छ्रेष्वपिगतोऽन्यत्वंनवेत्सिस्यान्वयः त्वत्रधर्मेणानत्मादित्यर्था २० शीलंसद्गुणाःहत्तमाचारः इच्छतोममेतिशेषः २१ नगच्छे।
तिनगच्छतिस्मयदेवमतोदैवमेवप्राप्यफलमदृष्टमेव परंश्रेष्ठंहिताहितशेषणो पौरुषंयदानीतितधर्मानुष्ठानेनिरर्थकंप्राप
धुतिरस्कारेदुर्बलमित्यर्थः २२ दैवमुक्तंप्राक्रम्यतेऽभिभूयते परमागतिः सात्वादितरतिरस्कारेणोहिकस्वावटः।खेदंप्र

314

कृच्छ्रेष्वपिगतःसोमन्त्वत्रधर्मेणतेमये यत्नैर्वहुविधैर्दिष्टंप्रजाधर्मेणपालिताः २० गुरुवश्चम
हात्मानःशीलवृत्तेनतोषिताः धर्मेप्रयतमानस्ययत्नंचाहर्तुमिच्छतः २१ परितोषंनगच्छति
गुरवोमत्निपुंगव दैवमेवपरंमन्येपौरुषंतुनिरर्थकं २२ दैवेनाक्रम्यतेसर्वंदैवंहिपरमा।
गतिः तस्यमेपरमार्तस्यप्रसादमभिकांक्षतः २३ कर्तुमर्हसिभद्रंतेदैवोपहतकर्मणः
नान्यांगतिंगमिष्यामिनान्यच्छरणमस्तिमे दैवंपुरुषकारेणनिवर्तयितुमर्हसि २४ इ
त्यार्षेसर्गः ५८ उक्तवाक्यंतुराजानंकृपयाकुशिकात्मजः अब्रवीन्मधुरंवाक्यंसाक्षाच्चंडालतां
मतं १ इक्ष्वाकोस्वागतंवत्सजानामित्वांसुधार्मिकं

सादैवात्तुकृत्स्नसमर्थंतदीयंप्रसादमिच्छतोमेप्रसादंकर्तुम
र्हसि दैवेनोपहतंतिरस्कृतमिहानुष्ठीयमानंकर्मयस्य २२ इतिश्रीपंचाशःसर्गः ५८ उक्तेति १२

रेणुकांड २

७८

ॐ
यवा
वाटी
१५८
315

यज्ञसाहाय्यं यज्ञसाहाय्यं १ अनेनरूपेण गुरुशापकृतेनचंडालरूपेण ऋषिशापसामर्थ्याकर्तव्यशक्यत्वात् गमिष्यसिस्वर्गमिति शेषः जातिश्चंडालत्वाभावाद्यज्ञप्रवृत्तिः ४ हस्तप्राप्तंप्राप्ततायासुलभ्यतत्रहेतुः यस्त्वमित्यादि ५ यज्ञसंभारकारणात् यज्ञसा

अहमामंत्रये सर्वान्महर्षीन्पुण्यकर्मणः यज्ञसाह्यकरान्राजंस्ततोयक्ष्यसिनिर्वृतः गुरुशापकृतंरूपंयदिदंत्वयिवर्तते अनेनसहरूपेणसशरीरोगमिष्यसि ४ हस्तप्राप्तमहंमन्येस्वर्गंतवनराधिप यस्त्वंकौशिकमागम्यशरण्यंशरणागतः ५ एवमुक्त्वामहातेजाः पुत्रान्परमधार्मिकान् व्यादिदेशमहाप्राज्ञान्यज्ञसंभारकारणात् ६ सर्वान्शिष्यान्समाहूयवाक्यमेतदुवाचह सर्वानृषीन्सवासिष्ठानानयध्वंममाज्ञया ७ सशिष्यान्सुहृदश्चैवसर्त्विजःसुबहुश्रुतान् यदन्योवचनंब्रूयान्मद्वाक्यबलचोदितः ८ तत्सर्वमखिलेनोक्तंममाख्येयमनादृतं तस्यतद्वचनंश्रुत्वादिशोजग्मुस्तदाज्ञया ९ आजग्मुरथदेशेभ्यःसर्वेभ्योब्रह्मवादिनः तेचशिष्याःसमागम्यमुनिंज्वलिततेजसं १०

मग्रीसंपादनार्थं ६ शिष्याणांऋष्यानयनेआज्ञा ७ सुहृदः स्वस्यस्वस्यऋत्विक्सहितान् तद्विशेषणंसुबहुश्रुतानिति यदि निमंत्रितोन्योवा अनाहूतउपेक्षारूपंचंडालयाजनरूपनिंदात्मकंवा यद्वाक्यंब्रूयात्तत्सर्वमुक्तमखिलेनममाख्येयम् ८।९।

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेनैव ॥ सर्वदेशेष्वितस्ततःस्थिताइतिशेषः आगच्छन्नित्यस्यकेचिदेतिशेषः महोदयंतन्नामानमृषिं वसिष्ठं यच्छतंसर्वंतद्वर्जयित्वेतियोजना तद्वासिष्ठशतंक्रोधपर्याकुलाक्षरंयथाभवतितथावक्ष्यमाणंवचनमाहेत्यर्थः क्षत्रियोयस्यत्रिशंकोर्याजकःस्य याजनाधिकारात् चंडालस्ययज्ञेनधिकाराच ॥१३ सुराणांदेवतात्वेनभोक्तारः ऋषीणांऋषीणांऋत्विक्त्वेनयज्ञशिष्ट

318

श्रुत्वातुवचनंसर्वेसर्वेषांब्रह्मवादिनां श्रुत्वातेवचनंसर्वेसमायांतिद्विजातयः ॥ सर्वदेशेषु

चागच्छन्वर्जयित्वामहोदयं वासिष्ठंयच्छतंसर्वंक्रोधपर्याकुलाक्षरं ॥१२ यथाहवचनंसर्वंशृ

णुत्वंमुनिपुंगव क्षत्रियोयाजकोयस्यचंडालस्यविशेषतः ॥१३ कथंसदसिभोक्तारोहविस्त

स्यसुरर्षयः ब्राह्मणावामहात्मानोभुक्त्वाचंडालभोजनं ॥१४ कथंस्वर्गंगमिष्यंतिवि

श्वामित्रेणपालिताः एतद्वचननैष्ठुर्यमूचुःसंरक्तलोचनाः ॥१५ वासिष्ठामुनिशार्दूलस

र्वेसहमहोदयाः तेषांतद्वचनंश्रुत्वासर्वेषांमुनिपुंगवाः ॥१६

भोक्तारः ॥१४ पालिताइतिशेषः योक्तिःवचनैष्ठुर्यंप्रदर्शयन्नाह तेनैष्ठुर्यवद्वचनमित्यर्थः ॥१५ वासिष्ठाइत्यादौर्यद्वितीयमितिसम महोदयाः महोदयेनसहिताः ॥१६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रामा.
टी.
१५५

317

अदुष्टे हेतुः तप उग्रमिति तपस्तेजसा तत्रियस्य सर्वं चांडालयाजनमपि न दोषायेति ज्ञात्वापि यद्दूषयंति स्म १७ तस्माद्भस्मीभूता इत्यादि १८
सप्तजातिशतानि सप्तजन्मशतानि मृतपाः शववस्त्रादिहारिणः मुष्टिका नाम तन्नामानः इदानीं डोंवा इति प्रसिद्धाः १९ वि
कृता विकृतव्यापाराः विरूपा विकृताकाराः अदूष्यं यदूषयदिति शापवत् २० प्राणातिपातनिरतः प्राणिनां प्राणनाशोद्यतः

क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् यद्दूषयंत्यदुष्टं मां तप उग्रं समास्थितं १७ भस्मीभू
ता दुरात्मानो भविष्यंति न संशयः अद्य ते कालपाशेन नीता वैवस्वतक्षयं १८ सप्तजातिश
तान्येव मृतपाः संभवंतु ते श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः १९ विकृताश्च वि
रूपाश्च लोकाननुचरंत्विमान् महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् २० दूषितः सर्वलो
केषु निषादत्वं गमिष्यति प्राणातिपातनिरतो निरनुक्रोशतां गतः २१ दीर्घकालं मम क्रो
धाद्दुर्गतिं वर्तयिष्यति एतावदुक्त्वा वचनं विश्वामित्रो महातपाः २२ विरराम महातेजा ऋ
षिमध्ये महामुनिः २२ इत्यार्षे सर्गः ५५

अननुक्रोशो दया २१ वर्तयिष्यति प्राप्स्यति अत्रेदं बोध्यं तत्रियते याजने प्रवृत्तिः तत्रापि पापहर्षितवेंडालयाजने प्रवृत्तिः ब्राह्मणेषु वसिष्ठेषु वधादिकं कृत्वा पकरण प्रवृत्तिः एतत्सर्वं ब्राह्मणावे
कव्ययाप्यवर्तमानतपसो विनाशायेदेवत्कृतामिति बोध्यं २२ इति वालकांडे सर्गः ५५

१५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ज्ञात्वा योगबलेन १ इक्ष्वाकुदायादः त्रिशंकुः एवमादिगुणैर्याजयितुं योग्यः एवमादिगुणैर्याधिकारित्वं सूचितं २ स्वं प्रति शरणागमने हेतुमाह स्वेनेत्यादि ३ प्रवर्त्यतां आरभ्यतां ४ धर्मसंहितमिति क्रियाविशेषणं ऊचुरित्यस्य अन्वयः इति शेषः यदुक्तं तदाह अयमित्यादि ५ अग्नि

318

तपोबलहता नष्टा वासिष्ठाः स महोदयाः ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत अयमिक्ष्वाकुदायादस्त्रिशंकुरिति विश्रुतः धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः २ स्वेनानेन शरीरेण देवलोकजिगीषया यथायं स्वशरीरेण देवलोकं गमिष्यति ३ तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ४ ऊचुः समेताः सहसा धर्मज्ञा धर्मसंहितं अयं कुशिकदायादो मुनिः परमकोपनः ५ यदाह वचनं सम्यगेतत्कार्यं न संशयः अग्निकल्पो हि भगवान् शापं दास्यति रोषितः ६ तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा दिवि गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ७ ततः प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत एवमुक्त्वा महर्षयः संजह्रुः

कल्पः अजितकामक्रोधत्वात् शापं दास्यति यतः ८ तस्माद्दिवि ७ ततः सशरीरस्वर्गगमनाय यज्ञः प्रवर्त्यतां सर्वे भवन्तः स्वस्वकृत्यं समधितिष्ठत आरभध्वं ताः क्रियाः स्वस्वार्त्विज्यक

८

ॐ
रा॰
बा॰
टी॰
१९

319

याजकः अभवदिति यावत् अत एव ददर्शति स्रुवमुद्यम्येति ९ यथाकल्पं शास्त्रानुसारेण यथाविधि यथासंप्रदायानुष्ठानं क
ल्पशास्त्रानामापन्नोपन्यासस्थले प्रतुष्टेषांशे संप्रदायस्यैव शरणत्वात् महता कालेन अधिककालसाध्ययत्नपूर्वकमंत्रपाठे
न १० सर्वदेवताः प्रतीति शेषः तदा न यापि अनधिकारिणा याजनाद्व ॥ उद्यम्य ऊर्ध्वं क्रोधेन प्रक्षिप्य कोपस्रोवापिकावस्था

याजकश्च महातेजा विश्वामित्रो भवत्क्रतौ ऋषिजश्चानुपूर्व्येण मंत्रयत्मंत्रकोविदाः ९
वक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ततः कालेन महता विश्वामित्रो महातपाः १०
चकारावाहनं तत्र भागार्थं सर्वदेवताः नाभ्यागमंस्तदा तत्र भागार्थं सर्वदेवताः ११ त
तः कोपसमाविष्टो विश्वामित्रो महामुनिः स्रुवमुद्यम्य सक्रोधस्त्रिशंकुमिदमब्रवीत् १२
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा १३ दुष्प्रा
पं स्वशरीरेण स्वर्गं गच्छ नरेश्वर स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम् १४

क्रोधः १२ पश्य मे इति भागार्थं देवानामनागमनेन अप्रसादाद्वे पश्य तपोवीर्येन त्वामभीष्टं स्वर्गं नयामीति भावः १३ स्वशरीरेण
दुष्प्रापं विमानस्य त्वयाः हि यदि मया स्वार्जितं यत्किंचिदपि तपसः फलं सुकृतमस्ति १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदाह हे राजन् त्वं तस्य तेजसा वै भवेन सशरीरो दिवं गच्छ उक्तवाक्ये न कृत्यादिर्न दोषः ॥१५॥ मुनीभिर्नोपपश्यतां मुनिषु पश्यत्सु ॥१६॥ स्व
र्गकृतालयः स्वर्गे निजपुण्यकर्मणा कृत आलयो यस्य तादृशः स्वर्गवासार्हो नासीत्यर्थः ॥१७॥ नक्षत्रहेतुः गुरुशापेत्यादि ॥१८-१९॥ त्राह्या

320

राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज । उक्त्वा वाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः ॥१५॥ दिवं जगा
म काकुत्स्थ मुनीनां पश्यतां तदा । स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥१६॥ सह सर्वैः
सुरगणैरिदं वचनमब्रवीत् । त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ॥१७॥ गुरुशापहतो
मूढ पत भूमिमवाक्शिराः । एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ॥१८॥ विक्रोशमानस्त्रा
हीति विश्वामित्रं तपोधनं । तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ॥१९॥ रोषमाहार
यत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् । ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ॥२०॥ सृजन्दक्षि
णमार्गस्थान्सप्तर्षीनपरान्पुनः । नक्षत्रवंशमपरमसृजत्क्रोधमूर्छितः ॥२१॥

त्यत्त्रकरोत् ॥२०॥ सृजन्निति यथाऽन्यतोऽभवः प्रबलस्तिष्ठति एवं त्रिशङ्कुस्तिष्ठन् तस्योपरि तोयथा सप्तर्षिमण्डलं तथाप्रसा
पि भवतित्याशयः सृजन्निति हेतौ शत्रुप्रत्ययः सृष्टिं कुर्वन् तद्धेतोः दक्षिणमार्गस्थानपरानसृजत् पुनः सप्तविंशतिनक्षत्रमा

ॐ॰
रामा॰
बा॰टी॰
१८१

321

नक्षत्रवंशं नक्षत्रगणं २२ अन्यमिंद्रं स्वसृज्यमानस्वर्गस्येति शेषः अथवा मया सृज्यमानस्वर्गः अनिंद्र एवास्तु त्रिशंकोरेव तत्रैश्व
भवतीत्याशयः एवमिंद्रस्थाने त्रिशंकुं प्रतिष्ठाप्य तस्य परिवारभूतदैवतानि स्रष्टुमुपचक्रमे २३ तत इति देवाः सर्षिसंघाः सुरर्षभाः

दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः सृष्टवान्नक्षत्रवंशं च क्रोधेन कलुषीकृतः २२
अन्यमिंद्रं करिष्यामि लोको वा स्यादनिंद्रकः दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे २३
ततः परमसंभ्रांताः सर्षिसंघाः सुरर्षभाः विश्वामित्रं महात्मानमूचुः सानुनयं वचः २४ अयं
राजा महाभाग गुरुशापपरिक्षतः सशरीरो दिवं यातुं नार्हत्येव तपोधन २५ तेषां तद्वचनं
श्रुत्वा देवानां मुनिपुंगवः अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः २६ सशरीरस्य भ
द्रं वस्त्रिशंकोरस्य भूपतेः आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे २७ स्वर्गोस्तु सशरीर
स्य त्रिशंकोरस्य शाश्वतः नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ २८

पि प्रतिसर्गं कुर्यात् इति हेतोः सुरासुरास्संभ्रांताः पर्याकुलचित्ताः सर्षयः २४ सानुनयप्रकारमाह अयं राजेत्यादि गुरुशापेन
परिक्षतः वंचितः स इति भावः दिवं गंतुं सशरीरस्य स्वर्गं २५ २६ भद्रं वः इत्यनेन सानुनयः २७ स्वर्गोस्त्विति स्वर्गपदवाच्यस्थलविशेषानुभावो

५८
५
१८१

लोकाः भूरादिसंज्ञकाः २९ वैश्वानरपथात् ज्योतिःशास्त्रप्रसिद्धानादि ज्योतिश्चक्रमार्गात् बहिः बहिर्देशे पतितानि तानि नक्षत्राणि तिष्ठं-
तु इति शेषेणान्वयः ३० तेषु नक्षत्रेषु ज्योतिःषु नक्षत्रेषु जाज्वलत् भृशं ज्वलन् ३१ अवाक्शिराः अस्मत्कृतावाक्शिरस्त्वानिवृत्तिं
शङ्कुः देवत्वसाम्यवान् तिष्ठतु एतानि तत्र ज्योतींषि तम् अनुयास्यन्ति च स्वर्गलोकगतं यथा स्वर्गलोकगतमिवेत्यन्वयः एवमन्यत्रापि ३२

यावल्लोका धरिष्यंति तिष्ठंत्वेतानि सर्वशः मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ एवमु
क्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवं २९ एवं भवतु भद्रं ते तिष्ठंत्वेतानि सर्वशः गगने तान्यनेका
नि वैश्वानरपथाद्बहिः ३० नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन् अवाक्शिरास्त्रि
शंकुश्च तिष्ठत्वमरसंनिभः ३१ अनुयास्यंति चैतानि ज्योतींषि नृपसत्तमं कृतार्थं कीर्तिमंतं
च स्वर्गलोकगतं यथा ३२ विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ऋषिमध्ये महातेजा
बाढमित्येव देवताः ३३ ततो देवा महात्मानः ऋषयश्च तपोधनाः जग्मुर्यथागतं सर्वे यज्ञ
स्यांते नरोत्तम ३४ इत्यार्षे रामायणे षष्टितमः ६०

बाढमित्येव प्राहेति शेषः इत्यत्र हस्तान्तर्यदैवतानां शतसंख्या
यदेवताश्च वचनं सम्पूर्णकार ३३ इत्यार्षे रामायणे तिलके बालकाण्डे षष्टितमः सर्गः ६०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वनवासिनः तपोवनवासिनः तास्तान्‌यायज्ञार्थमागतान्‌प्रस्थितान्‌वीक्ष्यसर्वान्‌तानब्रवीदित्यन्वयः वनवासिनइत्यस्यस्थानेविनया
न्वितानितिपाठांतरे १ दक्षिणांदिशमास्थितःसमंताद्व्याप्यास्थितोयंत्रिशंकुरूपोमहाविघ्नोस्माकंतपोनाशकत्वात्प्रवृत्तस्तच्छायाक्रा
न्तत्वाद्वायंदेशोनःपरंतपोःयोग्यइतिभावः २ विशालायांविशालतपोवनवत्यांपश्चिमायांवर्तमानेषुपुष्करेषुतत्तीरतपोवनेप्वि

विश्वामित्रोमहातेजाःप्रस्थितान्वीक्ष्यतानृषीन्‌ अब्रवीन्नरशार्दूलसर्वांस्तान्वनवासिनः १
महान्विघ्नःप्रवृत्तोयंदक्षिणामास्थितोदिशं दिशमन्यांप्रपत्स्यामस्तत्रतप्स्यामहेतपः २ पश्चि
मायांविशालायांपुष्करेषुमहात्मनः सुखंतपश्चरिष्यामःसुखंतद्धितपोवनं ३ एवमुक्त्वा
महातेजाःपुष्करेषुमहामुनिः तपउग्रंदुराधर्षंतेपेमूलफलाशनः ४ एतस्मिन्नेवकालेतु
अयोध्याधिपतिर्महान्‌ अंबरीषइतिख्यातोयष्टुंसमुपचक्रमे ५ तस्यवैयजमानस्यपशुमिं
द्रोजहारह प्रनष्टेतुपशौविप्रोराजानमिदमब्रवीत्‌ ६ पशुरभ्याहृतोराजन्प्रणष्टस्तवदुर्नयात

स्यर्थः महात्मनइतिमहात्मानःसमर्थकऋषिसंबोधनमहीर्घतमार्षं ३ ४ ५ विप्रःपुरोहितः ६ अभ्याहृतइदानीमस्माभि
रानीतःपश्चात्‌दुर्नयाद्दत्तापवशान्नावकरक्षिणोप्रमादाच्चप्रनष्टइत्यन्वयः राजपापमाह अरक्षितारंप्रजाभामितिशेषः ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पततत्पशुनाशरूपं महत्प्रायश्चित्तं महतः प्रायश्चित्तस्य कारणं प्रक्रान्तं कर्म यावत्प्रवर्तते प्रवर्तिष्यते तावत्ततः प्रागेव नष्टपशुमन्वि
ष्यानयतम्प्रति तिथितेन क्रीणतस्त्वा पशुमानेयेत्यर्थः ८ सहस्रशो गोभिर्निष्क्रियभूताभिरित्यर्थः ९ १० सपुत्रेति सहितेत्यका

324

प्रायश्चित्तं महद्ध्येतन्नरं वा पुरुषर्षभ आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते ८ उपाध्यायव
चः श्रुत्वा स राजा पुरुषर्षभ अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ९ देशान्जनपदां
स्तांस्तान्नगराणि वनानि च आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः १० सपुत्रसहितं
तात सभार्यं रघुनंदन भृगुतुंगे समासीनमृचीकं संददर्श ह ॥ तमुवाच महातेजाः प्रणम्या
भिप्रसाद्य च ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः १२ पृष्ट्वा सर्वत्र कुशलमृचीकं तमिदं वचः
गवां शतसहस्रेण विक्रीणीषे सुतं यदि १३ पशोरर्थे महाभाग कृतकृत्योऽस्मि भार्गव स
र्वे परिगता देशा याज्ञियं न लभे पशुं १४ दातुमर्हसि मूल्येन सुतमेकमितो मम एवमुक्तो महा

देशो वरीषः भृगुतुंगं पर्वतशृंगविशेषः ॥ तं प्रसिद्धतपसमृचीकं इदं वक्ष्यमाणं वचोऽब्रवीदिति शेषः यदि विक्रीणीषे त
दा कृतकृत्योऽस्मि भवेयं यतो याज्ञियं यज्ञे सर्वपरिकल्पितपशुं क्वापि न लभे १३ १४ इतः पञ्चसार्वविभक्तिकस्तसिः १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ०
रामा०
बाल०
१९२

325

कथंचनवहुनापिमूल्येन अनेनेतयोरनुमतिःसूचिता: अप्रतिषिद्धमनुमतमितिन्यायात् १८ अनक्रतिकनिष्टपुत्रनाम १९
पितृणांपितॄणांवल्लिभामीत्यर्थस्तेरत्नादि: १९ रामेतिसंबुद्धिः २० मध्यमस्तु मध्यमपुत्रं विक्रेयंमातापित्रोरविक्रयेनतरमतंमन्ये:

नाहंज्येष्ठंनरश्रेष्ठविक्रीणीयांकथंचन ऋचीकस्यवचःश्रुत्वातेषांमातामहात्मनां १८
उवाचनरशार्दूलमंवरीषमिदंवचः अविक्रेयंसुतंज्येष्ठंभगवानाहभार्गवः मसापिद
यितंविद्धिकनिष्ठंशुनकंप्रभो तस्मात्कनीयसंपुत्रंनदास्येतवपार्थिव प्रायेणहिनरश्रेष्ठ
ज्येष्ठाःपितृषुवल्लभाः मातृणांचकनीयांसस्तस्माद्रक्षेकनीयसं १९ उक्तवाक्येतुमुनौ
तस्मिन्मुनिपत्न्यांतथैवच शुनःशेपःस्वयंरामसध्यमोवाक्यमब्रवीत् २० पिताज्येष्ठमविक्रे
यंमाताचाहकनीयसं विक्रेयंमध्यमंमन्येराजपुत्रनयस्वमां २१ अथराजामहावाहो
वाक्यान्तेब्रह्मवादिनः हिरण्यस्यसुवर्णस्यकोटिभीरत्नराशिभिः २२ गवांशतसहस्रेण
शुनःशेपंनरेश्वरः गृहीत्वापरमप्रीतोजगामरघुनन्दनः २३

ष्ठादितिशेषः २१ ब्रह्मवादिनःमध्यमपुत्रस्य २२ गृहीत्वाक्रीत्वा यद्यप्यमनुस्मृदानक्रयौशास्त्रनिषिद्धौ तथापिअनेनकु
लहारायमार्थ्यमपत्यदानमिवयज्ञापत्यविक्रयोनविरोधइतिसूचितं पुत्रस्यचैवंपित्रधीनतोतिचवोधितम् २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शुनःशेपं स्वमारोप्य मन्वयः २४ इतिएकषष्टितमःसर्गः ८१ व्यश्रमत्व्यश्राम्यदितिपाठांतरे १ विश्रममाणस्येति विश्रामत
इत्यर्थः प्राप्ते १ तस्य यापिपासयाजिजीविषयाव श्रमेणचेति विषसवदनत्वेपपरमातुरत्वेचहेतुः १ अंकेउत्संगेमातलना

326

श्रेवतीक्षत्रराजर्षी स्वर्गमारोप्य मन्वदः शुनःशेपं महातेजा जगाम स्वमहायशाः २४ इत्यार्षे रा
मायणे एकषष्टितमः ८१ शुनःशेपं तरक्षुष्यन्दीनानं महायशाः व्यश्रमत्पुष्करे राजास
ध्याह्ने रशुनेदन १ तस्य विश्रममाणस्य शुनःशेपो महायशाः पुष्करज्येष्ठ मातामपवि
श्वामित्रं ददर्शन २ तपस्यषिभिः सार्धं मातले परमातुरः विषसवदनो दीनस्तृस्यया च
श्रमेण च ३ पपाताङ्के मुनेरामवाक्यं वेदमुवाचह नमेऽस्ति माता न पिता ज्ञातयो बांधवाः
कुतः ४ त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुंगव त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ५
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमम ८

तत्रपातः बांधवाः कुतोह्वादेवसर्वथानसंतेवेत्यर्थः ४ धर्मेणस्वार्जितेन सर्वेषांशरणागतानांभावनः सर्वेष्टसाधनतंपको
हित्यर्थः ५ यथावद्राजाकृतकार्यःस्यात अहंचप्रवयोयर्मलोपाभाववानदीर्घायुस्तपस्तस्वर्गंप्राप्नुयात यथाकुर्विति

५
रू॰

किंस्विघातज्जीवविषयिनिग्रुणात् भवेनशमनेनतत्रंज्येष्ठ॰ यत्कृतेयत्प्रयोजनाय तदेवप्रयोजनमाह परलोकहितार्थायपरा
लोकहितरूपप्रयोजनाय तत्सप्रयोजनस्य ४ परलोकहितंप्रयोजनमाह अयमिति शरणंरक्षणंजीवितप्रदानमात्रेण
प्रियमिमसमममवसंजीवनोवाक्यकरणादितिस्थितेः अनेनकवरपरलोकसाधनंतेनप्रियमित्यर्थः १॰ तत्रप्रहूत्यर्थेस्लो

समेनाथोस्तनाथस्यमवभयेनवेतसा पितेवपुत्रंधर्मात्मंस्नातुमर्हसिकिल्बिषात्॰ तस्य
तद्वचनंश्रुत्वाविश्वामित्रोमहातपाः सांत्वयित्वाबहुविधंपुत्रानिदमुवाच ८ यत्कृतेपि
तरःपुत्रानजनयंतिशुभार्थिनः परलोकहितार्थायतस्यकालोयमागतः ९ अयंमुनि
सुतोबालोमत्तःशरणमिच्छति अस्यजीवितमात्रेणप्रियंकुरुतपुत्रकाः १॰ सर्वेसु
कृतकर्माणःसर्वेधर्मपरायणाः पशुभूतानरेंद्रस्यतृप्तिमग्नेःप्रयच्छथ ११ नाथवांश्च
शुनःशेपोयज्ञश्चाविघ्नतोभवेत् देवतास्तर्पिताश्चस्युर्ममवापिकृतंवचः १२

ति सर्वेइतियपशुभूताः स्वमममन्नायमसुतेनग्रहणादेतत्सतिविधितेनपशुभूतानरेंद्रस्ययज्ञेः प्रेतस्तदमिंयच्छथेत्यर्थः ११ ना
थवान् मयारक्षकवानममपुत्रस्यापिस्युःजीवितोवाक्यकारणात्तद्वचःकृतंभवति १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

328

साभिमानं साहंकारं सलीलं सपरिहासं १२ लोकत्रःपातत्स्मान्विज्ञान्शास्तेहत्स्यात्तःस्वमांसमिवेति १४ १५ साधुसंभवं पितृ
व्यस्तमीतिरहित जीवतो वाक्यकारणात् यस्मादपि विगर्हितं श्रेष्ठं एवं महावाक्यमपिक्रम्य ते दारुणं पक्ष्ये मांसमहर्षिणां
रोमांचरूपविकारजनकमन्तं तस्मादिति शेषः १९ जातिश्वमुष्टिकजातिश्व ९ निरामयोऽसर्वेऽः एवनाशिकोऽदंतोऽकृ

मुनेस्तद्वचनं श्रुत्वा मधुच्छंदादयः सुताः साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् क
थं मात्मसुतान्हित्वा त्रायसे म्लेच्छतं विभो शुनकादीनिव पापानामः स्वमांसमिव भोजने १४
तेषां तद्वचनं श्रुत्वा ज्ञाणां मुनिपुंगवः क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे १५ निः
साध्वसमिदं यो मे यस्मादपि विगर्हितं अतिक्रम्य तु महाक्यं दारुणं रोमहर्षणं १६ श्वमांस
भोजिनः सर्वे वामिष्टा इव जातिषु पौर्णावर्षसहस्त्रं तु पृथिव्यामनुवत्स्यथ १७ कृत्वा पाप
समाप्त्यायुत्कान्पुत्रान्मुनिवरस्तदा शुनःशेपमुवाचार्ते कृत्वा रक्षां निरामयां पवित्रपा॰

तामुनःशेपमपावसं १८ वाक्यमाह पवित्रेति शोभावद्धारक्तमाल्यानुलेपनः वैसवैश्यपमासा
पवित्रपाशाः दमेरमनाः वैसर्वेविश्वदेवतं वैसवोवैदेवतया यूपः श्रतिष्ठतेः वाग्भिराग्नेयमंत्रेरग्निमुदाहरस्वहि १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ
रामा
वारी
१९५

329

इमेमस्योपदिश्यमाने इंद्रो पेन्द्रे पेन्द्रदेवस्मे सिद्धजीवितमिहिं २० गच्छावहेऽस्माद्यस्त इ निर्वर्तयस्वयज्ञमितिपोवः समुपाहरकुरु
एवं ऐंद्रैर्मंत्रभिः कृतपशुत्वज्ञापनं पशुं कृत्वा यज्ञपशुत्वेन संपाद्य श्रेवंचयगत राज्यो तिपोष। २४ इंद्रात्तु जो विसृष्टिर्पदेशः॥ अ

इंद्राद्विसृष्टः शुनःशेपोतोहितं नृपतिं पुंगव इमे वर्गाथे हेदिव्ये गायेथा नृपतिपुत्रक अंब
रीषस्य यज्ञे स्मिंस्ततः सिद्धिमवाप्स्यसि २० शुनःशेपोऽथ हीनादे हे गाथे समहात्मितः अं
बरीषराज्ञा सिद्धं तं म बरीषमुवाचह २१ राजसिंह महाबुद्धे शीघ्रं गच्छावहेवयं निर्वर्तय
स्वराजेंद्र दीक्षां च समुपाहर २२ तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः जगाम नृ
पतिः शीघ्रं यज्ञवाटमतंद्रितः २३ सदस्यानुमते राजा पवित्रकृतलक्षणं पशुं रक्तां
बरं कृत्वा यूपे तं समबंधयत् २४ स बद्धो वाग्भिरग्र्याभिरभितुष्टाव वै सुरौ इंद्रमिंद्रानु
जं चैव यथावन्मुनिपुत्रकः २५ ततः प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः दीर्घमायुस्त

जस्सर्वं मन्त्रिणस्तत्रातत्पतौ उपदेशकालेन यथोक्तत्वात् २५ सहस्राक्षः दाभादात् शुनःशेपाय वासवः २६
तस्य लक्षणं विस्मापि रहस्यस्तुतिर्विश्वामित्रोपदिष्टा २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समाप्तवान्फलं सम्प्रगाप्तवानित्यर्थः यद्यपि वहुवचनात्गणेह विश्रुतो ह्येवं पेत्वाको राजेत्यादिना हरिश्चंद्र यत्तेशुनःशेफस्या
जीवर्तिस्तनस्यपशुत्वं तेन ज्ञापयत्यादित्युत्या च मोदः सूयते तथापि शुर्वंवरीषविषयमप्येन तत्पतन्मा मान्योततस्कलम् निश्चान्वये
तिवहवः केचित्तु हरिश्चंद्रपदं सानुदेवरीषपवमुक्तं प्राजीगर्तिपदं च ऋचीके प्रयुक्तं कृत्वा वस्मादेवोपदेष्टहणादित्याहुः २७

स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् फलं बहुगुणं राम सहस्राक्षप्रसादजं विश्वामित्रो
पि धर्मात्मा भूयस्तेपे महातपाः पुष्करेषु नरश्रेष्ठ दश वर्षशतानि च २८ इत्यार्षे रामायणे
द्विषष्टितमः ६२ पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिं अभ्यगच्छन्सुराः सर्वे तपःफलचि
कीर्षवः १ अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः २
तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्ययात् विश्वामित्रो महातेजा भूयस्तेपे महत्तपः ३ ततः का
लेन महता मेनका परमाप्सराः पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ४

अयः पर्वतपसः पुरेषु क्रोधेन नाशनात् शापं न करिष्यामीति संकल्प्य पुनस्तपो करोत् २८ इत्यार्षे सर्गः ६२ व्रतस्नातं समाप्तव्र
तं तपःफलचिकीर्षवः तपःफलं दातुकामाः १ ऋषिस्त्वमसि ब्रह्मराजशाहान्नुपादानेन तत्रजातिविशेषः सूचितः २ परमाप्

ॐ
रामा- 331
वाटी
१९९

तत्रमहाभ्रिजलदेविद्युतमिव ५ कंदर्पहतोदर्पोयस्यसः ६ अनुगृह्णीष्वभोगदानेनेतिशेषः वरारोहाश्रेष्ठजघना ७ पंचपं
चदशवर्षाणि ८ ९ सामर्षादेवेषुविघ्नस्यतत्कृतत्वज्ञानात् १० अहोरात्रमिति अहोरात्रापदेशेनप्रकाशेनाचेतनसतया ॥

तांदृष्ट्वासहसातेजामेनकांकुशिकात्मजः रूपेणाप्रतिमांतत्रविद्युतंजलदेयथा ५
कंदर्पदर्पवशगोमुनिस्तामिदमब्रवीत् अप्सरःस्वागतंतेस्तुवसचेहममाश्रमे ६ अनुगृ
ह्णीष्वभद्रंतेमदनेनविमोहितं इत्युक्तासावरारोहातत्रावासमथाकरोत् ७ तपसोहिम
हाविघ्नोविश्वामित्रमुपागमत् तस्यांवसंत्यांवर्षाणिपंचपंचचराघव ८ विश्वामित्रा
श्रमेसौम्यसुखेनव्यतिचक्रमुः अथकालेगतेतस्मिन्विश्वामित्रोमहामुनिः ९ सव्रीड
इवसंवृत्तश्चिंताशोकपरायणः बुद्धिर्मुनेःसमुत्पन्नासामर्षारघुनंदनः १० सर्वंसुराणां
कर्मैतत्तपोपहरणंमहत् अहोरात्रापदेशेनगताःसंवत्सरादश ॥ काममोहाभिभूतस्य
विघ्नोयंप्रत्युपस्थितः सनिःश्वसन्मुनिवरःपश्चात्तापेनदुःखितः १२ भीतामप्सरसंदृष्ट्वा

वेपंतींवेपमानांमधुरैःमधुरार्थनयास्थितानासीमिति तत्रनकस्यनदोषःस्यादिवाकैः क्रोधस्यसंकल्पश्चैवमत्त नादत्तशापादानेनेतास १९९

ततस्तच्चक्रुर्विघ्नदर्शनादुत्तरगमनं नैष्ठिकीं कामस्याप्यकारणं संकल्पं प्रमुक्त्वा ब्रह्मचर्यविषयिं बुद्धिं दृढनिश्चयं जेतुकामः का
ममितिशेषः १४ कौशिकी विश्वामित्रभगिनी नदी १५ उत्तरे पर्वते इत्येतत्सर्वान्वयि समागम्य ब्रह्माणमितिशेषः १६ लभतां भगव
न्नितिशेषः १७ देवप्रार्थनया महर्षिशब्देनैव संबोधयति महर्षेइति १८ महत्वमविकारं ऋषिमुख्यत्वमिति १९ प्रत्युवाचेति पिताम

332 उत्तरे पर्वते राम विश्वामित्रो जगाम ह सकृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः १४ कौशि-
कीतीरमासाद्य तपस्तेपे दुरासदं तस्य वर्षसहस्राणि घोरं तप उपासतः १५ उत्तरे पर्वते राम दे-
वतानामभूद्भयं अमंत्रयन्समागम्य सर्वे सर्षिगणाः सुराः १६ महर्षिशब्दं लभतां साध्वयं कु-
शिकात्मजः देवतानां वचः श्रुत्वा सर्वलोकपितामहः १७ अब्रवीन्मधुरं वाक्यं विश्वामित्रं
तपोधनं महर्षे स्वागतं वत्स तपसोग्रेण तोषितः १८ महत्वमृषिमुख्यत्वं ददामि तव कौशि-
क ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः १९ प्रांजलिः प्रणतो भूत्वा प्रत्युवाच पितामहं

हमितिशेषः अतुलं सर्वोत्तमं ब्रह्मर्षिशब्दं महर्षीष्टं स्वार्जितैः ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः २०
कर्मभिः प्राप्यं यदि यतो भवता गहनवनहिततो ममसः हे विजितेंद्रियः अत्रकाकुः न विजितेंद्रिय इत्यर्थः नतावदेति विकार
हेतुसन्निधाने विकाराभावो हि तत्वमिति भावः नतावदितिलोकोक्तो २०

ॐ· 333
रावा·
वाटी·
९०

२१ २२ घर्मे ग्रीष्मे ग्रीष्माकाशं निरावरणदेशः २३ २५ प्राप्तमहितं आत्माहितं २८ इति त्रिषष्टितमः सर्गः ६१ लोभनं प्रतारणं कामस्य मोहेन काम

यदि मे भगवानाह ततो हं विजितेंद्रियः न मब्रवीत्ततो ब्रह्मा न तावत्त्वं जितेंद्रियः २१ यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः २२ ऊर्ध्वबाहुर्निरालंबो वायुभक्षस्तपश्चरन् घर्मे पंचतपा भूत्वा वर्षास्वाकाशसंश्रयः २३ शिशिरे सलिलेशायी रात्र्यहानि तपोधनः एवं वर्षसहस्रं हि तपो घोरमुपागमत् तस्मिन्संतप्यमाने तु विश्वामित्रे महामुनौ संतापः सुमहानासीत्सुराणां वासवस्य च २५ रंभामप्सरसं शक्रः सह सर्वैर्मरुद्गणैः उवाचात्महितं वाक्यमहितं कौशिकस्य च २९ इत्यार्षे त्रिषष्टितमः सर्गः ६१

सुरकार्यमिदं रंभे कर्तव्यं सुमहत्त्वया लोभनं कौशिकस्येह काममोहसमन्वितं १ तथोक्ता साप्सरा राम सहस्राक्षेण धीमता व्रीडिता प्रांजलिर्वाक्यमुवाच सुरसत्तमं २ अयं सुरपते घोरो

ज्वलितं वेव रूपेण सम्मन्वितं स्यलं १ व्रीडिता ग्रसामर्थ्य वचनं निमित्ता व्रीडा २ अत्र ज्यतेरति पादे पितत्वद्वात इत्येवार्थः ३ ९०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह्रियतेऽतः प्रसादं एवं नियोगभावरूपं ४५ माधवे वसंते कोकिलो भूत्वाहमित्यन्वयः ९ बहुगुणां ह्याव भावादिगुणोपेतं रूपं
रूपपरिष्कारं भेदय स्वकामात्मारनेत्र पस्यात्तेय ७ ललिताललिताख्यभावयुक्ताः ८ वल्लभमनोहरं कमनीयविषयला

334 ततो हि मे भयं देवप्रसादं कर्तुमर्हसि एवमुक्तस्तया रामस्सभयं भीत्यया जदा ४ तामुवा
च सहस्ता ह्यावेष्टुमानां ह्युक्तो जगले मा भैषीर्मे वेदते कश्चिद्ममशासने ५ कोकिलो
ह्यद्य या ग्राहे माधवे कश्चिद्भुमे अहं केरूपसहितः स्थास्यामि तवपार्श्वतः ६ बहिरूपं बहु
गुणं कृत्वा परमभास्वरं तमृषिं कौशिकं भद्रे भेदयस्व तपस्विनं ७ साक्षाद्वाववचनं तस्य
कृत्वा रूपमनुत्तमं लोभयामास ललिता विश्वामित्रं सुविस्मिता ८ कोकिलस्य तु श्रु
त्वा च वल्गु व्याहृतं स्वनं संप्रहृष्टेन मनसा सर्वे नामन्ववेदत ९ अथ तस्य च गीतेन
गीतेनाप्रतिमेन च दर्शनेन च रंभाया मुनिः संदेहमागतः १० सहसा तस्य तत्सर्वं वि
ज्ञाय मुनिपुंगवः रंभां क्रोधसमाविष्टः शशाप कुशिकात्मजः ११ भाव्यं तस्योहरूपः तस्य कोकिलस्य
भागीतेन रंभाया इति शेषः संदेहः स्वतपोनाशाय इदं कस्याश्चागमनं स्तनेदृशेऽस्मिन्काले यामम तपो भंगार्थमिति एवं रूपं १० तत्सर्वं रं
भागमनं तत्कृतं प्रलोभनं च सहसा तत्क्षणमेव मूलमिति ज्ञात्वा ध्यानेन च विज्ञाय निश्चित्य रंभां शशापेत्यन्वयः ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ·
गवा·
वाटी· 335
१९८

शैलीशिलाप्रतिमा भूया ॥१२ यद्यपि स्वामिनियोगतः प्रवृत्तायारंभायाः शापदानमनुचितं इंद्रे एव तद्दानमुचितं तथापि क्रो
धावेशेन तत्कालोत्पन्नविवेकाभावः अत एव पश्चाद्विवेकलब्धा तामनुगृह्णाति ब्राह्मण इति वा सष्टस्त्वर्थं इन्त्यिकतकः एतेन
कामादपि क्रोधो दुर्जेय इति सूचितं ॥१३ आत्मनः कोपं धारयितुं अशक्नुवन् अतो शम्वा तपोव्ययजमदुःखेन संतापं पश्चात्तापम्

यस्माल्लोभयसे रंभे कामक्रोधजयैषिणं दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥१२
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः उद्धरिष्यति रंभे त्वां मत्कोपकलुषीकृतां ॥१३
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः अशक्नुवन्धारयितुं कोपं संतापमात्मनः ॥१४
तस्य शापेन महता रंभा शैली तदाभवत् वचः श्रुत्वा च कंदर्पो महर्षेः स च निर्गतः ॥१५
कोपेन च महातेजास्तपोपहरणे कृते इंद्रियैरजितै राम न लेभे शांतिमात्मनः ॥१६ ब
भूवास्य मनश्चिंता तपोपहरणे कृते नैव क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ॥१७

पापात इति शेषः ॥१४ महर्षेर्वचः श्रुत्वा कंदर्पः स्वर्गं इन्द्रसमीपं निर्गत इत्यन्वयः ॥१५ कोपेन चात्कामेन च तपोपहरणे कृते सति
कामक्रोधरूपत्वादेवाजितैरिंद्रियैरित्यन्वयः आयाततोऽस्माद्दर्शनप्रवृत्त्या कामेनापि तपः हृतं तस्मात् आत्मनो मनसः शां
तिं दुःखोपशमं ॥१६ न च वक्ष्ये शापादिवचनमिति शेषः ॥१७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मानंशरीरं १८ यावत्यावताकालेनब्राह्मण्यंप्राप्तंभवेत्तावत्शाश्वतीःसमाःबहून्वत्सरान् १९ मूर्तयःशरीरावयवाःतु
पोर्जितात्तदुच्छ्वासाभोजनयोःतद्बलेनक्षयंसंभवेतिभावः दीक्षांअनुच्छ्वासाभोजनेउद्दिश्यअप्रतिमांअप्रतिमांप्रतिज्ञांसर्वेषां
वंकरिष्यामीत्यध्यवसायं २० इतिरामायणेबालकांडेचतुःषष्टितमःसर्गः ६४ अथपश्चिमात्तोत्तरं हैमवतीउत्तरां १ मौनंरूपंव्रतंवर्षसहस्रसं

अथवानोच्छ्वसिष्यामिसंवत्सरशतान्यपि अहंहिशोषयिष्यामिआत्मानंविजितेंद्रियः १
तावद्यावद्धिमेप्राप्तंब्राह्मण्यंतपसार्जितं अनुच्छ्वसन्नभुंजानस्तिष्ठेयंशाश्वतीःसमाः
नहिमेतप्यमानस्यक्षयंयास्यंतिमूर्तयः एवंवर्षसहस्रस्यदीक्षांसमुनिपुंगवः चकारा
प्रतिमांलोकेप्रतिज्ञांरघुनंदन २० इत्यार्षेबालकांडेचतुःषष्टितमःसर्गः ६४ अथहैमव
तीरामदिशंत्यक्त्वामहामुनिः पूर्वांदिशमनुप्राप्यतपस्तेपेसुदारुणं १ मौनंवर्षसह
स्रस्यकृत्वाव्रतमनुत्तमं चकाराप्रतिमंरामतपःपरमदुष्करं २ पूर्णेवर्षसहस्रेतुकाष्ठ
भूतंमहामुनिं विघ्नैर्बहुभिराधूतंक्रोधोनांतरमाविशत् ३ सकृत्वानिश्चयंरामतपआतिष्ठ

बंधिमौनंव्रतकाष्ठमौनं २ आधूतमाकुलीकृतमपि अंतरमंतःकरणं ३ निश्चयंक्रोधाकारणविषयकंवर्षसहस्रसंबंधिनि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

337

ॐ. म.वा. वा.टी. १९५

तस्मिन्कालेव्रतपारणकाले ५ सिद्धं यदन्नं निःशेषिते निःशेषे भक्षिते सति भक्षित्वैव पुनः पाकाकरणाद्भक्षित्वैव ८ मौनं कृत्वा आसीदित्यन्वयः नोच्छ्वसन्श्वासोच्छ्वाससहितः धूमकेतुरित्यर्थः अग्निरिति यावत् अतएवाग्न्यातापितमिदं तिवस्थिति अ यं श्रुतस्तत्त्वगुणाश्रमवाग्निरेषां रजस्तमः प्रधानानां तत्स्मिन्सत्त्वप्रधानानां देवादीनां तापजनकत्वेतिवो ८ येन वह्निना

भोक्तुमारब्धमानं तस्मिन्कालेऽन्नम इंद्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ५ तस्मै दत्वा तदा सिद्धं सर्वं विशायतिश्चितः निःशेषिते भगवानभुक्त्वैव महातपाः ८ न किंचिद् व्याहरन्मौनव्रतमुपास्थितः तथैवासीत्स्थानमौनं मनुच्छ्वासं चकार ह ७ अथ वर्षसहस्रे चैनाच्छ्वसतो निर्गतः तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ८ त्रैलोक्यं येन संभ्रान्तमातापितमिवाभवत् ततो देवर्षिगंधर्वाः पन्नगोरगराक्षसाः ९ मोहितास्तपसा तस्य तेजसा मंदरश्मयः कश्मलोपहताः सर्वे पितामहमथाब्रुवन् १० बहुभिः कारणैर्दे

यथा तापितः पुमान् संभ्रान्तो व्याकुलो भवति तद्वत्त्रैलोक्यं संभ्रान्तमभूदित्यर्थः ९ तपसा तेजसा तपोरूपेण तेजसा मोहिताः विषया ग्रद्दिपिताः कृतामंदरश्मयः क्षीणतेजसः कश्मलं...: एव १० तत्र द्विषये लोभितः क्रोधितोपि निर्विघ्नमेव तपस्तपसा अभिवर्ध

१९५

स्वल्पमपि हृष्टजितं स्वल्पमपि कामक्रोधरूपं यदभीप्सितं त्वल्पर्षितं १२ अन्यथा लोकनाशः स्यादित्याह विनाशयतीति त्रैलोक्यं तप
सा ... व्याकुला इति १३।१४ प्रतिजानीम प्रतिज्ञायां न जानीम इत्यर्थः नास्ति को जायते जग
त स्तोमवशात्मास्तिकरवकमानुष्टानम्भूत्यरित्यर्थः तदाह संमूढमिवेति संभ्रान्तमिव मानसं व्याकुलचित्तं नाशं जगतो

338

न स्वल्पं त्वर्जितं किंचिद्विहृतं ते स्वल्पमप्युत न दीयते यदि तस्मै मनसा यद्यभीप्सितं १२ विनाश
यति त्रैलोक्यं तपसा सचराचरं व्याकुलाश्च दिशः सर्वा न चार्कि विराजते १३ सागराः क्षु
भिताः सर्वे विशीर्यंते च पर्वताः प्रकंपते च पृथिवी वायुर्वाति हि संकुलः १४ न जानीमः प्रति
जानीमो नास्ति को जायते जनः संमूढमिव त्रैलोक्यं संभ्रान्तमिव मानसं १५ भास्करो
निष्प्रभश्चैव महर्षेस्तस्य तेजसा बुद्धिर्न कुरुते यावन्नाशं देव महामतिः १६ तावत्प्र
साद्यो भगवन्सोग्ररूपो महात्मनः कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यते खिलं १७ देव
राज्यं चिकीर्षेत दीयतामस्य यन्मनः ततः

पूर्वं युगान्तकाले १७ यद्यसौ देवराज्यमपि चिकीर्षेत तदा तदप्यस्य
दीयतामित्यर्थः इति केचित् यद्यस्य अभीष्टं न दीयते तदासौ देवराज्यं चिकीर्षेत तेनास्य यन्मन स्तत्सर्वं त्वल्पं स्वल्पर्षितं न दीयता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ॰ रावा॰ वाटी॰ १७॰ 339

स्वागतं भद्रं तेस्त्विति विसर्गलोपश्चार्षः १९ दीर्घायुर्दानं स्वदर्शनफलं २० स्वस्ति स्वस्त्येवं यथासुखं तपस उपेतेऽस्त्विति शेषः २१ यदि इत्यसंधिरार्षः यस्त्वं दिग्यवदनेन वेदाः प्रमाणं वेदितिवत् २२ ओमिति ब्रह्मज्ञानसाधनेषु षडितिय ज्ञसाधनवेदाश्च तद्वेदितो गोपांगादिप्रतिपादकाः वषट्कारः यथा वसिष्ठादीन सहजब्राह्मणान्वरयन्ति तथा वरणाव धायन याजनयोरङ्गमतिः ब्रह्मा

विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ब्रह्मर्षे स्वागतं तेस्तु तपसा स्म सुतोषिताः १९
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक दीर्घमायुश्च ते ब्रह्मन् ददामि समरुद्गणाः २०
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखं पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसां २१
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च २२
ओंकारोऽथ वषट्कारो वेदाश्च वरयन्तु मां तत्र वेदविदां श्रेष्ठो ब्रह्मवेदविदामपि २३

यन्नगृहेपि जातिब्राह्मण्याभावात् वसिष्ठेनानंगीकारे स्वार्थमेव सर्वमत आह तत्रेत्यादि सूर्यवंशानादिपुरोहितत्वात् दध्यायकत्वाच्च तेषां पुत्रजयादिप्रयोजनसंपत्तये तत्र वेदविदां उक्तप्रयोजनयत्र वेदविदां श्रेष्ठः ब्रह्मवेदा वेदचतुष्टयी ब्रह्मप्रतिपादकोपनिषद्भागवतात् २३

१७॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रह्मदपि श्रैष्ठ्यबीजं ब्रह्मपुत्रं इति . एवं ब्रह्मर्षेः इति एवं वसिष्ठस्य वचनेन ब्रह्मर्षित्ववादे दृष्टे मम परतः कामो मनोरथो यदि कृतस्त
दा महिषये कृतं कृत्याः सुरर्षभाः यातु नाम यथेति भावः अन्यथा तु नस्तपश्चरिष्यामीति तात्पर्यं २४ ततो विश्वामित्रोक्त्यनंतरं
प्रसादितो विश्वामित्रस्य ब्रह्मर्षितानुमत्यै एवं ब्रह्मर्षित्वे सख्यं विश्वामित्रेण २५ सर्वं ब्राह्मण्यप्रयोजनं ब्राह्मण्यजन्य
तत्संस्कारादि संपद्यते संपन्नं अनेन निश्चयः वेत्ति विश्वामित्रस्य ब्राह्मणलाभः स्फुटितः एतच्च व्याख्यानं तपः इति सूत्रे महाभा

340

ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः यद्येवं परमः कामः कृतो यांतु सुरर्षभाः २४ ततः प्र
सादितो देवैर्वसिष्ठो जपतां वरः सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् २५ ब्रह्मर्षित्वं
न संदेहः सर्वं संपद्यते तव इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतं २६ विश्वामित्रोऽपि ध
र्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं पूजयामास ब्रह्मर्षिं वसिष्ठं जपतां वरं २७ कृतकामो महीं स
र्वां चचार तपसि स्थितः एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना २८

ष्ये स्पष्टं इति वसिष्ठोक्ते देवता अप्रकृष्ट्वा न जग्मुरित्यन्वयः २६ पूजयामास सपरिवारस्य मम सत्कारकरणेन ब्रह्मर्षिता प्राप्य सख्यं तो
क्षात्त्वं संपादनेन कृतार्थीकृतोऽस्मि भगवत इति पूजयामासेत्यर्थः २७ चचारेति विश्वामित्र इति शेषः अथ प्रकृते शतानंद वचन
मेवं विस्तारादि २८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ रा॰बा॰ बाटी॰ १७१ 341

नित्यमिदानीमपि वीर्यस्यतपोवीर्यस्य २९ ३१ पावितःपवित्रःकृतः ३२ गुणाःकर्मश्रेष्ठत्वाज्ञातिश्रेष्ठत्वलक्षणाः ३३ महातेजाइति
संबुद्धिःमयाजनकेनरामेणचसदःप्राप्यस्थितैःसदस्यैस्तेगुणाःश्रुताः ३४ तृप्यामितितवेत्यर्थे अप्रमेयंत्वयनानानाविषयं ३ ५

एषाम्मम्मदिश्रेष्ठ एषविग्रहवांस्तपः। एषधर्मपरोनित्यंवीर्यस्यैषपरायणं २९ एवमुक्त्वा
महातेजाविरराममहिजोत्तमः शतानंदवचःश्रुत्वारामलक्ष्मणसन्निधौ ३० जनकःप्रांज
लिर्वाक्यमुवाचकुशिकात्मजं धन्योस्म्यनुगृहीतोस्मियस्यमेमुनिपुंगवः ३१ यज्ञंकाकु
त्स्थसहितःप्राप्तवानसिकोशिक पावितोहंतथाब्रह्मन्दर्शनेनमहामुने ३२ गुणाबहुवि
धाःप्राप्तास्तवसंदर्शनान्मया विस्तरेणचवैब्रह्मन्कीर्त्यमानंमहत्तपः श्रुतंमयातेजोरा
मेणचमहात्मना सदस्यैःप्राप्यचसदःश्रुतास्तेबहवोगुणाः ३४ अप्रमेयंतपस्तुभ्यम
प्रमेयंचतेबलं अप्रमेयागुणाश्चैवनित्यंतेकुशिकात्मज ३५ तृप्तिराश्चर्यभूतानांकथा
नानास्तिमेविभो कर्मकालोमुनिश्रेष्ठलंबतेरविमंडलं ३६ःप्रभातेमहातेजाद्रष्टुमर्हसि
मांपुनः स्वागतंजपतांश्रेष्ठमामनुज्ञातुमर्हसि ३८ एवमुक्तोमुनिवरःप्रशस्यपुरुषर्षभं
कथानामितितृप्तावितिशेषः कर्मकालइतिश्रुतिवर्तनइतिशेषः जदेवाह ३९ स्वागतंभद्रमनुज्ञातमकर्मणेरितिशेषः ४० ४०

१७१

स्ववासस्सन्निवेशं स्ववाटमितिपाठेप्ययमेवार्थः ४ इत्यार्षेरामायणेपंचषष्टितमः ६५ कृतकर्माकृतनित्यक्रियः १ कर्मणा
प्रवर्ग्यादिलक्षणेन राघवौवसपूज्यवाक्यमुवाचविश्वामित्रंप्रतीतिशेषः २ आज्ञाप्यः आज्ञापयितुंयोग्यः भवतेति

342

एवमुक्त्वामुनिश्रेष्ठंवैदेहोमिथिलाधिपः पुरस्कृत्यतदाराजाशतानंदमकल्मषम् १३
पुरोहितंचकारात्सोपाध्यायःसबांधवः १४
विश्वामित्रोपिधर्मात्मासहरामःसलक्ष्मणः स्ववासमभिचक्रामपूज्यमानोमहात्मभिः
इत्यार्षेरामायणेवालकांडेपंचषष्टितमः ६५ ततःप्रभातेविमलेकृतकर्मानराधिपः
विश्वामित्रंमहात्मानमाजुहावसराघवं १ तमर्चयित्वाधर्मात्माशास्त्रदृष्टेनकर्मणा
राघवौचमहात्मानौतदावाक्यमुवाचह २ भगवन्स्वागतंतेस्तुकिंकरोमितवानघ भ
वानाज्ञापयतुमामाज्ञाप्योभवतास्म्यहं ३ एवमुक्तःसधर्मात्माजनकेनमहात्मना प्र
त्युवाचमुनिश्रेष्ठोवाक्यंवाक्यविशारदः ४ पुत्रौदशरथस्येमौक्षत्रियौलोकविश्रुतौ
द्रष्टुकामौधनुःश्रेष्ठंयदेतत्त्वयितिष्ठति ५ एतद्दर्शयभद्रंतेकृतकामौनृपात्मजौ दर्श

कृत्यानंतरकर्तव्यविषयीविकल्पात्तृतीया आगमनप्रयोजनंबोधनीयमितितात्पर्यः १४ द्रष्टुकामौआगमनाविशिषेशः ५ कृत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

343

ऊँ- रा- बा- टी- १२२

ततोधनुर्दर्शितांतमाह जनकः एवमिति अस्यादिदेशितस्यधनुषः श्रूयतामागमनादिहेतोनरइतिशेषः यदर्थं यन्मयोक्तं नायतिष्ठति नवश्रूयतां ७ निमिः कूटस्थः तस्य ज्येष्ठः पुत्रो देवरातः न्यासो निक्षेपः अयं धनुरूपः स्वपदेशोक्तितरामास्ते देवरातायत्रेतिसुव्यस्या न्यासो देवप्रना स्थानेतत्सजार्थशंकुवधार्थं वदतः अर्थः निक्षेपपरतया व्याख्यातेन पि निक्षेपस्य सुल्केकारणामनुचिते भगवतान् न्नगो वनि क्षेपार्हतया प्रधुककृतदोषभागिता जनकस्य स्यादिति ग्रष्टः ८ कैदंतस्तत्राह दक्षेत्यादि रन्तयज्ञवधे इति निमित्तसप्तमी

एवमुक्तस्तु जनकः प्रत्युवाच महामुनिं श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ७
देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः न्यासोयं तस्य भगवन् हस्ते दत्तो महात्मनः ८
दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् विध्वस्य त्रिदशान् रोषात् सलीलमिदमब्रवीत् ९
यस्माद्भागार्थिनो भागान्नाकल्पयत मे सुराः वरांगानि महार्हाणि धनुषा शातयामि वः १०
ततो विमनसः सर्वे देवा वै मुनिपुंगव प्रसादयंत देवेशं तेषां प्रीतोभवद्भवः ॥

आयम्य नम्रनसज्जीकरणपूर्वमाकृष्य सलीलमिति वद्विषयाः प्रयासो येनासते ९ भागार्थिनः स्विष्टकृदादियज्ञभागार्थिनो ममभागं यतो नाकल्पयंत सुरा अतो वरांगानि शिरांसि प्रकल्पयतो एकवचनमार्षं महार्हाणि महाप्रजायोग्यानि १० विमनसो दीनाः भवो रुद्रः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

344 हृष्टो संहृष्टार्थं गृहीतं धनुरितिशेषः देवदेवस्य रुद्रस्य देवैर्दत्तं धनुरत्नं ॥२॥ अस्माकं पूर्वजे देवराते तैः निवसति हि तै देवैर्न्यासभूतं
देवरूज्ञास्यानभूतं न्यस्तं दत्तं तत्कर्मकौशल एकविशेष्याय प्रीतस्य भगवान्देवः स पञ्चाम्मूलीनेन लोहितः यद्देवोऽशाम्भुना प्राप्यं
जनकाय पाहुतं धनुरिति पायेपिव चापं रामोदयादनेक मांसल्कोहुतं मम मेति यद्दृष्टिमिहतिष्ठती स्वस्यापि तत्तस्मात्
भूतमिप्रयते न ज्ञातं ज्ञात पूज्ञास्यानेवन पूज्यार्थमिस्थले लाभात् अथेति कृचतरिति प्रक्रिचयनार्थमितिशेषः ॥३॥

प्रीतियुक्तस्तु सर्वेषां दैत्यानां च महात्मनां ततो देवदेवस्य धनरत्नं महात्मनः ॥२॥ न्यासभू
ततदा न्यस्तमस्माकं पूर्वजे विभो अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः ॥३॥ क्षेत्रं शोधय
ता लब्धा नाम्ना सीतेति विश्रुता भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ॥४॥

गवेनहाव तीत्यादि शण स्वान लांगलात् लांगलपद्धतेः उत्थिताकस्येतिशेषः ॥३॥ यतः क्षेत्रं शोधयता सीतायाः लांगलपद्धतेर्भू
यालब्धाः सेनाम्नासीतेति प्रसिद्धा भूतलात् यज्ञियात् व्यवर्धत हृद्दिशाभा प्राभेपि अथ लोके खरीलक्ष्मीजनकस्यशु
स्वतः शुभ क्षेत्रे हलोत्खाते नेतारे चोत्तरफाल्गुने अयोनिजा पद्मकरा बालार्कशतसन्निभा सीतामुखे समुत्पन्ना बालभा
वेन सुन्दरी सीतामुखे समुद्भवा सीता इत्यस्य नामचाकरोत् ततो भूद्दौ सीतस्य ऊर्मिला नाम कन्यकेति ॥४॥ ॥
॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वीर्यशुल्का धनुःसज्जीकरणादि तन्मे वीर्यमेव शुल्कं मूल्यं यस्याः १५ न ददामि न प्रादां १७ वीर्यं धनुषः सारं जिज्ञासवस्तस्याभव
न्निति शेषः उपाहृतं दर्शितमानीयेत्यर्थः १८ ग्रहणं धारणं तोलनं भारपरीक्षणार्थं हस्तेन चालनं १९ प्रत्याख्याता कन्यावेदन

वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा भूतलादुत्थितां तां तु वर्धमानां ममात्मजां १५
वरयामासुरागम्य राजानो मुनिपुंगव तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षितां १६ वी
र्यशुल्केति भगवन्न ददामि सुतामहम् ततः सर्वे नृपतयः समेत्य मुनिपुंगवाः १७ मि
थिलामभ्युपागम्य वीर्यजिज्ञासवस्तदा तेषां जिज्ञासमानानां शैवं धनुरुपाहृतम् १८
न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने १९
प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ततः परमकोपेन राजानो मुनिपुंगव २० अरुं
धन्मिथिलां सर्वे वीर्यसंदेहमागताः आत्मानमवधूतं मे विज्ञाय नृपपुंगवाः २१

नेति याचन तदिदं सर्वं ततो नंतरं यद्वृत्तं तन्निबोध जानीहि ततः इति २० अरुंधन्नुपरुद्धवंतः वीर्यसंदेहं धनुरारोपणलक्षणवीर्य
विषये संदेहं विषयतामागताः अस्य बलेनेव कन्यां ग्रहीष्याम इत्यहंयमित्यर्थः ते च सर्वे नृपाः आत्मानं मे मया अवधूतं वीर्यशुल्के

रोषेणविश्वामित्रंमिथिलामपीडयन्नश्रुङ्गभावश्रार्थः त्वयंयाजानिदुर्गोस्थिन्याद्युद्दवशादितिशेषः २२ साधनानिदुर्गोरत्नाणामसा
धनानि यदाद्दयंप्रसादितवानलस्याङ्गभावश्रार्थः २१ स्वाद्दङ्गः जगन्मातः रत्नाणार्थंस्वकार्यसिद्ध्यर्थंचदेवलक्ष्यानंदिषेणादयः
सम्सदेवित्सृज्येतिशेषः २४ अवीर्याः अल्पवीर्याः स्ववीर्यसंदिग्धाः संदिग्धवीर्याः आहिताग्न्यादित्वान्निष्ठायाः परनिपातः न

346 रोषेणमहतविप्राःपीडयन्मिथिलांपुरी ततःसंवत्सरेपूर्णेक्षयंयातानिसर्वशः २२ साध
नानिमुनिश्रेष्ठततोहंभृशदुःखितः ततोदेवगणान्सर्वांस्तपसाहंप्रसादये २३ ददुश्चप
रमप्रीताश्चतुरंगवलंसुराः ततोभग्नान्सपतयोहन्यमानादिशोययुः २४ अवीर्यावीर्य
संदिग्धाःसामात्याःपापकारिणः तदेतन्मुनिशार्दूलधनुःपरमभास्वरं २५ रामलक्ष्मण
योश्चापिदर्शयिष्यामिसुव्रत यद्यस्यधनुषोरामः कुर्यादारोपणंमुने २६ सुतामयोनि
जांसीतांदद्यांदाशरथेरहं २७ इत्यार्षेवालकांडेसर्गः ६६ जनकस्यवचःश्रुत्वाविश्वा
मित्रोमहामुनिः धनुर्दर्शयरामायइतिहोवाचपा

तदेतत्तुक्तवृत्तांतकं २६ २७ इत्यार्षेवालकांडेःसर्गः ६६
रामायइतिहेत्यसंधिरैच्छिकः आरोपयिष्यतीसीतांग्रहीष्यतीतिचेतिभावः १

रामा·
बाल·
१०५
347

सचिवान्समीपे विद्यमानान् अनुलेपितं युक्तं २ प्राविशन्पुरं यत्र वा तदादिति शेषः ३ शतानि पंचाशत् पंचसहस्राणीत्यर्थः अनेन धनु
षोऽतिगुरुत्वादि दर्शितं आयताः दीर्घाः महात्मानोऽत्युत्कृष्टशरीराः अष्टचक्रां रथांगाष्टयुक्तां नोहुः कृत्स्नत्वेन प्रसिद्धां कथंचन न्
न्यून्नापि महता प्रयत्नेनेत्यर्थः ४ आयसीमयस्लोहनिर्मितां सुरोपममिति जनकविशेषणं ५ यदि द्रष्टुमिच्छसि तदा द

ततः स राजा जनकः सचिवान्व्यादिदेश ह धनुरानीयतां दिव्यं गंधमाल्यानुलेपितं २ जनकेन समा
दिष्टाः सचिवाः प्राविशन्पुरं तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ३ नृणां शतानि पंचाशा
द्व्यायतानां महात्मनां मंजूषामष्टचक्रां तां समूहुस्ते कथंचन ४ तामादाय तु मंजूषामाय
सीं यत्र तद्धनुः सुरोपमं ते जनकमूचुर्नृपतिमंत्रिणः ५ इदं धनुर्वरं राजन्पूजितं सर्वराजभिः
मिथिलाधिप राजेंद्र दर्शनीयं यदिच्छसि ६ तेषां नृपो वचः श्रुत्वा कृतांजलिरभाषत विश्वा
मित्रं महात्मानं तावुभौ रामलक्ष्मणौ ७ इदं धनुर्वरं ब्रह्मन् जनकैरभिपूजितं राजभिश्च महा
वीर्यैरशक्तैः पूरितुं तदा ८ नैतत्सुरगणाः सर्वे सासुरा न च रा

र्शयेत्यर्थः ६ उभौ रामलक्ष्मणौ तदा प्रयंत्यनुः
प्रदर्शनमुद्दिश्य विश्वामित्रमभाषतेति योजना ७ पूरितुं प्रयत्नैः तोलनादि वक्ष्यमाणव्यापाराशक्तैः राजभिस्तु जनकैर्देव
प्रतातिरिक्तैः पूजितं परं स्वदेवकेवलपूजितमित्यर्थः ८ नैतदिति पतद्धनुः सवादयानसज्जीकर्तुं शक्ता इति शेषः ९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गतिः शक्तिः सामर्थ्यं वस्त्वर्थे ग्रहणं आकर्षणं कर्षणं आरोपणं सज्जीकरणं समायोगः शरणयोजनं वेपनं ज्यास्फालनं तोल
नमकं १० आनीतं प्रख्यापितं दाप्यैत्यादि ११ यत्र यत्रास्ते इति तिष्ठति तां मञ्जूषां अपावृत्य अपगतावरणां कृत्वा १३ स्पृशामीति द
र्शितो तस्य सन्निहितैः वा बाधैर्यत्नवान् भविष्यामि किमित्यब्रवीत् अपृच्छदित्यर्थः १४ तं राजा मुनिश्च बाढमित्येवब्र

क्व गतिर्मानुषाणां च धनुषोस्य प्रपूरणे आरोपणे समायोगे वेपने तोलने तथा १० तदे
तद्धनुषां श्रेष्ठमानीतं मुनिपुङ्गव: दर्शयैतन्महाभाग अनयो राजपुत्रयोः ११ विश्वामि
त्रः सरामस्तु श्रुत्वा जनकभाषितं वत्स राम धनुः पश्य इति राघवमब्रवीत् १२ महर्षेर्वच
नाद्रामो यत्र तिष्ठति तद्धनुः मंजूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् १३ इदं धनुर्वरं दिव्यं
संस्पृशामीह पाणिना यत्नवांश्च भविष्यामि तोलने पूरणेपि वा १४ बाढमित्यब्रवीद्राजा
मुनिश्च समभाषत लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः १५

ब्रवीत् समभाषतेति प्रत्येकमन्वयः मध्ये मध्यप्रदेशे लीलया अनायासेन जग्राह पादांगुलेनोद्धृतं कृत्वा करेण
जग्राह तदुक्तं पाद्मे रामोपि तद्धनुः कोटिं स्पृष्ट्वा पादांगुलाततः उद्धृत्य चापमारोप्य वपुं जेतो हिता जना इन्द्रियाणि भारवहुस्त
तः पादांगुल्या मध्यभागपर्यंतमुपमानं मध्ये गृहीत्वोदाम्यमहाबलमाध्यनिमहाबलवद्धनेन संवित १५

ॐ
रा०वा०
टी०
१२५

349

पश्यतामसनादरोपेक्षी १६ घृणामाकर्षणं १७ निर्घातोऽशनिध्वनिस्तन्निस्वनसमः शब्द आसीत्तदीर्यतः पर्वतस्य समीपदेशोऽय
याभूतेपस्तथाभूतकंपश्चासीत् १८ मुनिवरो विश्वामित्रः राजा जनकः १९ विगतसाध्वसः रामेणधनुरारोपणेकन्या विव

पश्यतां नृसहस्राणां बहूनां रघुनंदनः आरोपयत्स धर्मात्मा सलीलमिव तद्धनुः १६ आ
रोपयित्वा मौर्वीं पूरयामास तद्धनुः तद्बभंज धनुर्मध्ये नरश्रेष्ठो महायशाः १७ तस्य श
ब्दो महानासीन्निर्घातसमनिस्वनः भूमिकंपश्च सुमहान्पर्वतस्येव दीर्यतः १८ निपे
तुश्च नराः सर्वे तेन शब्देन मोहिताः वर्जयित्वा मुनिवरं राजानं तौ च राघवौ १९ प्रत्याश्व
स्ते जने तस्मिन्राजा विगतसाध्वसः उवाच प्रांजलिर्वाक्यं वाक्यज्ञो मुनिपुंगवः २० भग
वन्दृष्टवीर्यो मे रामो दशरथात्मजः अत्यद्भुतमचिंत्यं च अतर्कितमिदं मया २१ जनकानां
कुले कीर्तिमाहरिष्यति मे सुता सीता भर्तारमासाद्य रामं दशरथात्मजं २२ मम सत्या प्रति
ज्ञा सा वीर्यशुल्केति कौशिक सीता प्राणैर्बहुमता देया रामाय मे सुता भवतोऽनुमते ब्र

ह्मन्नेवस्यास्यतीतियाभीःस्थितासागतेत्यर्थः २० अतर्कितमिदं मयापतदारोपणमित्यर्थः २१ आहरिष्यति संपादयिष्यति २२
मम प्रतिज्ञा सत्या जातेतिशेषः प्राणैः प्राणेभ्यः २३ मममे द्विरुक्तिरन्वयः अनुमते अनुमतेकृत्यसाधनमित्यर्थः भवतोऽनुमत्येति

१२५

प्रश्रितैर्विनयसहितैः सर्वशस्सर्वप्रकारं तथोदितमित्यर्थः २५ शुश्रोरक्तितैः प्रीतियुक्तं प्रीतिक्रियाविशेषणम् २६ आभाष्य
आहयाहूतनस्मात्तूर्णं कल्याणं मंगलाय तज्ज्ञान् २७ इत्यार्षे रामायणे सप्तषष्टितमः ६७ मिथिलाधिपः प्रेषिताः मार्गे क्लान्तवाहनाः ना
वदात्मकारणे निमित्ते क्लान्तवाहनत्वे हेतुः कर्मणि परिश्रान्ताः तदानन्तरं तैः योध्यां प्रविशन् १ राजा वचनान् जन

350

राजानं प्रश्रितैर्वाक्यैरानयंतु त्वरं मम । प्रदानं वीर्यशुल्कायाः कथयंतु च सर्वशः २५ मुनिगु
प्तो च काकुत्स्थो कथयंतु नृपाय वै । प्रीतियुक्तं तु राजानमानयंतु सुशीघ्रगाः २६ कौशि
कस्य तथेत्याह राजा चाभाष्य मंत्रिणः । अयोध्यां प्रेषयामास धर्मात्मा कृतशासनात् २७
यथावृत्तं समाख्यातुमानेतुं च नृपं तथा २८ इत्यार्षे रामायणे सप्तषष्टितमः सर्गः ६७ ज
नकेन समादिष्टा दूतास्ते क्लान्तवाहनाः । त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन् पुरीम् १ ते राजव
चनाद्दूता राजवेश्मप्रवेशिताः । ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम् २ बद्धाञ्जलिपुटाः
सर्वे दूता विगतसाध्वसाः । राजानं प्रश्रितैर्वाक्यैर्मधु

कोऽस्मानिह प्रेषितवानिति स्वराजनामसंकीर्तनात् राज
वेश्मदशरथवेश्मप्रवेशिताः स्वदीयैर्द्वारपालैरिति शेषः २ विगतसाध्वसाः महाराज इत्यनेन तद्भवतः स्वेष्टतोऽभयरक्षिताः ३

डो॰
रावा॰
बाटी॰
१८ 351

साग्निहोत्रपुरस्कृतः पुरस्कृताग्निहोत्रसहितः आहिताग्निभिः पुरस्कृतामेत्यादयः अग्निहोत्रपदेनतत्साधनऋत्विजस्तैः सहितइत्य
र्थइत्यन्ये ४ कुशलंचेतेम अव्ययमनपायं हेमहाराजप्राप्च्छते आङिनुप्रच्छ्योरित्यात्मनेपदं पुरःसरामात्मसहितं ५ अनुमते
अनुमतस्त्कृतत्साधनानिमित्ते ८ वीर्यशुल्केप्रतिज्ञापूर्वं युष्माकंविदितेसन्वयः विमुखीकृताइत्यपिविदितं ७ नवपुत्रकैरि

मैथिलोजनकोराजासाग्निहोत्रपुरस्कृतः मद्गुर्मेद्रुमधुवयास्नेहसंयुक्तयागिरा ४ कुश
लंचाव्ययंचैवसोपाध्यायपुरोहितं जनकस्त्वांमहाराजपृच्छतेसपुरःसरं ५ पृष्ट्वाकुश
लमव्यग्रंवैदेहोमिथिलाधिपः कौशिकानुमतेवाक्यंभवंतमिदमब्रवीत् ६ पूर्वंप्रति
ज्ञाविदितावीर्यशुल्कामामात्मजा राजानश्चकृतामर्षानिर्वीर्याविमुखीकृता ७ सेयंम
मसुताराजन्विश्वामित्रपुरस्कृतैः यदृच्छयागतैराजन्निर्जितातवपुत्रकैः ८ तच्चरत्नंध
नुर्दिव्यंमध्येभग्नंमहात्मना रामेणहिमहाबाहोमहत्या

तितवपुत्रेणरामेणेत्यर्थः कश्यपेनाल्पार्थकेन
वास्यधोनतंजामात्रकृत्यामहाबलतेनेमसरकृत्याचस्त्रपतेनवङ्कवचनमप्रयोगः ८ तच्चसर्वंदत्ताधरधंससमयंरुद्रेणयहत्ता क
त्वादिपुरःसारसकलसंजयः कृतस्तच्चेत्यर्थः रत्नंधनुःउत्तमंधनुः ९

२ पुष्पावतिक

१३८

